
श्रीपुरंदरदास के

# भक्ति गीत



Published by

TIRUMALA TIRUPATI DEVASTHANAMS, TIRUPATI

2000

SRI VENKATESWARA
CENTRAL LIBRARY &
RESEARCH CENTRE.
Acc. No 56220
Date
TIRUPATI.

॥ श्रीनिवासो विजयते ॥

# मार्कण्डेयसंहिता

## प्रथमोऽध्यायः

### [तन्त्रानुक्रमणम्]

* * *

आदौ कृतयुगे पूर्वं पृथुर्वैनः (निः ?) प्रतापवान् ।
शशास वसुधां नित्यं प्रजा धर्मेण पालयन् ॥ १ ॥

नीतिशास्त्रविधानज्ञो नित्यं स्वाध्यायतत्परः ।
जितेन्द्रियो जितक्रोधो जितारिः सत्यसंश्रयः ॥ २ ॥

त्रिवर्गस्य फलं प्राप्य मनसा चिन्तयन् नृपः ।
मुक्त्युपायः कथं मे स्यादिति नित्यं शुचिव्रतः ॥ ३ ॥

धुरं राज्यस्य निक्षिप्य सचिवेषु विचक्षणः ।
अरण्यं नैमिशं नाम ययौ मित्रपुरस्सरः ॥ ४ ॥

मण्डलं तत्र दृष्ट्वाथ ऋषीणामूर्ध्वरेतसाम् ।
ब्राह्मया श्रिया प्रज्वलितं वेदाध्ययनशालिनाम् ॥ ५ ॥

2. a) ASv. °निर्मुक्तो MT. °धानोक्त्या for °धानज्ञो
   b) ASv. om. नित्यं स्वाध्याय°
   d) ASv. om.

4. a) Sv. राज्ये वि° for राज्यस्य
   d) AMMyS²Sv. °स्मरं for °स्सरः

5. a) ASv. om.
   c) MT. om. °लितं
   d) MT. ... ... ल्ललोलिताः वेदाध्ययनशालिनः ।

तेषां मध्ये विराजन्तमादित्यमिव तेजसा ।
अपश्यत्तनयं राजा मृकण्डोस्तु महात्मनः ॥ ६ ॥

ववन्दे चरणौ तस्य मार्कण्डेयस्य धीमतः ।
कृताञ्जलिरुवाचेदं हर्षेणोत्फुल्ललोचनः ॥ ७ ॥

**[पृथुरुवाच]—**

भगवन् कुशलं कच्चित् सर्वत्र नियमेषु वः ।
चिरार्जितानां तपसां प्रत्यूहो नेह विद्यते ॥ ८ ॥
इति राज्ञो वचः श्रुत्वा मार्कण्डेयोऽब्रवीन्नृपम् ।

**[मार्कण्डेय उवाच]—**

क्रियासु मम सर्वासु कुशलं नृपसत्तम ॥ ९ ॥
त्वया विचार्यमाणस्य तपसो मम सर्वदा ।
अन्तरायं न पश्यामि ईतयश्च न कुत्रचित् ॥ १० ॥

स्वागतं ते नृपश्रेष्ठ कुशलं नृपकर्मसु ।
किमर्थं पादचारेण आगतस्त्वं तपोवनम् ॥ ११ ॥

**[पृथुरुवाच]—**

त्वत्प्रसादान्मुनिश्रेष्ठ ममैव कुशलं सदा ।
यागाः कृता मया विद्वन् त्रिवर्गफलदायकाः ॥ १२ ॥

मुक्त्युपायं न पश्यामि येषु सर्वेषु सत्तम ।
त्वत्तः प्रष्टुमनुप्राप्तो विमुक्तेश्चैव साधनम् ॥ १३ ॥
ब्रूहि सर्वमृषिश्रेष्ठ कृपया मम कांक्षितम् ।

---

6. & 7. MT. read after 10
6. b) AMS[1]S[2]Sv. °साम् for °सा
7. c) M. om. °जलिरुवाचेदं
8. c) S[1]. विराजितानां तपसा

[मार्कण्डेय उवाच]—

कारणं तव वक्ष्यामि मुक्त्युपायस्य साधनम् ॥ १४ ॥
शृणुष्वाऽवहितो राजन् संसाराम्भोधिपारगम् ।
सृष्ट्वा पुरा प्रजा ब्रह्मा विचित्राः कर्मकौशलाः ॥ १५ ॥

स्वात्मानं द्रष्टुमुद्युक्तः प्रायान्नारायणं गुरुम् ।
गत्वा (दृष्ट्वा ?) तत्र समासीनं वैकुण्ठे लोकपूजितम् ॥ १६ ॥

विष्वक्सेनादिभिर्नित्यं स्तूयमानपदाम्बुजम् ।
प्रहृष्ट (हर्ष ?) मतुलं लेभे; सन्तुष्टश्चतुराननः ॥ १७ ॥

नमो नारायणेत्युक्त्वा पादयोर्निपपात ह ।
स्रष्टारं तं समुत्थाप्य भगवानिदमब्रवीत् ॥ १८ ॥

[भगवानुवाच]—

किं कारणमिहायातस्त्वं वदस्व प्रजापते ।

ब्रह्मोवाच—

निःश्रेयसं समुद्दिश्य प्राप्तोऽस्मि त्वां जगद्गुरुम् ॥ १९ ॥
संसारसागरे मग्नं मामुद्धर जगत्पते ।
कैवल्यं तु यथा मे स्यात्तस्योपायं तथा वद ॥ २० ॥
कृपया परया विष्णो विमृश्य मनसा धियः (या?) ।

---

14. a) AMS¹S²Sv °वंद्विज° for °वंमृषि°

15. d) AMS²Sv. °कौशलान् for °कौशलाः

17. ab) T. om.

19. a) MT. °मितो for °मिहा°
b) ASv °स्तं for °स्त्वं
c) ASv. om. 19 cd – 20 ab.

20. b) MS³T. जनार्दन for जगत्पते

21. a) M. °पारया for परया ; MS¹S³T. °विष्टो for विष्णो

[मार्कण्डेय उवाच]—

श्रुत्वा तु ब्रह्मणो वाक्यं भगवान् लोकपूजितः ॥ २१ ॥
विमृश्य मनसा सर्वं तदा तस्येदमुक्तवान् ।
सार्धकोटिप्रमाणेन कथितं तस्य विष्णुना ॥ २२ ॥

रात्रिभिः पञ्चभिः सर्वं पञ्चरात्रमतः स्मृतम् ।
वेधसा मम तत्सर्वमुक्तं सायुज्यसाधनम् ॥ २३ ॥

श्रुत्वा प्रहर्षमतुलं प्राप्तोऽस्मि ब्रह्मणः पुरा ।
तत्सर्वं तव वक्ष्यामि यथा पूर्वं मया श्रुतम् ॥ २४ ॥

संग्रहेण मुनि (नृप ?)श्रेष्ठ शृणुष्वैकमनाधुना ।
अष्टोत्तरेण (?) भेदेन संहिता बहुधा मताः ॥ २५ ॥

तेष्वयं मन्त्रसिद्धान्तो मार्कण्डेयाख्य ईरितः ।
संहितेषु च सर्वेषु अष्टोत्तरशतेषु च ॥ २६ ॥

अनुक्तमुक्तमेवं तु योजयेत्तु परस्परम् (?) ।
प्रथमं भूपरीक्षा तु शिलासंग्रहणं ततः ॥ २७ ॥

विमानलक्षणं पश्चात् मृत्संस्कारश्चतुर्थके ।
शूलस्थापन पञ्चम्यां (?) बालस्थापन (नं तु ?) षष्ठके ॥ २८ ॥

---

23. a) S¹S². पूर्वं for सर्वं ; My. Manuscript begins with- "...वं पञ्चरात्र°"

24. b) MS¹S²T. परं for पुरा

26. a) AMMySv. तेषु यन्° for तेष्वयं ; M. °सिद्धचर्थो for- °सिद्धान्तो

27. a) AMS²Sv T. अनन्त° for अनुक्त°
ab) AMMy S²SvT. read after 61 cd also.

28. b) M°रं तु तत्परम् for °रश्चतुर्थके

प्रतिमालक्षणं पश्चाद्वेरलक्षणमष्टके (मे ?) ।
देव्यादिलक्षणं पश्चात् पूजोपकरणं विधिः ॥ २९ ॥

एकादशे नृपश्रेष्ठ आचार्यस्य च लक्षणम् ।
द्वादश्यां (शे?) चाङ्कुरविधिस्तत्पश्चात् स्थापनं विधिः ॥ ३० ॥

नित्यार्चनविधिः पश्चात नित्याग्नेश्च विधिस्ततः ।
नित्योत्सवविधिः पश्चात् देवदेवस्य शार्ङ्गिणः ॥ ३१ ॥

पञ्चशुद्धिः सप्तदशे मण्डलं तु ततः परम् ।
एकोनविंशतौ स्नानविधिः पश्चान्महोत्सवः ॥ ३२ ॥

पवित्रमेकविंशे तु द्वाविंशे डोल (?) रोपणम् ।
दीपोत्सवस्त्रयोविंशे प्रायश्चित्तं ततः परम् ॥ ३३ ॥

अन्तर्यागः पञ्चविंशे मन्त्रोत्पत्तिरतः परम् ।
मुद्राध्यायः सप्तविंशे लक्षणेन समन्वितः ॥ ३४ ॥

नित्यं नैमित्तिकं काम्यं प्रायश्चित्ताष्ट (?) विंशके ।
ऊनत्रिंशो (?) त्पातशान्तिरन्तर्यागश्च त्रिंशके ॥ ३५ ॥

एकत्रिंशे तु मुद्रा स्यात् (?) द्वात्रिंशे चैव निष्कृतिः ।
एवमेव प्रकारेण द्वात्रिंशाध्यायसंख्यया ॥ ३६ ॥

---

29. d) S¹S²My. °दुपकरणविधिं ततः MT. °दुपकोणविधिं ततः

31. b) M. °ग्नि° for °ग्ने°

34. a) M. om. °न्तर्यागः
b) AMMy S²SvT. °मतः for °रतः

35. cd) AMMy S²SvT. om.

36. ab) AMMy S²SvT. om.

सर्वं वक्ष्यामि राजेन्द्र सावधानो जितेन्द्रियः ।
शृणुष्व परमं गुह्यं ब्रह्माद्यैरपि दुर्लभम् ॥ ३७ ॥

श्रुतिमूलमिदं तन्त्रं प्रमाणं कल्पसूत्रवत् ।
पुरा कलियुगे प्राप्ते एषां (एतत् ?) तन्त्रमनुत्तमम् ॥ ३८ ॥

पाञ्चरात्राख्यमुक्तं तु चतुर्वर्गफलप्रदम् ।
शास्त्रान्तरव्यसनिनामभ्यासः कालयापनम् ॥ ३९ ॥

फलं वा किञ्चिदेवास्य (?) यत्तत्साधुबहिष्कृतम् ।
वासुदेवं परित्यज्य यो (ये?) ऽन्यं देवमुपासते ॥ ४० ॥

नरकाय भवन्त्येते नात्र कार्या विचारणा ।
सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते ॥ ४१ ॥

वेदशास्त्रात् (दाच्छास्त्रं ?) परं नास्ति न दैवं केशवात्परम् ।
तस्माद्भजस्व देवेशमनेन विधिना नृप ॥ ४२ ॥

संहितानाम (?) वक्ष्यामि यथा पूर्वं मया श्रुतम् ।
मार्कण्डेयं पारिषदं नारदीयं च संहिता ॥ ४३ ॥

विश्वामित्रं वैनतेयं संहिता गरुडस्य च ।
काश्यपं पैङ्गलाह्वानं (ह्वं च ?) वासिष्ठं पुष्कलाह्वयम् ॥ ४४ ॥

---

38. b) AMyS[1]S[2]SvT. प्रामाण्यं for प्रमाणं

39. a) AMySv. °रत्नं for °मुक्तं

40. a) ASv. om. फलं वा
d) AMMyS[2]Sv. योऽन्य° for योऽन्यं

41. d) ASv. भय° for भुज°

43. d) My. °यश्च for °यं च ; AMySv. °हितम् for °हिता

44. a) ASv. °तेय° for °तेयं
d) S[1]. पौष्क° for पुष्क°

सत्त्वाख्यं सनकाह्वानं विष्णुसिद्धान्तसंहिता ।
पाद्मं पद्मोद्भवं ज्ञेयं विहगेन्द्रं च वारुणम् ॥ ४५ ॥

नलकूबरमाग्नेयं वामनं तिलकाह्वयम् ।
पार्षदं पारमैश्वर्यं (?) पाराशरमतः परम् ॥ ४६ ॥

विष्वक्सेनं वैनतेयं विष्णुसिद्धान्तसंहिता ।
श्रीविष्णुतिलकाह्वानं (ह्वं च ?) लक्ष्मीतिलकसंहिता ॥ ४७ ॥

मूलाख्यसंहिता राजन् श्रीभागवतसंहिता ।
ईश्वराख्यं च कौबेरं संहिता विष्णुपूर्वया (विंका?) ॥ ४८ ॥

मायाख्यसंहिता चैव तथा सांख्यमतः परम् ।
सङ्कर्षणाख्यं प्रद्युम्नं ब्रह्मनारदसंहिता(ते?) ॥ ४९ ॥

संवादं रुद्रशुक्राभ्या (?) मुमामाहेश्वराह्वयम् ।
दत्तात्रेयं च वाराहं संहिता शुक्रपूर्वया(विंका ?) ॥ ५० ॥

त्रैलोक्यमोहनं चैव परमाह्वयसंहिता ।
धनञ्जयं पुष्कलानां (ख्यं ?) सत्त्वाख्यं सनकाह्वयम् ॥ ५१ ॥

---

5. b) ASv. संहितम् for संहिता
c) My T. read 59 ab between 45 ab & cd.
Sv My. महोत्सवं for पद्मोद्भवं

6. a) My. नलं कुबेरमाज्ञेयं

8. d) ASv. शाख्यसंहिता for विष्णुपूर्वया

9. b) ASv. सांख्यायां च My...सांख्य° S[1]. साम्भतन्त्र° S[2]. सांख्यया च T. तथा सांख्या for तथा सांख्य°

0. a) MT. °दं इन्द्र° ASv. °दं द्र° for °दं रुद्र°
b) S[1]. महेश्वरसंहिता° for माहेश्वरा°
c) MyS[1]S[2]T. पाराख्यं ASv. पाराख्य° for वाराह°

1. b) AMyS[1]S[2]SvT. om. °ह्वय°
d) AMMyS[2]SvT. °ह्वया for °ह्वयम्

सनत्कुमाराख्यतन्त्वं सत्याख्यं सात्त्वतं भवेत् (तथा ?) ।
शौनकीयं पुष्टितन्त्वं दक्षमारीचसंहिता (ते ?) ॥ ५२ ॥

हारीतं योगहृदयं मम संग्रहसंहिता (?) ।
औशना (?) उशनाख्यं च दत्तात्रेयाह्वसंहिता ॥ ५३ ॥

वैहायसं भार्गवं च संहिता परपूरुषम् ।
भारद्वाजाह्वयं प्रोक्तं याज्ञवल्कीयसंहिता ॥ ५४ ॥

गौतमीयं च दूर्वाससंहिता कृष्णसंहिता ।
नारसिंहं हयग्रीवसंहिता धरणीपते ॥ ५५ ॥

पुलस्त्यसंहिता प्रोक्ता दत्तात्रेयाख्यसंहिता ।
शर्वाख्यसंहिता चैव मिहिराख्याह्वयस्तथा (तथैव च?) ॥ ५६ ॥

संकर्षणाख्य प ........ बलिसंहिता ।
महासनत्कुमाराख्यं विश्वाख्यमिति (ख्या चैव ?) संहिता ॥ ५७ ॥

---

52. d) ASv. om. दक्ष My. om. द
M. दाक्षं मार T. क्षममारी for दक्षमारी°

53. b) MT. मधु° for मम
c) M. °ख्या for °ख्यं

54. b) ASv. परम° for पर°

55. c) AMMyS²SvT. °ग्रीव° for °ग्रीवं
d) MS¹S²T. °पतेः for °पते

56. c) M. शार्वाख्या° for शर्वाख्य°
d) S¹. मिहिरागा for मिहिराख्या°

57. a) A. पा for प°
b) M. om. बलि S²SvA. बलि for बलिसं°
d) S¹. °मित्रस्य for °ख्यमिति

शाकलाख्यं च शार्वेयमाग्नेयी संहिता स्मृता ।
पुष्टितन्त्रं महातन्त्रसंहिता शौनकीयकम् ॥ ५८ ॥

वामनं राघवाह्वानं (ह्वं च ?) कृष्णशाबरसंहिता(ते?) ।
ऐरा(न्द्रा?)ख्यसंहिता चैव प्राचेताख्या (?) उदाहृता ॥ ५९ ॥

अष्टोत्तरेण भेदेन तन्त्रेणाराधनं हरेः ।
तत्तत्कैवल्यसंप्राप्ता (प्राप्त्यै ?) मुक्त्युपायः पृथक् पृथक् ॥ ६० ॥

इति तन्त्रं समाख्यातं यथा पूर्वं मया श्रुतम् ।
विस्तरेणैव तन्त्राणां क्रमस्तु प्रकटीकृतः ॥ ६१ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां तन्त्रानुक्रमणविधानो नाम
प्रथमोऽध्यायः ॥

b) ASvMyS[1]S[2]T. °ग्नेया for °ग्नेयी
cd) M. reads before ad

ab) My T. read between 45 ab & cd

c) My. हे° S[1]. औ° for ऐ°
d) MyS[2]Sv. प्रचेता for प्राचेता°

d) MyT. प्रकृतिः for प्रकटी°
AMMyS[2]SvT. add 27 ab after this line.

# द्वितीयोऽध्यायः

## [ भूपरीक्षा ]

* * *

अथ वक्ष्यामि राजेन्द्र भूपरीक्षाविधिं शृणु ।
शोधयेत्तु ततो भूमिं कर्षयेत् प्रागुदक् क्रमात् ॥ ॥ १ ॥

अस्थिकेशादिरहितां कपालाङ्गारवर्जिताम् ।
ऊषरा दग्धभूमिश्च वर्षाकालविवर्जिता ॥ २ ॥

आरम्भे च सृगालाद्यैः संकीर्णा बन्धुनाशिनी ।
पुरीषभूमिः सर्वेषां कर्तृदुःखप्रदा सदा ॥ ३ ॥

तुषभस्मास्थिकेशैश्च काष्ठलोष्टकपालकैः ।
क्रिमिकीटपतङ्गैश्च शर्करैश्च (राभिः ?) समन्विता ॥ ४ ॥

अशुभाऽश्रीकरी भूमिः शूद्रस्य कटुका स्मृता ।
आज्यगन्धा द्विजातीनां रक्तगन्धा नृपस्य तु ॥ ५ ॥

मूत्रगन्धा तु सा वैश्या (वैश्यानां ?) इत्येतत् सर्वमेदतः ।
एवं परीक्ष्य यत्नेन सर्वे (वर्णे ?) गन्धरसादिभिः ॥ ६ ॥

खानयेद्रत्निमात्रं तु पांसुमुत्सृज्य पूरयेत् ।
पांसुरभ्यधिको यत्र सा भूमिश्चोत्तमा स्मृता ॥ ७ ॥

---

3 a) AMy. सृका° for सृगा°
b) S¹S². °पूर्णा for °कीर्णा°
d) AMyS¹S²SvT. कर्तुं for कर्तृ°

4. b) ASv. काष्ठलोष्ठ...पालकैः

5. b) AMSS¹S²SvT. °रका for °टुका

6. a) AS¹S²Sv. वैश्य for वैश्या
b) AS¹S²SvMy. ते for तत्

7. a) M. om. त्नि

उत्तमा (समानो ?) मध्यमा चैव हीने (नः ?) स्याद्धमा स्मृता ।
सम्यक् परीक्ष्य बहुधा कर्षयेल्लाङ्गलैः क्रमात् ॥ ८ ॥

वापयेत्तिलमुद्गांश्च यवसर्षपकानि च ।
अथवा सर्वधान्यानि याज्ञिकानि समन्ततः ॥ ९ ॥

त्रिरात्रादधि रोहन्ति उत्तमा भूमिरुच्यते ।
अप्ररूढेन या (ढाङ्कुरां ?) भूमिं प्रयत्नेन विवर्जयेत् ॥ १० ॥

सस्यानां फलकाले तु गवां तृप्तिं च कारयेत् ।
ततस्तु लोकपालांस्तु पूजयेद्देशिकोत्तमः ॥ ११ ॥

फलैरपूपैर्लाजैश्च अर्धरात्रे बलिं क्षिपेत् ।
पूजयेद्रक्तपुष्पेण रक्तगन्धेन देशिकः ॥ १२ ॥

पूजयेत्कुमुदादीनामर्चयेत् क्षितिदेवताम् ।
वास्तुपूजापुरस्कं तु शान्तिहोममतः परम् ॥ १३ ॥

रात्रौ जागरणं कृत्वा रात्रिशेषं समापयेत् ।
प्रभाते विमले शुद्धे कृतस्नानो जितेन्द्रियः ॥ १४ ॥

पुण्याहं वाचयेत् पश्चात् ब्राह्मणानां (?) च भोजयेत् ।
तत्क्षेत्रं खानयेत् पश्चात् चतुरश्रं समन्ततः ॥ १५ ॥

पुरुष (?) त्रयं खनित्वा तु तदर्धं वार्धकं तु वा ।
एवं क्षितिं खनित्वा तु तन्मध्ये पूरयेज्जलम् ॥ १६ ॥

जलमध्ये विधिं पूज्य ब्रह्मबीजेन मन्त्रवित् ।
गन्धपुष्पैरलङ्कृत्य शङ्खध्वनिसमन्वितम् ॥ १७ ॥

---

4. a) S[1]. कुर्यात् for कृत्वा

6. a) ASv. पुरुत्रया M. पूर्षत्रयं My. पुगयं T. पु...त्रयं for पुरुषत्रयं

7. d) AMMyS[1]S[2]Sv. न्वितः for न्वितम्

घण्टारवपुरस्कं तु वीणावेणुसमन्वितम् ।
एवं विधिं समभ्यर्च्य अधिवासनमारभेत् ॥ १८ ॥

तस्य दक्षिणपार्श्वे तु पश्चिमे चोत्तरे तथा ।
वासोऽधिवासवन्मध्ये कल्पयेच्छिल्पवित्तमः ॥ १९ ॥

षोडशस्तम्भसंयुक्तं पञ्चविंशति (?) वा ततः ।
चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ २० ॥

नानालङ्कारसंयुक्तं कल्पयेच्छिल्पवित्तमः ।
पूर्णकुम्भं न्यसेन्मध्ये पक्वबिम्बफलाकृतिम् ॥ २१ ॥

द्रोणद्वयेन संपूर्णं त्रिसूत्रैः समलङ्कृतम् ।
गन्धतोयेन संपूर्य गन्धपुष्पसमन्वितम् ॥ २२ ॥

द्रोणाष्ट (?) शालीनास्तीर्य पद्ममष्टदलं लिखेत् ।
कर्णिकायां न्यसेत्कुम्भं युग्मवस्त्रेण वेष्टितम् ॥ २३ ॥

---

18. a) MT. मन्दा° for घण्टा°
    b) AMMy S¹S²Sv. °न्वितः for °न्वितम्

19. c) ASv. वासवा म° for वासवन् म°
    d) ASv. °च्छिर° for °च्छिल्प°; ASv. °वित्तम for °वित्तमः

20. a) M. om. verse 20&21 ab ; T. om. स्तम्भ ; ASv. om. °संयुक्तं
    b) ASv. om. पञ्च
    c) ASv. om. चतुर्द्वार

21. c) S². °कुम्भान् for °कुम्भं

23. a) A. द्रो...ष्ट° for द्रोणाष्ट°
    c) M. पद्मं for कुम्भं
    d) M. कुम्भं for युग्म°

नवरत्नानि निक्षिप्य सौवर्णायुधपञ्चकम् ।
वासुदेवेन मन्त्रेण स्थापयेद्देशिकोत्तमः ॥ २४ ॥

सर्वायुधसमायुक्तं सर्वदेवावृतं ततः ।
हिरण्यभूतं सर्वज्ञं सर्वभूतहृदि स्थितम् ॥ २५ ॥

आत्मानमन्तरात्मानं परमात्मानमव्ययम् ।
नारायणमणीयांसं सृष्टिसंहारकारणम् ॥ २६ ॥

चिद्रूपं पुरुषं विष्णुं ध्यायेत् कुम्भोदमध्यमे ।
एवं ध्यात्वा समभ्यर्च्य गन्धाद्यैः सुमनोहरैः ॥ २७ ॥

प्रत्येकं द्रोणशाल्यूर्ध्वे विद्येशानुपरि न्यसेत् ।
पूर्ववद्द्रव्यसंयुक्तान् घटेष्वभ्यर्च्य साधकः ॥ २८ ॥

स्वैः स्वैर्मन्त्रैश्च गन्धाद्यैरुपहारं मनोहरम् ।
एवं प्रपूज्य विद्येशान् होमकर्म समारभेत् ॥ २९ ॥

कुम्भस्य पूर्वदिग्भागे कुण्डं कुर्यात्तु शिल्पिना ।
वृत्तं वा चतुरश्रं वा फुल्लपद्ममथापि वा ॥ ३० ॥

केवलं स्थण्डिलं वापि हस्तमात्रेण कारयेत् ।
आरभेत्तु ततो होमं समिधष्टसमन्वितम् ॥ ३१ ॥

24. b) ASvT. °धृत् S[1]. युत् S[2]. युक् for °कम्
c) ASv. °वेति for °वेन
25. b) M. °वव्रतं for वावृतं
26. b) AMySv. °व्ययः for °व्ययम्
c) S[1]. ध्यायेत् for ध्यात्वा
28. a) M. शास्त्रार्थे T. शाल्यर्थे for शाल्यूर्ध्वे
b) M. वर्षदेशान् for विद्येशानु° T. om. नु
30. a) AMMy S[2]SvT. °देशे for °भागे
b) My. कुण्डलं for कुण्डं
31. M. om.

याज्ञिकाः समिधो राजन् पालाशसमिधोऽपि वा ।
अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तु वा ॥ ३२ ॥

वासुदेवेन मन्त्रेण मध्ये चैकाहुतिं हुनेत् ।
समिधाज्यचरूणां तु प्रत्येकं मूलविद्यया ॥ ३३ ॥

एवं हुत्वा विधानेन ततः पूर्णाहुतिं क्रमात् (चरेत् ?) ।
प्रार्थयेदनलेशं च भस्मना तिलकं ततः ॥ ३४ ॥

समाप्य होमकर्माणि कृतकृत्यः स पूजकः ।
अरुणोदयवेलायां स्नात्वाचार्यो यथाविधि ॥ ३५ ॥

पूजयेत्तु ततः कुम्भान् गन्धपुष्पादिना ततः ।
महाहविर्निवेद्याथ धूपदीपान्तमर्चयेत् ॥ ३६ ॥

दशदिक्षु बलिं दद्यात् प्राच्यादीशावसानकम् ।
रक्तोदकं रक्तपुष्पं रक्तगन्धादिभिः क्रमात् ॥ ३७ ॥

बलिदानं प्रकुर्वीत भूतानां देशिकोत्तमः ।
प्रोक्षयेत् कुम्भतोयेन दर्भकूर्चैर्वसुन्धराम् ॥ ३८ ॥

प्रोक्षयेत् ग्रामसीमायां दिक्षु सर्वासु देशिकः ।
दिग्बन्धं कारयेत् पश्चादस्त्रमन्त्रेण मन्त्रवित् ॥ ३९ ॥

ततो वंशक्रमात् कुर्यात् त्रिभ्यः सिकतया युतम् ।
स्नानयेन्मुद्गरैः सम्यग् वैष्णवैर्वेदपारगैः ॥ ४० ॥

---

32. ab) M. om.
34. c) My. om. ये; तु for च
35. c) My. om. °दय°
36. d) AMMyS¹S²Sv.दीपधूपां° for धूपदीपां°
40. a) A. तत्तोयं M. ततोयं S¹. ततो वर्म° Sv. तत्वोयं for ततो वंश° ASv. क्रमशात् for क्रमात्

सूत्रशङ्कुं खनित्वा तु चैत्रे मासे शुभे दिने ।
सूत्रेण सूत्रयेत् पश्चात् शिल्पिना कुशलेन वै ॥ ४१ ॥

प्रासादं कारयेत् पश्चादाचार्यः शिल्पिभिः सह ।
सालकं (धको ?) क्रम (मन्त्र ?) योग्यस्तु स्थपतिः कर्मयोग्यतः
(ग्यकः ?) ॥ ४२ ॥

यदिदं भूमिशुद्ध्यर्थं प्रोक्षणं परमं शुभम् ।
एवं संक्षेपतः प्रोक्तं प्रासादार्थं पृथो नृप ॥ ४३ ॥

अनेन विधिना राजन् यः कुर्यात् पुण्यकर्मभाक् ।
पापैः सर्वैर्विनिर्मुक्तः स याति परमां गतिम् ॥ ४४ ॥

राष्ट्रवृद्धिकरं पुण्यमायुरारोग्यवर्धनम् ।
धनधान्यानि वर्धन्ते राजराष्ट्रं विवर्धते ॥ ४५ ॥

आचार्यं पूजयेत् पश्चात् वस्त्रहेमाङ्गुलीयकैः ।
शिल्पिनं पूजयेत्तत्र वस्त्रैः कनककुण्डलैः ॥ ४६ ॥

दैवज्ञं पूजयेत् पश्चात् नववस्त्राङ्गुलीयकैः ।
सदस्यान् पूजयेत् पश्चात् मुखवासनपूर्वकम् ॥ ४७ ॥

एवं क्रमेण संपूज्य वस्त्राभरणसंयुतः ।
ततस्तु कारयेद्गेहं शिल्पिना कुशलेन तु ॥ ४८ ॥

सुमुहूर्ते सुलग्ने तु बालस्थानमथारभेत ।
बालस्थानं पुरा कल्प्य पश्चाच्छू (न्मू ?) लालयं क्रमात ॥ ४९ ॥

---

43. d) T. प्रभो for पृथो
44. c) ASv. सर्वेषु for सर्वैर्वि; M. मुक्तः सः for निर्मुक्तः
d) MT. प्र° for स
45. a) T. राज्य° for राष्ट्र°
46. b) M. होमकराङ्गुलैः for हेमाङ्गुलीयकैः

कारयेत्तु विशेषेण मन्त्रन्याससमन्वितम् ।
हस्तमात्रं खनित्वा तु बालस्थाने तु मध्यमे ॥ ५० ॥

सहस्रं शतनिष्कं वा तस्यार्धं वार्धमेव वा ।
विन्यसेत् क्षितिमध्ये तु तप्तकाञ्चनमुत्तमम् ॥ ५१ ॥

नव रत्नानि संगृह्य इन्द्रादीशावसानकम् ।
विन्यसेत् स्वस्वमन्त्रेण मध्यरात्रे तु गोपयेत ॥ ५२ ॥

शङ्खनिर्घोषसंयुक्तं गर्भन्यासं समाचरेत् ।
ताम्रेण वैलका (फेलकां ?) कृत्वा पद्माच्छाद्य पूरयेत ॥ ५३ ॥

शिलाभिरिष्टकाभिर्वा तं प्रच्छाद्य पदं क्रमात् ।
गन्धपुष्पादिनाभ्यर्च्य घण्टाशब्दसमन्वितम् ॥ ५४ ॥

ब्रह्मबीजेन तत्सर्वं कारयेत् साधकोत्तमः ।
पश्चाद्देवीं समभ्यर्च्य श्रियार्थं (?) परमां शुभाम् ५५ ॥

वासुदेवं सु (स्व ?) मन्त्रेण पश्चात् संपूजयेत् क्रमात् ।
एवं संक्षेपतः प्रोक्ता भूपरीक्षा ह्यनुत्तमा ॥ ५६ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां भूपरीक्षाविधानो
नाम द्वितीयोऽध्यायः ॥

---

51. a) M. °निष्का for °निष्कं
52. b) M. °द्याशा for °दीशा°
    d) M. °रात्रेषु for रात्रे तु
53. c) MT. वैलिकां for वैलका
54. a) ASv. °रष्ट° for °रिष्ट
55. d) MMy. परमम् for परमाम्; AS¹Sv. शुभम् for शुभाम्

# तृतीयोऽध्यायः

## [ शिलासंग्रहणम् ]

* * *

शिलासंग्रहणं वक्ष्ये पाषाणो बहुधा स्मृतः ।
मुख्यं तु द्विविधं प्रोक्तं पर्वतेषु धरासु च ॥ १ ॥

मेरुः सह्यश्च विन्ध्यश्च श्रीगिरिश्चित्रकूटकः ।
मन्दरो माल्यवांश्चैव कैलासो गिरिपर्वतः ॥ २ ॥

त्रिकूटो हेमकूटश्च वृषभो नीलपर्वतः ।
एतेषु पार्वताः शैलाश्चोत्तमाः परिचक्षते ॥ ३ ॥

उपपीठादिपद्मान्तं बेरकर्माणि कारयेत् ।
वसुन्धराशिला ग्राह्य आढ्यं परिकल्पयेत् ॥ ४ ॥

आचार्यः शिल्पिभिः सार्धं यजमानसमन्वितः ।
भेरीपटहनादैश्च शङ्खकाहलसंयुतम् ॥ ५ ॥

शिलादेशमनुप्राप्य प्रपां कुर्यात्तु शिल्पिभिः ।
विंशद्धस्तस (क ?) विस्तारमुत्तमं मण्डपं भवेत् ॥ ६ ॥

मध्यमे (मं ?) द्वादशं हस्तं दशहस्तं कनीयसम् ।
षट्त्रिंशत्स्तम्भसंयुक्तमुत्तमं मण्डपं भवेत् ॥ ७ ॥

---

2. a) ASv. om. विन्ध्यश्च
   b) ASv. om.
   c) M. मन्थरो for मन्दरो

4. c) MMyT. ग्राह्या for ग्राह्य

7. b) My. °कम् for °सम्

षोडशस्तम्भसंयुक्तं मध्यमं मण्डपं भवेत् ।
अथवान्यप्रकारेण मण्टपं कारयेत्ततः ॥ ८ ॥

दशहस्तं तु विप्राणां नवहस्तं नृपस्य तु ।
अष्टहस्तं तु वैश्यानां शूद्राणां सप्तहस्तकम् ॥ ९ ॥

पङ्क्तित्रयसमायुक्तं पङ्क्तिमानमथोच्छ्रयः (?) ।
चतुष्करसमायुक्तं चतुरश्रं समन्ततः ॥ १० ॥

चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
वितानैः परितश्छन्नैर्दिग्ध्वजैश्च (जांश्च ?) प्रलम्बयेत् ॥ ११ ॥

पूर्वायां नीलवर्णं तु रक्तमाग्नेयगोचरे ।
कृष्णवर्णं तु याम्यायां हेमाभं नैर्ऋते तथा ॥ १२ ॥

वारुणे श्वेतवर्णं तु वायव्ये धूम्रवर्णकम् ।
भद्रं (?) चैव तु सौम्यायामैशान्यां चित्रवर्णकम् ॥ १३ ॥

दीपैः पुष्पैः फलैः सार्धं मन्त्रैरष्टम (?) मङ्गलैः ।
पुष्पमाल्यैरलङ्कृत्य मुक्तादामैश्च (?) भूषयेत् ॥ १४ ॥

स्तम्भानि वेष्टयेत्तत्र विमलैरंशुकैर्बहिः ।
गोमयालेपनं कृत्वा पुण्याहं वाचयेत्ततः ॥ १५ ॥

---

8. b) T. उत्तमं for मध्यमं

10. b) ASv. मथेच्छ्रयम् for °मथोच्छ्रयः
c) ASv. om. र

11. d) ASv. °लद्व° M. °लम्बि for °लम्ब°

13. b) ASv. सूत्र° for धूम्र°

14. c) T. वृक्ष° for पुष्पं

15. b) ASv. om. °रंश°

अङ्कुरान् वापयेत् पूर्वदिवसे तु यथाक्रमम् ।
मण्डपस्य च मध्ये तु कुण्डं कुर्याच्चत (च चतुर ?) स्रकम् ॥ १६ ॥

वृत्तं वा स्थण्डिलं वापि कारयेच्छिल्पवित्तमः ।
पर्यग्निकरणं कृत्वा होमकर्म समाचरेत् ॥ १७ ॥

अग्निकार्योक्तविधिना पुरस्तात्तन्त्रमाचरेत् ।
सर्पिषा च समिद्भिश्च विष्णुदैवत्यया तया (ऋचा ?) ॥ १८ ॥

अष्टोत्तरशतं कृ (हु ?) त्वा संपाताज्यं तु संग्रहेत् ।
चरुणा नरसूक्तेन जुहुयात् षोडशाहुतीः ॥ १९ ॥

इन्द्रादिलोकपालेभ्यो भुवनेभ्यस्तथैव च ।
पर्वतेभ्यः समुद्रेभ्य आदित्येभ्यस्तथैव च ॥ २० ॥

वसुभ्यश्चामरेभ्यश्च ऋषिभ्यस्तदनन्तरम् ।
वेदेभ्यः सर्वशास्त्रेभ्यः पुराणेभ्यस्तथैव च ॥ २१ ॥

पातालेभ्यश्च दिग्भ्यश्च नागेभ्यस्तदनन्तरम् ।
गणेभ्यः सर्वभूतेभ्यो नक्षत्रेभ्यस्तथैव च ॥ २२ ॥

ग्रहेभ्यश्चैव सर्वेभ्यः स्वाहान्तं जुहुयात् पृथक् ।
तिलाज्यमिश्रचरुणा जुहुयात्तेभ्य एव च ॥ २३ ॥

संपाताज्यं गृहीत्वाथ पूर्णाहुतिमथाचरेत् ।
जाग्रदेव नयेद्रात्रिं प्रभाते रविमण्डले ॥ २४ ॥

---

16. d) MT. कुण्डलं for कुण्डं; M. °तुश्रमम् for °तस्रकम्
17. b) My. वित्तम for वित्तमः
 c) ASv. पश्यन्ति for पर्यग्नि°
19. a) MMy. अष्टोत्तरं for अष्टोत्तर°
 c) T. om. र
24. c) AMS¹T. °देवं for °देव

आचार्यः स्नानपूर्वं तु वीक्षयेद्वसुधां ततः ।
वारुणी चैव माहेन्द्री आग्नेयी वायवी तथा ॥ २५ ॥

चतस्रस्तु शिलाः प्रोक्तास्तासां लक्षणमुच्यते ।
या पुष्पवनसंकीर्णा जलाशयसमावृता ॥ २६ ॥

सात्त्विकी वारुणी (सा क्षितिः ?) प्रोक्ता शिला या तत्र वारुणी
यस्यां चोत्तरतस्तोयं व्रीहिक्षेत्रं तु दक्षिणे ॥ २७ ॥

तित्तिर्यश्च कपोताश्च गृध्राश्चैव वसाशनाः ।
भ्रमराश्च वराहाश्च दृश्यन्ते पत्र (यत्र ?) सन्ततम् ॥ २८ ॥

तोयमन्तर्गतं स्वल्पं तातमाग्नेः (आग्नेयी सा ?) प्रकीर्तिता ।
पक्षिसेवाथवाकीर्णे मण्डूकजलभूषिते (?) ॥ २९ ॥

सृगाला यत्र दृश्यन्ते तथैव मृगतृष्णिका ।
तृणोदकविहीना च शर्करोषरसंयुता ॥ ३० ॥

वायवी सा क्षितिः प्रोक्ता शिलास्तत्र तु वर्जयेत् ।
नदीतीरे ह्रदनदे लवणोदपरिप्लुते ॥ ३१ ॥

ग्राममध्ये श्मशाने च तथा चैव चतुष्पथे ।
अमेध्यभूमौ वल्मीके ऊषरे शवदूषिते ॥ ३२ ॥

वायुसूर्याग्निदग्धे च ता (न ?) ग्राह्यास्तु शिलास्सदा ।
वर्जिताभिः शिलाभिर्यः प्रतिमा (मां ?) लोभमोहितः ॥ ३३ ॥

---

28. b) S[1]T. वसातु नः for वशासनाः

29. a) M. °तस्वन्तं for तं स्वल्पं
 b) M. om. तात; M. मग्निः for माग्नेः

30. a) S[1]. वर्तन्ते for दृश्यन्ते

श्री
56220

कुर्याद्वा कारयेन्मोहात् तस्य स्यादाभिचारिकम् ।
आलयार्थं तु निर्गच्छेदाचार्यः शिल्पिभिः सह ॥ ३४ ॥

ब्राह्मणान् भोजयित्वा तु तैः कृतस्वस्तिवाचनः ।
आयःकुठादि (रान् ?) संगृह्य प्राङ्मुखो वाप्युदङ्मुखः ॥ ३५ ॥

भेदयित्वास्त्रमन्त्रेणारोपयेच्छकटादिषु ।
ब्राह्मणैर्वेदविद्भिश्च आनयेत् पूर्वमण्टपे ॥ ३६ ॥

गर्भगेहादिनिर्माण (णं ?) विस्ता(स्त ?) रं कथयाम्यहम् ।
शृणुष्व पृथुराजेन्द्र ! यथा पूर्वं मया श्रुतम् ॥ ३७ ॥

चतुरश्रं तु वृत्तं वा त्रिकोणमथवापि वा ।
आयतं दशभिर्हस्तैः विस्तीर्णं पञ्चभिर्दृढम् ॥ ३८ ॥

मानाङ्गुलप्रमाणेन कारयेद्गर्भमन्दिरम् ।
उपानदादिपञ्चाङ्गमधिष्ठानं प्रकल्पयेत् ॥ ३९ ॥

पञ्चहस्ताच्चतुर्हस्ताद्द्विहस्ताद्वा यथेच्छया ।
दण्डस्तदर्धं पादोनः तस्योत्सेधस्समीरितः ॥ ४० ॥

अधिष्ठाने कृते तस्मिन् स्तम्भमन्तर्विवर्ज(र्ध ?)येत् ।
एकद्वित्रिचतुर्हस्तैः क्रमशो वर्धिता भवेत् ॥ ४१ ॥

---

36. a) MSv. मन्त्रेण for मन्त्रेणा°
 b) ASv. शोद्य° for रोप°
 d) AMySv. सर्वं° for पूर्वं°

38. c) ASvT. om. आय

39. c) AMySv. om. ङ्गं

40. c) AMSv. om. न

41. a) AMMyS²Sv. तु for कृ°

मन्दिरस्य महानासासमः सालसमुच्छ्रयः ।
ग्रीवाप्रतुलितो वा स्यात् प्रतिसम्मित एव वा ॥ ४२ ॥

विच्छिन्नावन्तरेषां तु सालानामुच्छ्रयं विदुः ।
उपपीठसमायुक्तः सालो दण्डस्त्रिरुच्यते ॥ ४३ ॥

एतद्गर्भगृहं प्रोक्तं पुरतश्चार्धमण्डपः ।
कल्पनीयः प्रयत्नेन तदग्रश्चार्धमण्डपः ॥ ४४ ॥

पञ्चहस्तं चतुर्हस्तं कारयेदर्धमण्टपम् ।
हीनेऽर्धे मण्टपे धाम्नः पार्श्वाभ्यां निर्गमस्ततः ॥ ४५ ॥

अग्रतः पृष्ठतो वापि भवेतां पार्श्ववर्त्मनि (नी ?) ।
समुच्छ्रितं प्रतिसममधिकं वा यथेच्छया ॥ ४६ ॥

तावद्विस्तारसंयुक्ता द्विगुणं चोभयं भवेत् ।
सोपानं स्यात्समुद्दिष्ट अन्तश्चान्तश्च निर्गमः ॥ ४७ ॥

सोपानपङ्क्तयः कार्याः षडङ्गुलसमुच्छ्रयाः ।
चण्डं चैव प्रचण्डं च कल्पयेत् द्वारपार्श्वयोः ॥ ४८ ॥

तदग्रे मण्डपं कुर्यात् नृत्तार्थं नृपसत्तम ।
षट्त्रिंशत्स्तम्भसंयुक्तं षोडशस्तम्भमेव च ॥ ४९ ॥

समुच्छ्रितं प्रतिसममधिकं वा यथेच्छया ।
एकद्वित्रिचतुःपञ्चहस्तैर्नृत्तार्धमण्डपौ ॥ ५० ॥

---

42. a) AS²SvT. °नस्य My. नास्या for नासा°

43. c) AS²SvT. श्रिया° for ग्रीवा°

47. a) AMMyS²SvT. युक्ताश्च for संयुक्ता
d) AS¹S²Sv. °स्तु for °श्च MyT. om. श्च

49. d) S¹. संयुतम् for मेव च

सान्तरालं समुद्दिष्टं पार्श्वाभ्यामथ निर्गमः ।
सोपानपङ्क्तयः कार्याः पार्श्वयोरुभयोरपि ॥ ५१ ॥

तावद्विस्तारयुक्ताश्च द्विगुणं चोभयं भवेत् ।
सोपानपङ्क्तयो हस्तिहस्तात् कुर्यात् स्थवीयसः (?) ॥ ५२ ॥

यद्वा रथाङ्गं कुर्वीत सिंहव्यालमथापि वा ।
अन्तरावरणं कुर्यात् नृत्तमण्डपमध्यतः ॥ ५३ ॥

द्वारं वातायनं वापि भित्तिबन्धं न जातु हि ।
कुलक्षयोऽक्षिनाशश्च व्याधिर्वा भित्तिबन्धने ॥ ५४ ॥

यद्वार्धमण्डपादर्धरु (र्धं त्रि ?) पादं पादमेव वा ।
तत्तुल्यं वान्तरालं तु अन्तरालायतं भवेत् ॥ ५५ ॥

विस्तारं ह्रासयेत्तत्र अन्तरालस्य पार्श्वयोः ।
हस्तं तालं तदर्धं वा ला (ह्रा ?) सयेत् पार्श्वयोरपि ॥ ५६ ॥

युग्मस्तम्भसमोपेतं तथा बद्धमथापि वा ।
लाङ्गलं वा प्रकुर्वीत उभयं वा विना भवेत् ॥ ५७ ॥

---

51. b) M. भ्यां तु °वि for °भ्यामथ
    c) M. पद्मसतयः for पङ्क्तयः कार्याः

52. b) M. °णाश्चो° for °णं चो°

54. c) T. °नाशं तु for °नाशश्च
    d) AMMySv. add नि before बन्धन

55. a) $S^1S^2$. दू° for द°
    b) $S^1S^2$. रू° for रु°
    d) ASvT. दन्त° for अन्त°

56. d) AT. प्रा for ला ; Sv. om. लासये ; Sv. प्रास° for पार्श्वं

57. b) $S^1$. बन्ध° for बद्ध°
    c) M. om. प्रकुर्वीत

चतुरश्रं वायतं वा चतुर्द्वारं चतुर्दिशम् ।
वातायनं वा युग्मं तु न कुर्याद्भित्तिबन्धनम् ॥ ५८ ॥

अन्तरावरणस्यान्तः बहिर्वोभयपार्श्वयोः ।
कल्पयेच्छिल्पशास्त्रज्ञो गतयः कोणभूमिषु ॥ ५९ ॥

हस्तबन्धं तदूर्ध्वे तु अग्रे वैकं प्रकल्पयेत् ।
प्राकारेषु च सर्वेषु मण्टपं ह्युत्तमं भवेत् ॥ ६० ॥

द्वाविंशतिधनुर्मानं मण्टपं चोत्तमं भवेत ।
अष्टादशधनुर्मानं मण्टपं मध्यमं भवेत् ॥ ६१ ॥

अधमं द्वादशधनुर्मण्टपं परिचक्षते ।
पूर्वोक्तसप्तसंख्यं वा कुर्यादास्थानमण्डपम् ॥ ६२ ॥

उत्तमं दशभिर्हस्तैर्मध्यमं चाष्टहस्तकैः ।
षड्ढस्तमधमं विद्यात् क्षुद्र (द्रं ?) हस्तं त्रिधा (स्तत्रयं?) भवेत् ॥ ६३ ॥

दक्षिणस्योत्तरा पूर्वे भित्तयः स्युः प्रकल्पिताः ।
स्तम्भाष्टकयुतं तत्र सोपानं परिकल्पयेत् ॥ ६४ ॥

दीर्घशालामतः कुर्यान्मण्टपं चैव कल्पयेत् ।
मण्टप (पाः ?) प्र (प्राङ् ?) मुखाः सर्वे सर्वावरणसंस्थिताः ॥ ६५ ॥

---

58. d) T. °यष्टि° for भित्ति°

59. b) T. तयोरु° for बहिर्वो°
a) M. शो for को°

60. a) AS²Sv. बद्धं for बन्धं
b) M. चै° for वै°

63. d) M. यथायथम् for त्रिधा भवेत्

64. a) AMMyS²SvT. पृष्ठे for पूर्वे

65. c) AS¹S²T. मण्डपाः for मण्टप°

आस्थानमण्टपान् सर्वान् प्रकुर्यात् सर्वतोमुखान् ।
कवाटयुग्मं संस्थाप्य द्वारे द्वारे दृढं यथा ॥ ६६ ॥

लोहजं दारुजं वापि विचित्रं तुरगादिभिः ।
शाखाचतुष्कं कुर्वीत तथैव शिलयापि वा ॥ ६७ ॥

जयश्च विजयश्चोभौ कर्तव्यौ तस्य गोपुरे ।
दिक्षु धातृविधातारौ ततो भद्रसुभद्रकौ ॥ ६८ ॥

संभवप्रभवौ स्यातां सुशोभनसुभद्रकौ ।
जघन्यावरणद्वारे प्राच्यादौ कुमुदादयः ॥ ६९ ॥

कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शंकुकर्णः सर्पनेत्रः सुमुखः सुप्रतिष्ठितः ॥ ७० ॥

अष्टौ द्वौ द्वौ प्रतिद्वारं कल्पनीया यथाविधि ।
विष्णुपारिषदाः सर्वे सेनाभिः कोटिभिर्वृताः ॥ ७१ ॥

दण्डहस्ता विरूपाक्षाः करण्डमकुटान्विताः ।
फणिकङ्कणमालाढ्या भ्रुकुटीकुटिलेक्षणाः ॥ ७२ ॥

व्यत्यस्तहस्तचरणा रक्षन्ति द्वारमाश्रिताः ।
अन्तर्द्वारस्य पूर्वस्य (स्यां ?) द्वारपत्रे (रि पद्म ?) गदाधरौ ॥ ७३ ॥

खड्गशंखधरौ द्वारि दक्षिणस्यां प्रकल्पयेत् ।
प्राचीत्यादिमहादिक्षु मर्यादासालगोपुरौ ॥ ७४ ॥

दुर्जयप्रबलौ कार्यौ विश्वभावनपुष्करौ ।
कृतान्तौ यमसुर (कृतान्तासुरवि ?) ध्वंसौ कुबेराक्षकुबेरकौ ॥ ७५ ॥

67. a) T. ताम्र° for दारु°

68. a) M. reads 69 ab after 67.

74. d) MS[1]T. मध्या for मर्या°

एवमेवेष्यतेऽन्येषां चतुर्दिक्षु च गोपुरम् ।
सोमईशानयोर्मध्ये यागशालां प्रकल्पयेत् ॥ ७६ ॥

अथवा ईशभागे च याम्ये वा चोत्तरेऽपि वा ।
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ॥ ७७ ॥

पाकगेहं हविर्दाने (र्वाहे?) वायुस्थानमथापि वा ।
तृतीयावरणेष्वेव (वापि?) देशे योग्यावकाशके ॥ ७८ ॥

मज्जनाम्भोगृहं याम्ये ताम्बूलं नैर्ऋते तथा ।
बहिरावरणे कुर्यादाग्नेये धान्यसंग्रहम् ॥ ७९ ॥

अवघातगृहं याम्ये गोशाला स्यादुमापतौ ।
वारुणे वाससां स्थानं मारुते पुष्पमण्टपम् ॥ ८० ॥

तृतीयावरणस्थाने छत्रादीनां विभावसोः ।
इन्द्रेशानान्तरे वापि मध्ये वाग्निसुरेशयोः ॥ ८१ ॥

यमाग्निमध्ये वा कुर्यादुत्सवे यागमण्टपम् ।
शिबिकादिस्थितिश्चेन्द्रे पानीयं वारुणे भवेत् ॥ ८२ ॥

उत्सवे देवयजनं सोमेशानान्तरे भवेत ।
वारुणे वा भवेत्सौम्ये कूपः सर्वदिशं भवेत् ॥ ८३ ॥

---

78. a) M. °र्धानेन for °र्दाने

79. a) A. ग्र° for गृ°
aa) S¹. om.

80. a) ASv. om. अव°

81. d) S¹. शा for वा

83. cd) T. om.

यथोक्तावरणाभावे विद्यमाने कचिद्भवेत् ।
अष्टदिक्षु यथायोगं तटाकं कारयेन्महत् ॥ ८४ ॥

प्राकाराणां च सर्वेषां बहिःस्यात् (स्था?) दीर्घिका भवेत् ।
उद्यानं पुष्पवाटीं च परितोऽथ प्रकल्पयेत् ॥ ८५ ॥

यतीनामितरेषां च मठः कार्यो बहिर्भवेत् ।
नृत्तार्थमण्डपस्याग्रे गोपुरं परिकल्पयेत् ॥ ८६ ॥

तत्पार्श्वे बहुधा कूटं कल्पयेच्छिल्पवित्तमः ।
प्रधानबेराभिमुखः कल्पनीयो विहङ्गराट् ॥ ८७ ॥

सोमेशयोरन्तराले सेनानाथं प्रकल्पयेत् ।
मातॄणां सप्तकेशाने (?) लक्ष्मीर्नैर्ऋतभागके ॥ ८८ ॥

वायुस्थाने तमथवा याम्ये वा दक्षिणेऽपि वा ।
भूदेवीमण्टपं कुर्यात्तत्पार्श्वे शेषमण्टपम् ॥ ८९ ॥

सूर्याचन्द्रमसोः स्थाने संस्थाप्य पुरुषाच्युतौ ।
एवं तु मण्टपं कल्प्य अथवा शक्त्यपेक्षया ॥ ९० ॥

चक्री मुसलवान् शंखी खड्गी चैव गदाधरः ।
शार्ङ्गी पद्मी तथा वज्री पूज्या दिव्यास्त्रधारिणः ॥ ९१ ॥

प्रथमावरणे येषां स्थानेऽन्ये समुदीरिताः ।
द्वितीयावरणे ज्ञेयः परिवारो यथोक्तवत् ॥ ९२ ॥

उपेन्द्रः प्राकृतः पुण्यः पुष्करो विश्वभावनः ।
असुरघ्नः कृतान्तश्च भूतनाथोऽष्टमः स्मृतः ॥ ९३ ॥

---

**84.** c) ASv. om. यथा

**87.** b) M. शिल्पि° for शिल्प

**92.** a) S¹. °न्येषां for येषां

तृतीयावरणे ज्ञेयमुपद्वारं प्रकल्पयेत् ।
विश्वेशो विश्वकृद्विश्वो विश्वात्मा विश्वलोचनः ॥ ९४ ॥

विश्वपादो विश्वभुजस्तथा वै विश्वकर्मकृत् ।
तृतीयावरणद्वारे कल्पयेच्छिल्पवित्तमः ॥ ९५ ॥

अष्टादशगणान् वक्ष्ये यथा पूर्वं मया श्रुतम् ।
आदित्या वसवो रुद्राः साध्याश्च मरुतस्तथा ॥ ९६ ॥

विश्वे देवाश्च पितरो मातरः गृहदेवताः ।
अङ्गिराश्चाश्विनौ देवौ तथा स्त्रीदेवतागणाः ॥ ९७ ॥

लोकेशो वास्तुदेवाश्च नक्षत्राणि च पार्षदाः ।
तत्त्वानां पतयश्चैव उत्तमाः परिकीर्तिताः ॥ ९८ ॥

सिद्धाश्च ऋषयो नागा असुरा राक्षसा अपि ।
यक्षविद्याधराश्चैव सौरभेयाश्च गुह्यकाः ॥ ९९ ॥

गन्धर्वाप्सरसश्चैव प्रजानां पतयस्तथा ।
मर्त्याश्चैवाध (ष्ट ?) रोहिण्यो गणास्ते मध्यमाः स्मृताः ॥ १०० ॥

भूताः प्रेताः पिशाचाश्च कूश्माण्डप्रमथा अपि ।
स्कन्दा बालग्रहाश्चैव वैतलाश्चैव भैरवाः ॥ १०१ ॥

किन्नराश्चैव वेताला अपस्मारास्तथैव च ।
योगिन्यश्चैव डाकिन्यः शाकिन्यश्चैव शारिकाः ॥ १०२ ॥

---

94. cd) T. om.

98. c) My. om. क्षा T. om. क्षानां AS[1]S[2]Sv. क्षाणां for त्वानां

101. b) T. om; M. °ण्डा° for °ण्ड°; My. °थमा° for °मथा°
d) T. om. त्रैतलाश्चैव

102. b) AMyS[2]Sv. रस्तथा यय: for रास्तथैव च
d) ASv. जाकि S[1]S[2]. शौकि for शाकि

मोहिन्यश्चैव सर्वेषु जघन्या: परिकीर्तिता: ।
धाताचार्यमणश्चैव (?) मित्रश्च वरुणस्तथा ॥ १०३ ॥

भगो विवस्वानिन्द्रश्च पूषा पर्जन्य एव च ।
त्वष्टा विष्णुरिति प्रोक्ता द्वादशैतेऽदिते: सुता: ॥ १०४ ॥

धरो ध्रुवश्च सोमश्च आपश्चैवानिलोऽनल: ।
प्रत्यूषश्च प्रभातश्च वासव: शान्तवर्चस: ॥ १०५ ॥

मृगव्याधश्च शर्वश्च ऋषभध्वजपाक्यवान् ।
अहिर्बुध्न्य: पिनाकी च उमापति: (?) तथैव च ॥ १०६ ॥

स्थाणुर्भव: कपाली च रुद्रास्त्वेकादश स्मृता: ।
त्रिनेत्रा रुद्रसदृशा जटामण्डलधारिण: ॥ १०७ ॥

आभवो विभवश्चैव उद्भव: संभवस्तथा ।
निवहोऽनुवहश्चैव व्यवहारस्तथैव च ॥ १०८ ॥

सप्तैते मरुत: प्रोक्ता: सप्त सप्तेति भेदत: ।
अग्नी रविश्च रुद्रश्च अग्निरापस्तथैव च ॥ १०९ ॥

---

105. ab) T. om.

106. a) T. om.

b) T. om; S. वात्य M. वार्त° for पाक्य°

cd) T. om.

107. ab) T. om.

109. a) AMMySv. मन्त्र for मरु°

c) MS[1]S[2]. अग्नेलावि ASv. अवलोपि My. अ-लापि for अग्नीरवि°; T. om. अग्नीर

गणानां चैव पञ्चाशत् वक्ष्यामि नृपसत्तम ।
उत्कटः प्रकटश्चैव उन्मुखो विमुखस्तथा ॥ १२४ ॥

अश्वग्रीवोऽश्ववदनः अश्वजिह्वस्तथैव च ।
हस्तिवक्त्रश्च कुमुदः हस्तिपादस्तु केशवः ॥ १२५ ॥

वामनो नरकश्चैव नरो मर्दन एव च ।
मन्ददृष्टिः कदु(दृ?)ष्टिश्च तथा कन्दुकलोचनः ॥ १२६ ॥

पटहाक्षो विशालाक्षो क्षामकः क्षमकस्तथा ।
पाण्डुश्च पाण्डुपृष्ठश्च दुर्दिनः सुदिनस्तथा ॥ १२७ ॥

वामदेवो महादेवो महाग्निर्मधुसूदनः ।
कनकः कालकश्चैव भावनो भवनस्तथा ॥ १२८ ॥

भानुमान् भानुवेगश्च भास्करश्चाप्यभास्करः ।
वीरसेनो विसेनश्च विष्वक्सेनो विसारणः ॥ १२९ ॥

---

124. b) T. om.
cd) T. om प्रकट–to °स्तथा

125. a) M° शीर्षो for °ग्रीवो
d) AMSv. हस्त for हस्ति°

126. c) AS[1]Sv. तद्° for मन्द° M. चकम्र My. च कन्तु for कदुष्टि°–

127. b) T. om.

128. b) T. om. मधुसूदनः
c) T. को for का
d) T. om. My. °वान्तो for °वनो

129. ab) MT. om.
c) T. om.
d) M. विष्णु for विष्वक्; T. om.

विस्तारो विस्तरश्चैव विदण्डी दण्ड एव च ।
कामदः कामुकश्चापि कामभृत्कामनाशनः ॥ १३० ॥

पञ्चाशच्च गणा ह्येते नानावर्णवपुर्धराः ।
अच्युताराधनपरास्सान्तरालोर्ध्वपुण्ड्रकाः ॥ १३१ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां शिलासंग्रहणविधानो नाम
तृतीयोऽध्यायः ॥

---

130. b) AMySv. °दण्डा for °दण्डी
c) M. °मन्दः for °मदः
d) T. om.

131. b) T. om.
c) T. om.
d) T. om; M. स्थावराश्चो for स्सान्तरालो.

# चतुर्थोऽध्यायः

## [ विमानलक्षणम् ]

* * *

विमानाख्यमथो वक्ष्ये शृणुष्व नृपसत्तम ।
प्रासादं (?) पञ्चधा भेदं (भिन्नं?) नागरं द्राविडं तथा ॥ १ ॥

वृत्तं वृत्तायतं (?) चैव वेसरं च प्रकीर्तिता: (तम् ?) ।
सर्वदिङ्नासिकाकारं कूटशालासमायुतम् ॥ २ ॥

आद्ये च चतुरश्रं तु अग्रे वृत्तायतं यदि (?) ।
नागरं तत्समाख्यातं द्राविडं चाधुनोच्यते ॥ ३ ॥

पादादिस्थूल(पि ?)र्यन्तं चतुरश्रं प्रकल्पयेत् ।
षडश्रमथवा कुर्यादुक्तं च द्राविडं भवेत् ॥ ४ ॥

पादादि च शिरोन्तं तु वृत्तं वृत्तायतं तु वा ।
वेसराख्यमिति प्रोक्तं; मन्दिरं कथ्यतेऽधुना ॥ ५ ॥

कूटशालासमायुक्तं सर्वदिङ्नासिकायुतम् ।
कर्णोर्ध्वपरिविस्तीर्णं (?) पर्वतं मन्दिरं स्मृतम् ॥ ६ ॥

पादप्रभृतिस्थूप्यन्त (?) मष्टाश्रं द्वादशाश्रकम् ।
यत्कूटशालारहितं प (स ?) र्वतो निग (र्ग ?) म: (?) स्मृत: ॥ ७ ॥

मूर्धेष्टकाविधिं राजन् शृणु वक्ष्यामि सांप्रतम् ।
आलयस्य पुर: पूर्वं पूर्ववत् कारयेत् क्रमात (प्रपाम् ?) ॥ ८ ॥

---

2. c) ASv. om. दिङ्

5. b) ASv. न for तु

6 c) ASv. कण्ठोर्ध्वोपरि° M. कण्ठोर्ध्वपपि° for कर्णोर्ध्वपरि°

7. d) AMySv. तत: for स्मृत:

वेदिकां कारयेन्मध्ये एकद्वित्रिसुहस्तकम् ।
सर्वालङ्कारसंयुक्तं तोरणैरुपशोभितम् ॥ ९ ॥

साधिताः पूर्वरात्रौ (ते?) च चत्वारः (तस्तः?) प्रथमेष्टकाः(?) ।
शिलादोषविमुक्ताश्च सुपक्वा मृण्मयास्तथा ॥ १० ॥

इष्टका च (नां?) प्रविस्तारं (रो?) द्वादशाष्टषडङ्गुलाः ।
उत्तमादिक्रमादेषां विस्तारात् द्विगुणायता (ताः?) ॥ ११ ॥

त्र्यशेन नहनं प्रोक्तं सुदृढीकृत्य यत्नतः ।
पञ्चगव्येन संप्रोक्ष्य परिस्तीर्य कुशैस्ततः ॥ १२ ॥

पुण्याहं वाचयित्वाथ प्रोक्षयेच्च कुशाम्बुभिः ।
कौतुकं बन्धयेत्तत्र मूलमन्त्रेण मन्त्रवित् ॥ १३ ॥

प्रत्येकं वस्त्रमाच्छाद्य स्थापयेत्तु तदग्रतः ।
साधयेत् कलशान् पश्चात् सवस्त्रान् सापिधानकान् ॥ १४ ॥

पञ्चरत्नं तु निक्षिप्य मध्ये कुम्भं च विन्यसेत् ।
गन्धोदकेन संपूर्णं कुशैरश्वत्थपल्लवैः ॥ १५ ॥

---

9. d) AMySv. °नृप for °रुप°

10. c) AMMyS²SvT.° स्तु for °श्च
    d) ASv. om. सु

11. a) M. श्च for च
    T. °स्तारा for °स्तारं
    c) MS¹. देषा for देषां

12. a) ASv. त्र्य......प्रोक्तं
    b) ASv. सूत्रं धिक्कृत्य for सुदृढीकृत्य

13. a) ASv. पि S¹. च for थ
    b) AS¹S²Sv. तथा° for कुशा°

14. b) My. ग्रहे T.°ग्रके (हे) for °ग्रतः

मूलमन्त्रेण कुम्भं तु साधयेत् साधकोत्तमः ।
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ॥ १६ ॥

शङ्कुकर्णः सर्पनेत्रः सुमुखः सुप्रतिष्ठितः ।
परितः कलशानष्टौ पूजयेद्देशिकोत्तमः ॥ १७ ॥

वाराहं (हो ?) नारसिंहं च (हश्च ?) श्रीधरो हयशीर्षकः ।
जामदग्न्यश्च रामश्च वामनो वासुदेवकः ॥ १८ ॥

एवं विघ्नेश्वरान् प्रोक्तं (क्तान् ?) क्रमात् कुम्भे च (षु ?) पूजयेत् ।
सकूर्चं साधयेद्विद्वान् सर्वालङ्कारसंस्कृतम् ॥ १९ ॥

आरभेत्तु (त ?) ततो होमं वेदिपार्श्वे तु देशिकः ।
दिक्ष्वष्टासु तथा धाम्नः शान्तिहोमं प्रवर्तयेत् ॥ २० ॥

वेदपारायणैः सार्धं पठद्भिः शाकुनं प्रति ? ।
ऋग्वेदं पूर्वदिग्भागे यजुर्वेदं तु दक्षिणे ॥ २१ ॥

पश्चिमे सामवेदं तु अथर्वं चोत्तरे तथा ।
जुहुयात् समिधाज्येन चरुणा पयसा ततः ॥ २२ ॥

---

16. a) M. कुम्भस्तु for कुम्भं तु

18. b) AS²Sv. °कम् for °कः
c) AS¹S²SvMy. °गन्यं च रामं च for गन्यश्च रामश्च

19. a) MMyS¹S²T. °श्वराः A. °श्वरात् for °श्वरान्
MMyS¹S²T. प्रोक्ताः for प्रोक्तं
b) AMyS²Sv पूर° for पूज°
d) S¹S². संस्तु° for संस्कृ°

20. a) AMyS¹S²SvT. आरम्भे तु for आरभेत्तु
d) S². °देशाज्ञा for °होमं

21. a) S⁴ देव° for वेद°
b) A. शात्र नं S². शात्रकः MyS¹Sv. शाक्रनं for शाकुनं

अष्टोत्तरशतं हुत्वा समिधाज्यैः पृथक् पृथक् ।
संपाताज्यं गृहीत्वा तु पूर्णाहुतिमथाचरेत् ॥ २३ ॥

रात्रिशेषं व्यतिक्रम्य कृतस्नानः कृताह्निकः ।
पूर्ववत पूजयेत् कुम्भान् गन्धपुष्पादिना ततः ॥ २४ ॥

प्रदीपयेत् धूपदीपैरर्चयेद्देशिकोत्तमः ।
बलिदान प्रकुर्वीत यथावदनुपूर्वशः ॥ २५ ॥

आचार्यस्तक्षकैः सार्धं यजमानसमन्वितः ।
धाम प्रदक्षिणं कुर्याद्वेदघोषसमन्वितम् ॥ २६ ॥

आरोपयेयुस्ताः (चताः?) सर्वा विमानस्योपरिस्थले ।
पुण्याहं वाचयेत्तत्र ऋत्विग्भिः सह देशिकः ॥ २७ ॥

मूर्धेष्टकासमाधाता प्रमुखः सुसमाहितः ।
ध्यायन् नारायणं देवं हृत्पद्मे प्रणवं यजेत् ॥ २८ ॥

आदध्यादिष्टकाः सर्वाः सर्वा (र्वे ?) दिक्कं समाश्रिताः ।
स्त्रीशूद्राश्चानुलोमाश्च तूष्णीमाधानमाचरेत् ॥ २९ ॥

पापरोगिमतिभ्रष्टपतितान् प्रतिलोमजान् ।
वर्जयेद्यत्नमास्थाय मध्ये मध्ये (मूर्धे ?)ष्टकाविधौ ॥ ३० ॥

प्रणमेद्दण्डवद्भूमौ यजमानो गुरुः (रुं ?) पुनः ।
वस्त्रैराभरणैर्दिव्यैः कुण्डलैरङ्गुलीयकैः ॥ ३१ ॥

26. d) My. °तः for °तम्

28. c) AMSv. ध्यायेत् for ध्यायन्

29. b) MT. दिक्ककर्म° for सर्वा दिक्क°
Sv. दिक्क for दिक्कं

30. c) AMMyS[1]S[2]Sv. आदाय for आस्थाय

तस्मै स गुरवे सर्वं प्रयच्छेदविशङ्कितः ।
रथकारं धनेनैव तोषयेद्धान्यवस्त्रकैः ॥ ३२ ॥

एवं संपूज्य विधिना राजराष्ट्रं विवर्धयेत ।
आयुःश्रीः सहसा ऽऽ(श्रियं समा ?) प्नोति नात्र कार्या विचारणा ॥ ३३ ॥

वक्ष्यामि स्थूपिकाकीलं शृणुष्वैकमनाधुना (?) ।
दारुजं लोहजं वापि कीलकं तदुदाहृतम् ॥ ३४ ॥

ऊर्ध्वमुष्टयङ्घ्रितुलितं विस्तारायामनिर्मितम् (?) ।
षोडशाङ्गुलमुच्छ्रायं परिणाहं दशाङ्गुलम् ॥ ३५ ॥

कदलीपुष्पसदृशं मनोहरदृढं यथा ।
युग्मं स्यात् स्थूपिकाकीलमपुनर्भवकांक्षिणः ॥ ३६ ॥

इतरेषामयुग्मं स्यात् स्थूपिकाकीलकल्पनम् ।
यावद्विंशति युग्मं स्यात् अयुग्मैकोनविंशतिः (?) ॥ ३७ ॥

स्थि (कृ ?) त्वैवं स्थूपिकाकीलमधिवासं प्रकल्पयेत् ।
मूर्धेष्टकाविधानं च तद्विधा (ना ?) नाधिवासनम् ॥ ३८ ॥

ब्राह्मणान् भोजयेत् पश्चात् यथा शक्त्यनुसारतः ।
प्रदोषे समनुप्राप्ते गर्तं कुर्यात्तु स्थूपिके (?) ॥ ३९ ॥

वृत्तं वा चतुरश्रं वा कारयेद्गर्तमुत्तमम् ।
पुण्याहं वाचयेत् गर्ते नवरत्नानि विन्यसेत् ॥ ४० ॥

33. a) M. दीपं for एवं
b) AMS²Sv. राजा for राज°

35. a) M. औध्वंभूम्यंध्रिवितं for ऊर्ध्वमुष्टयंध्रितुलितं

36. d) ASv. पुनर्भवकताक्षिणः

37 d) S¹. स्थूपिकाकीलकल्पनम्

पूर्वादिमध्यमान्तं च धातुबीज सलोहकम् ।
क्षिप्त्वा गर्भे ततः स्थूपिं प्राङ्मुखो मूलविद्यया ॥ ४१ ॥

आचार्यः स्थापयेत् स्थूपिं पञ्चाङ्गाकल्पभूषितः (?) ।
सुधया स्थूपिकागर्भं दृढीकुर्यादनन्तरम् ॥ ४२ ॥

ऋजुं स्थूपिं स्थापयेच्च वक्रा स्याद्बहुदोषदा ।
सौवर्णी राजती वापि स्थूपी दारी तथा (दारुमयी ?) तथा ॥ ४३ ॥

शिखाकुम्भं सुवर्णेन कारयेच्छिल्पवित्तमः ।
विमानानां समाख्यानं (नो ?) भेदश्च बहुधा स्मृतः ॥ ४४ ॥

मुखे मुखे सभावक्त्रं शिरस्तत्र त्रिणेत्रवत् ।
सौमुख्यं कर्तरीभूतं वृत्तवृत्तगृहान्वितम् ॥ ४५ ॥

मुखे तस्य महाघोणं विमानं चोभयोरपि ।
सिंहाकारमधस्ताच्च तदग्रे चतुरश्रकम् ॥ ४६ ॥

कर्णा एव (?) सुसूक्ष्मं च वृत्ताकारं तु वा भवेत ।
अग्रादिस्थूपिपर्यन्तमष्टाश्रकमथा(धो?) भवेत् ॥ ४७ ॥

सिंहनासामहानासाशुकनासासमन्विता ।
दिङ्नासा च महासिंहं परितः परिवेष्टयेत ॥ ४८ ॥

---

41. c) MSvT. स्थूपीं for स्थूपिं

43. a) S[1]. °यित्वा M. °येद्वै for येच्च
d) AMMyS[2]SvT· स्थूपि for स्थूपी
AMyS[2]Sv. दाश्र° MT. दारु for दारी

45. c) ASv. कर्तरि° for कर्तरी°

46. d) ASv. तद्रूदग्रे चतुश्रकम्

47. a) AMMyS[2]SvT. om. ए

48. d) AM· °वेष्टनम् Sv. °वेष्टितम् for °वेष्टयेत्

नानालङ्कारसंयुक्तं नानानाटकसयुतम् ।
विमानं पार्वतं प्रोक्तं विमानेषु सुपूजितम् ॥ ४९ ॥

नानाधिष्ठानसंयुक्तं नानाचित्रविचित्रितम् ।
वृत्तं वा चतुरश्रं वा बहुभिर्नासिकैः (भिः ?) श्रितम् ॥ ५० ॥

विमानं मन्दिरं प्रोक्तं नवाष्टैर्वा (र्वा ?) ल्नासिकम् ।
तदेव सौष्टवं कोष्ठमन्तरप्रान्तरैर्युतम् ॥ ५१ ॥

नानालङ्कारसंयुक्तं नानाचित्रविचित्रितम् ।
नानापुष्पसमायुक्तं चित्रयेत् मूर्तिभेदकम् ॥ ५२ ॥

सप्तदण्डायतोच्छ्रायमेतत कल्याणमिष्यते ।
शिखरेऽष्टमहानासी तत्स्थानेषु च पक्षिराट् ॥ ५३ ॥

तदेवाष्टाश्रकं वेदिकर्णकूटकरण्डकम् ।
चतुर्द्वारसमायुक्तं तोरणैः परिवेष्टितम् ॥ ५४ ॥

अन्तरालं भवेत्कर्णकूटशालासमन्वितम् ।
समग्रीवशिरोपेतं कूटगो (को ?) ष्ठमतिर्युतम् (समन्वितम् ?) ॥ ५५ ॥

तोरणैर्वेदिभद्राद्यैर्नानाचित्रैर्विचित्रितम् ।
चतुरश्रमधिष्ठानं षट्कोण च त्रिकोणकम् ॥ ५६ ॥

....च बहुभिन्नैश्च जालान्तरसमन्वितम् ।
स्थूपियुग्ममयुग्मं वा नासिकाल्पं त्रि (वि ?) दिक्षु च ॥ ५७ ॥

49. b) M. °नादक° for °नाटक°

50. b) AMyS¹S²SvT. भित्तिरलङ्कृतम् for चित्रविचित्रितम्

51. c) AS¹S²Sv. सौष्टयं for सौष्ठवं
d) ASv. अन्तनप्राक्तनै° M. अरदः प्रान्तकै° for अन्तरप्रान्तरै°

55. d) MS¹T. °मतीयु° for °मतिर्यु°

57. b) AMy. S¹S²SvT जला° for जाला°

वृत्तायतं सुवृत्तं वा नाम्नैवै (म्ना चै ?) तत् सुदर्शनम् ।
स्थूपीचतुष्कं नासायां षोडशाश्रयुतं पुनः ॥ ५८ ॥

आयताश्रं तथा वेदिरायतं चतुरश्रकम् ।
नानाधिष्ठानसंयुक्तं नानापादैरलङ्कृतम् ॥ ५९ ॥

द्व्यश्रं व्यक्तं (क्त ?) शिरोयुक्तमेतन्नाम्ना सुमङ्गलम् ।
पादोपरि भवेन्नामी स्थूपिभिर्बहुभिर्युतम् ॥ ६० ॥

तदेव वर्तुलं कर्णो कूटकर्णशिरस्तथा ।
चतुर्णासीसमायुक्तं वृत्ताकारमिदं भवेत् ॥ ६१ ॥

आयतं चतुरश्रं च अनेकतलसंयुतम् ।
स्वस्तिकारसमा (कारसं ?) युक्तं शालायां च मुखे मुखे ॥ ६२ ॥

आयताश्रं महाकारं शिरस्सर्वायताश्रकम् ।
नानान्तस्वरकस्तम्भवेदिकाजालतोरणम् (?) ॥ ६३ ॥

अनेकतलसंयुक्तं स्थूपित्रयसमन्वितम् ।
नानानाटकसंयुक्तं नानानाटचैर्विचित्रितम् ॥ ६४ ॥

नानालङ्कारसंयुक्तं नानापादैरलङ्कृतम् ।
नानामन्दिरमित्युक्तं विष्णोर्मन्दिरमुत्तमम् ॥ ६५ ॥

---

58. b) ASv. नाम्नैत.. My नाम्नैतत् S[1]S[2] नाम्ना एतत्
    c) S[1]. नासाया: for नासायां
59. b) MT. त्रियुतं for आयतं
63. a) M. °ग्रसभा° for °श्रंमहा°
    c) MT. नासान्त° for नानान्त°
64. d) AS[2]. नाटै° T. नादै° for नाटचै°

अष्टादशध(नू ?)च्छायमुत्तमं परिपठ्यते ।
अनेकतलसंयुक्तं अन्तःसोपानसंयुतम् ॥ ६६ ॥

पुरद्वारे कल्पनीयं गोपुरं तु यथाविधि ।
कोष्ठभद्रमिदं विद्यात् सर्वहर्म्येषु पूजितम् ॥ ६७ ॥

वर्तुलं जन्मनः स्थूपि आयतं चतुरश्रकम् ।
नानापुष्पसमायुक्तं नानाफलसमन्वितम् ॥ ६८ ॥

विहाराधारकैर्युक्तं पट्टिकाभिः परिष्कृतम् ।
इन्दुभद्रमिदं नाम्ना भवनेषु सुपूजितम् ॥ ६९ ॥

कर्णकूटं सुवृत्ताभं ग्रीवाकारं च कुण्डलम् ।
शतदिक् पृष्ठभागे तु मुखे महति नासिका (?) ॥ ७० ॥

शिखरेण समाविष्टं नाम्ना भवति भद्रकम् ।
एकपञ्चार्धसप्तार्धं त्रियार्धमथवापि वा (?) ॥ ७१ ॥

अग्रे स्थूलं पदे सूक्ष्मं वृत्तं वा चतुरश्रकम् ।
सौभद्रकमिदं प्रोक्तं वर्षस्थलविवर्जितम् ॥ ७२ ॥

चतुरश्रं चन्द्रशाला वृत्ताग्रं वा तथा शिरः ।
पद्माधिष्ठानसंयुक्तं पट्टिकामम्बुजाकृतिम् ॥ ७३ ॥

---

66. d) AMySv. त° for अन्तः

67. c) MyT. गोष्ठ° for कोष्ठ°

69. a) ASv. धीहीनां MyS¹S²T. विहाना°
c) AMyS²Sv नाना for नाम्ना

70. c) AMyS¹S²Sv.°धिक्° for °दिक्°
d) ASv. नासिक MyS¹S². नासिकम् for नासिका

71. d) My. श्रियर्थ M. श्रियर्थ T. त्रियर्धा for त्रियार्थ

72. a) ASv. पट्टे for पदे

पार्श्वयोर्द्वयनासां च पदमध्यमपार्श्वयोः ।
घटाकृतिसमाकारमेतत् त्रैलोक्यमिष्यते ॥ ७४ ॥

पृष्ठपार्श्वाग्रयुग्मं तु अग्रे स्थूलायतिर्भवेत् ।
पदे पदे चतुरश्रं वृत्ताकारमथापि वा ॥ ७५ ॥

नव त्रयोदशा दीर्घमूलमध्याग्रकूटकम् ।
नाम्नैतत् सूर्यकान्तं स्यात् मध्ये भद्रमिदं स्मृतम् ॥ ७६ ॥

नासिकाबहुसंयुक्तं शिरश्शाला मुखे मुखे ।
द्विचन्द्रशालकं पृष्ठे एतन्नाम महेन्द्रकम् ॥ ७७ ॥

मण्डूकपदसंयुक्तं एकद्वित्रिसदण्डकम् ।
नासा (ना ?) नासासमायुक्तं मध्ये मध्ये त्रिकूटकम् ॥ ७८ ॥

अन्त्ये चान्त्ये तथा घोणा मुखे पद्मसमन्वितम् ।
वृत्त वा चतुरश्रं वा षट्कोणमथवापि वा ॥ ७९ ॥

वृक्षं वृत्तं च विद्रं च अष्टाभिश्च प्रकोष्ठकैः ।
मुखे मुखे सभावृत्त वृत्तगर्भगृहान्वितम् ॥ ८० ॥

---

74. a) AMMyS²SvT. नासा तु for नासां च
    b) AMyS¹Sv. पट for पद

76. d) S¹. इति for इदं

78. b) MT. एकं चित्र° for एकद्वित्रि°

79. a) ASv. अत्ये चात्ये S¹. अन्ये अन्ये for अन्त्ये चान्त्ये
    d) ASv. वामथापि for °मथवापि

80. a) M. वृत्तं च भदं च
    b) MMy. om.
    cd) MMy. om.

अध्वतीरे चतुष्कोणे मङ्गलाकारप (म ?) ण्डितम् ।
एतत्तु विमलं धाम त्रितयं विमलाकृतिः ॥ ८१ ॥

विंश (शे ?) त्रयोदशांशं वा अष्टांशं वा दशांशके ।
द्वात्रिंशद्विं (शे विं ?) शतिर्वापि गर्भः स्याच्चतुरायतम् (?) ॥ ८२ ॥

अर्धारिश्मादितद्विंश कर्तरी कृतभासितम् (?) ।
महानास्या (स्य ?) श्चतस्रस्तु कर्तरि भूतपङ्क्तिकम् ॥ ८३ ॥

शालापञ्जरकूटैर्वा युक्तं प्रासादमस्तकम् ।
अष्टोर्धसञ्चरीरम्या भागार्थार्धसमन्वितम् (?) ॥ ८४ ॥

अधिष्ठाद(ना?)ग्रपर्यन्तं वृत्तं वा चतुरश्रकम् ।
ग्रीवाग्रीवसमायुक्तं शालापञ्जरसंयुतम् ॥ ८५ ॥

शेषं पूर्वोक्तवत्सर्वं चन्द्रकान्तमिदं स्मृतम् ।
अग्रे अग्रे सुसूक्ष्मं च सर्वदिङ्नासिकान्वितम् ॥ ८६ ॥

भद्राकारसमायुक्तं त्रयं पुष्पसमन्वितम् ।
मध्ये सूक्ष्मतरं कृत्वा शुद्धं स्वस्तिकमुच्यते ॥ ८७ ॥

---

81. a) M. ऊर्ध्वतरे for अध्वतीरे
    b) AMyS¹S²SvT. वाकार for °लाकार
       M. पंथिमम् My. मण्डिमम् S² पण्डिमम् for पण्डितम्
    d) AMySv. त्रयेयं S¹ त्रिधेवं S². त्रिधेयं for त्रितयं
82. a) MT. अंशाः for अंशं
    b) MT. अष्टांशा अष्टांशं
83. b) A. कर्तरि for कर्तरी
    c) M. नासात् for नास्याः
84. a) ASv. कूटेव कूटैर्वा
    c) M. °र्ध्वं संचरीरम्या My. °ष्ट सञ्चरोरम्या for सञ्चरीरम्या
85. a) M. दपवृत्तं वा for दग्रपर्यन्तं
87. b) MMyS¹T. त्रय for त्रयं

विंशद्धस्तसमुच्छ्रायं महामानान्तरेण वा ।
अत्युच्छ्रायमिदं प्रोक्तं भवनेषु सुपूजितम् ॥ ८८ ॥

प्रासादस्थितदेवानां (वांश्च ?) वक्ष्यामि शृणु भूपते ।
प्राच्यामादिवराहं तु याम्ये तु नरकेसरी (?) ॥ ८९ ॥

प्रतीच्यां श्रीकरं विद्याद्धयग्रीवं तु सोमके ।
प्रधाना च चतुर्मूर्तिः कोणे कोणे तु पक्षिराट् ॥ ९० ॥

अथवा च हनूमन्तं केवलं वा सुदर्शनम् ।
भद्रं चैव प्रभद्रं च विनाशोऽथ विनाशकः ॥ ९१ ॥

मकरो मर्करश्चैव महादन्तो विदन्तकः ।
सुदन्तो सुन्दरश्चैव कुमुदो मुरशासनः ॥ ९२ ॥

विन्दो मन्दधरश्चापि पर्जन्योऽमितविक्रमः ।
केशवो वासुदेवश्च जामदग्न्योऽथ वामनः ॥ ९३ ॥

कन्दरः कालनाथश्च पाण्डरः पाण्डुपृष्ठकः ।
यमी नियामनो ब्रह्मा कर्मणः करिशासनः ॥ ९४ ॥

---

92. a) AMSvT. मकर° for मर्कर°
b) A मन्तोदि Sv. मन्तोद for महादन्तो
c) S[1]. सुदर for सुन्दर

93. b) ASv. वित MyS[2]. वीत for °ऽमित°
d) Sv. om.

94. a) Sv. om.
c) M. यमि S[1]S[2] यमी for यमो
M. नीयमग्नो for नियामनो
d) AMySv. कर्मणा for कर्मणः
M. करं for करि°

हयशीर्षोऽथ मदनः कथनः शल्गोपवान् (?) ।
किङ्किणीकीरनाथश्च माधवः केशवस्तथा ॥ ९५ ॥

गोविन्दः कन्दरश्चैव कालकण्ठः कपालभृत् ।
दंशी दंशनिभश्चैव वीरहा दुर्जयस्तथा ॥ ९६ ॥

सङ्करो समसत्त्वश्च अग्निजिह्वस्तथैव च ।
भल्लाटस्सोमदत्तश्च विष्वक्सेनो विमारणः ॥ ९७ ॥

नरव्याली गजव्याली अश्वाली च तद्दरः (?) ।
सुधा वै (धयै ?) वार्धचित्रं वा आभासमथवा भवेत् ॥ ९८ ॥

अथवा प्रोक्षणे काले स्मरेद्देवान् पृथक् पृथक् ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां विमानलक्षणो नाम
चतुर्थोऽध्यायः ॥

95. T. कधनो for कथनः

96. b) S¹. खन्धः for कण्ठः
c) AMyS¹S²SvT. दंशि° for दंशी

98. b) AMMySvT..........चतुर्दरः

99. b) S¹. देतान् for °द्देवान्

# पञ्चमोऽध्यायः

## [मृत्संस्कारः]

* * *

अथातः संप्रवक्ष्यामि मृत्संस्कारविधिं शृणु ।
ब्राह्मणस्य सिता मृद्रा (त्स्ना?) क्षत्रियस्यारुणा स्मृता ॥ १ ॥

वैश्यानां मृत्तिका पीता शूद्राणां कृष्णवर्णिका ।
मृदं वर्णानुरूपेण गृह्णीयात् क्षेत्रसम्भवाम् ॥ २ ॥

दधिसर्पिःपयोभिश्च अतसीस्नेहसंयुतैः ।
शर्करालोहपाषाणैश्चूर्णं कृत्वानुपूर्वतः ॥ ३ ॥

समभागानि चूर्णानि मृत्तिकायां प्रयोजयेत् ।
खादिरेण कषायेण अर्जुनेन च पेषयेत् ॥ ४ ॥

श्रीवेष्टकीसर्जरसं कुङ्कुमं कोष्ठमेव वा ।
कुन्दराश्च रसा ह्येते सर्वे सर्व (जे?)रसान्विताः ॥ ५ ॥

1. c) T. om. मृ

2. a) AMyS[1]S[2]SvT. मृत्तिका पीत वैश्यानां
   c) MyT. इदं for मृदं

3. b) ASv. कृतसि° My. अतसि° S[1]S[2]. अचसि° T. तत्तसि° for अतसी°
   d) T om. श्चूर्णं

4. a) A. भागसि MyT. भागांस S[1]S[2]. भागास M. भागांश for भागानि

5. c) T. om. कुन्; T. ह्येने for ह्येते
   d) T. om. स in सर्वं

नदीसंगमतीरेषु आरण्योद्यानकेऽपि वा ।
कुलीरे गजश्रृङ्गे च पुण्यक्षेत्रे तथैव च ॥ ६ ॥

आदाय मृत्तिकां तत्र स्नेहचूर्णसमायुताम् ।
मासमेकं पर्युषितां प्रतिमां कारयेत् ततः ॥ ७ ॥

त्रिरात्रोपोषिता सा तु शिलामयसमा भवेत् ।
मृत्संस्कारमिदं प्रोक्तं तेनैव प्रतिमां क्रमात् ॥ ८ ॥

कारयेत् सुदृढां सम्यक् शास्त्रदृष्टेन शिल्पिना ।
साङ्गोपाङ्गसमायुक्तां प्रतिमां सुमनोरमाम् ॥ ९ ॥

नवाम्बरेण च तथा प्रतिमोपरि वेष्टयेत ।
तस्योपरि लिखेत् स्निग्धवर्णानुक्रमणेन तु ॥ १० ॥

वर्णभेदं प्रवक्ष्यामि शृणुष्व नृपसत्तम ।
श्वेतं रक्तं च पीतं च हरितं कृष्णमेव च ॥ ११ ॥

पञ्च वर्णा इति प्रोक्ताः प्रथमाद्यधिदेवताः (?) ।
उत्तमा धातवः प्रोक्ता मध्यमा वृक्षसंभवाः ॥ १२ ॥

संयोगजाऽधमा ज्ञेयास्त्रिविधो वर्णसङ्ग्रहः ।
वर्णश्चाप्यनुवर्णश्च सङ्क्रान्तश्च तथैव च ॥ १३ ॥

त्रिविधो वर्णसंयोग शास्त्रेऽस्मिन्नुच्यते नृप ।
वर्णा इत्युच्यते (?) ऊर्ध्वा राजावर्तादिकादयः (c) ॥ १४ ॥

अनाकारेषु ये वर्णाः प्रायः शुद्धिविवर्जिताः ।
अनुवर्णा इमे प्रोक्ताः सङ्करान् कथयाम्यहम् ॥ १५ ॥

12. b) M.° द्यादि° for° द्यधि°

14. c) AMyS¹S²SvT. वर्ण for वर्णा

शुक्लो रक्तश्च कृष्णश्च नीलश्चेति चतुर्विधः ।
शङ्खगोक्षीरवर्णाभः (?) शुक्ल इत्यभिधीयते ॥ १६ ॥

हरितश्चैव पीतश्च पीतवर्णो द्विधा भवेत् ।
मनश्शिला तालहृता हरितः संप्रकीर्तितः ॥ १७ ॥

हरिद्राकुङ्कुमाभस्तु पीत इत्यभिसंज्ञितः ।
ततस्तु श्यामवर्णस्तु कृष्णवर्णो द्विधा मतः ॥ १८ ॥

पूर्वो मरकताभस्तु इन्द्रनीलस्ततः परम् ।
शुक्लेन मिश्रिते रक्ते बभ्रुरित्यभिधीयते ॥ १९ ॥

शुक्लेन मिश्रितः पीतः कपिलः परिभाषितः ।
शुक्लेन मिश्रितः पीतः धूम्र इत्यभिसंज्ञितः ॥ २० ॥

पीतेन मिश्रितः कृष्णः कासारेत्यभिधीयते ।
रक्तेन मिश्रितः कृष्णः सर्वतः परिकीर्तितः ॥ २१ ॥

पीतकृष्णयुतः शुक्लो गौर इत्यभिधीयते ।
पीतरक्तयुतः शुक्लः कर्बुरः समुदाहृतः ॥ २२ ॥

पीतकृष्णयुतो वर्णो हरिद्वर्णः प्रकीर्तितः ।
एवं सङ्करजो वर्णः तत्कालं श्रूयते दृढम् ॥ २३ ॥

एवं वर्णविभागस्तु क्रमशः परिकीर्तितः ।
सङ्कर्षणं वासुदेवं प्रद्युम्नं चानिरुद्धकम् ॥ २४ ॥

19. a) AMySvT. मरतका° for मरकता°
b) M. परः for परम्

23. d) AMyS¹S²SvT. श्रयते for श्रूयते

24. a) एतद् for एवं
b) AMMyS¹S²T. तु प्रकीर्तितः for परिकीर्तितः

कलौ युगे नृपश्रेष्ठ श्यामवर्णेन कारयेत् ।
तद्बिम्बं सर्वदा वृद्धिं राजराष्ट्रसुखावहम् ॥ २५ ॥

ततः सर्वप्रयत्नेन कलौ श्यामेन कारयेत् ।
अन्यथाऽशुभमाप्नोति राजराष्ट्रभयावहम् ॥ २६ ॥

तत्तद्देवानुरूपेण चित्रयेच्चित्रवित्तमः ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां मृत्संस्कारविधानो नाम पञ्चमोऽध्यायः ।

26. a) MS¹S². तस्मात् MyT. तत् for ततः

56220

# षष्ठोऽध्यायः

## [ शूलस्थापनम् ]

* * *

अथातः संप्रवक्ष्यामि शूलस्थापनमुत्तमम् ।
प्रथमं दारुसंघातस्ततश्च गुणवेष्टनम् ॥ १ ॥

तृतीयं मृदालेपो नाडीबन्धश्चतुर्थकम् ।
पञ्चमं वेष्ट्य सर्वाङ्गं नालिकेरत्वचा ततः ॥ २ ॥

मिश्रिता मृत्तिका षष्ठं सप्तमं रज्जुवेष्टनम् ।
अष्टमं शर्करालेपो नवमं पटयोजनम् ॥ ३ ॥

दशमं भूषणं प्रोक्तमेकादशमतः परम् ।
शुक्लालेपनमुद्दिष्टं द्वादश वर्णयोजनम् ॥ ४ ॥

प्रोक्षणं तु ततः पश्चात् त्रयोदशविधानकम् ।
स्थापयेच्छूलप्रतिमां रत्नन्यासविधिं ततः ॥ ५ ॥

पञ्चोत्तरद्विपञ्चाशत् सपादं शूलमुच्यते ।
क्षीरदं (रहितं) वृक्षदोषैस्तु मृद (मित? ) मङ्गुलिभिः क्रमात् ॥ ६ ॥

पुण्यक्षेत्रे नदीतीरे पुलिने पर्वते ह्रदे ।
वराहकृष्टे वल्मीके वेदिकावरयोस्तथा (?) ॥ ७ ॥

निर्झरे सङ्गरे (मे?) नद्याः कुलीरवसतौ तथा ।
शालिक्षेत्रे देवखाते शृङ्गे च वृषहस्तिनोः ॥ ८ ॥

नलिन्यां दीर्घिकायां च मृत्स्नामेकोनविंशतिम् ।
आदाय नूतने पात्रे वेदघोषसमन्वितः ॥ ९ ॥

---

9. b) M. om. मेकोर्नविंशतिम्

अङ्कुरार्थमृदं गृह्य तत्प्रकारेण बुद्धिमान् ।
नानामृत्तिकया सार्धं नवभाण्डेषु योजयेत् ॥ १० ॥

शिल्पशास्त्रोक्तविधिना योजयेच्छिल्पवित्तमः।
खदिरोदुम्बराश्वत्थन्यग्रोधार्जुनभूरुहाम् ॥ ११ ॥

समुद्धृत्य त्वचः सर्वा मासं वारिषु निक्षिपेत् ।
तोयैर्मासोषितैर्मृत्स्नां मिश्रयेत् पीडयेच्च ताम् ॥ १२ ॥

मास एकोऽधिवासः स्यान्नव भाण्डेषु यत्नतः ।
शूलानां लक्षणं वक्ष्ये शृणुष्व नृपसत्तम ॥ १३ ॥

देहलब्धाङ्गुलेनैव कारयेत् प्रतिमादिकम् ।
द्विपट्काद्यङ्गुलीयुक्तं मुखं प्रोक्तं प्रमाणतः ॥ १४ ॥

भागं सपादकं ग्राह्यमधस्तात् सप्तविंशतिः ।
नाभेरधोमुखं प्रोक्तमाद्याङ्गुलिसमायतम् ॥ १५ ॥

ऊरुदण्डस्य चायामः पञ्चविंशाङ्गुलो भवेत् ।
आयामश्चोरुबाह्य तु भवेत्सप्तदशाङ्गुलः ॥ १६ ॥

मणिबन्धकरायामो बन्धकान् प्रतिमस्तकम् (?) ।
आयामो मध्यमाङ्गुल्याः पञ्चाङ्गुल इति स्मृतः ॥ १७ ॥

एतत्प्रमाणं शूलस्य उत्तमेति (?) निरीक्ष्यते ।
देवीनां तु धरादीनां शूलानुक्तान् प्रयोजयेत् ॥ १८ ॥

शूलाधिवासनं वक्ष्ये यथावदवधारय ।
प्रासादाग्रे तु कर्तव्यं मण्डपं कारयेत्ततः ॥ १९ ॥

विंशद्धस्त (?) प्रविस्तारमुत्तमं मण्टपं भवेत् ।
अथवान्यप्रकारेण मण्डपं कारयेत्ततः ॥ २० ॥

चतुर्द्वारसमायुक्तं चतुस्तोरणभूषितम् ।
वितानैः परितश्छन्नं दिग्ध्वजैश्च प्रलम्बितम् ॥ २१ ॥

पूर्वायां नीलवर्णं तु रक्तमाग्नेयगोचरे ।
कृष्णवर्णं तु याम्यायां हेमाभं नैर्ऋते तथा ॥ २२ ॥

वारुणे श्वेतवर्णं तु वायव्ये धूम्रवर्णकम् ।
भद्रं चैव तु सौम्यायामैशान्यां चित्रवर्णकम् ॥ २३ ॥

दीपैः पुष्पैः फलैः सार्धमङ्कुरैरष्टमङ्गलैः ।
पुष्पमाल्यैरलङ्कृत्य मुक्तादामैश्च (?) भूषितम् ॥ २४ ॥

स्तम्भानि वेष्टयेत्तत्र विमलैरंशुकैर्बहिः ।
गोमयालेपनं कृत्वा प्रोक्षयेत् सर्वमेव तु ॥ २५ ॥

मण्डपं च त्रिधा कृत्वा मध्यभागे तु वेदिकाम् ।
अरत्निमात्रमुत्सेधां दर्पणोदरसन्निभाम् ॥ २६ ॥

वेद्या मूले तु परितश्चोपवेदिं प्रकल्पयेत ।
युगाङ्गुलसमुत्सेधां दर्पणोदरसन्निभाम् ॥ २७ ॥

द्विगुणान्तरविस्तारामुपवेदिं प्रकल्पयेत् ।
कुण्डानि परितः कुर्यान्मानुषे तु पदे क्रमात् ॥ २८ ॥

नवाग्निं वाथ पञ्चाग्निं चतुरग्निं चतुर्दिशम् ।
पूर्वे तु चतुरश्रं स्यात् वह्नावश्वत्थपत्रवत् ॥ २९ ॥

अर्धचन्द्रं तु याम्यायां नैर्ऋते तु त्रिकोणकम् ।
पञ्चाग्न्यायतनं वक्ष्ये शृणुष्वैकमनाधुना ॥ ३० ॥

23. c) S[1]Sv. इन्द्रं for भद्रं
M. याम्याया° for सौम्याया°

पूर्वायां चतुरश्रं तु दक्षिणे चार्धचन्द्रकम् ।
वारुणे वर्तुलं कुण्डं पद्मं सोमदिशि स्थितम् ॥ ३१ ॥

अथवाऽन्यप्रकारेण कारयेद्देशिकोत्तमः ।
चतुर्दिक्षु चतुष्कुण्डं वृत्तं वा चतुरश्रकम् ॥ ३२ ॥

इन्द्र ईशानयोर्मध्ये (?) वृत्तं प्राधान्यकं ततः ।
यावदश्रं भवेत् पीठं तावदश्रं तु कुण्डकम् ॥ ३३ ॥

मण्टपस्योत्तरे भागे स्नानश्वभ्रं प्रकल्पयेत् ।
उद्वास्य शिल्पिनं पश्चाद्गोमयेनोपलेपयेत् ॥ ३४ ॥

पुण्याहं वाचयित्वा तु ब्राह्मणान् भोजयेत्ततः ।
पश्चादुच्छिष्टमुद्वास्य पुनः पुण्याहमाचरेत् ॥ ३५ ॥

धर्मं ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम् ।
अन्तःस्तम्भचतुष्कोणे स्थापयेदधिदैवतान् ॥ ३६ ॥

बाह्यानां (?) द्वादशानां (?) तु द्वादशादित्यसंज्ञितान् ।
पूजयित्वा स्वनाम्नैव तोरणं स्थापयेत्ततः ॥ ३७ ॥

तोरणं पञ्चहस्तं स्यान्मूलं वै चतुरश्रकम् ।
तोरणात् पञ्चभागैकं भूमौ तत्र निखानयेत् ॥ ३८ ॥

भद्रं च विजयं चैव विद्रुमं लोहितं ततः ।
प्लक्षोदुम्बरअश्वत्थवटाः पूर्वादितः क्रमात् ॥ ३९ ॥

दर्भमालां समाबध्य समन्तान्मण्टपस्य तु ।
त्रिचतुःपञ्चदर्भैश्च एकहस्तं प्रलम्बयेत् ॥ ४० ॥

एकाङ्गुलपरीणाहं रज्जुं कुर्यान्मनोरमम् ।
द्वारपार्श्वेषु कोणेषु पालिकादीनि विन्यसेत् ॥ ४१ ॥

36. a) AMMyS²SvT. धर्म° for धर्मं

पालिकासु यजेद्विष्णुं घटिकासु चतुर्मुखम् ।
शरावेषु यजेदीशं स्थापयेत्तु यथाक्रमम् ॥ ४२ ॥

दर्पणं पूर्णकुम्भं च मत्स्ययुग्मं च चामरौ ।
श्रीवत्सं स्वस्तिकं शंखदीपौ देवाष्टमङ्गलम् ॥ ४३ ॥

याज्ञिकं वृक्षमादाय छेदयेत् स्वप्रमाणतः ।
षोडशाङ्गुल आयामो विस्तारस्तु तदर्धकः ॥ ४४ ॥

अधस्तात्पद्मपीठं तु चतुरश्राङ्गुलायनम् ।
तदूर्ध्वे दर्पणादीनि लक्षणोक्तं समालिखेत ॥ ४५ ॥

मुकुरश्चन्द्रदैवत्यं पूर्णकुम्भस्तु जाह्नवी ।
मत्स्यौ मत्स्याधिदैवत्यं चामरौ वायुदैवतम् ॥ ४६ ॥

श्रीवत्सश्च श्रियं देवी (?) स्वस्तिकं तु सरस्वती ।
शङ्खस्तु विमलं प्रोक्तं दीपो वै वह्निदैवतम् ॥ ४७ ॥

वेदिकोपरि मध्ये तु पञ्चवर्णैर्विचित्रयेत् ।
पद्मं च सर्वतोभद्रं स्वस्तिकं वापि कारयेत् ॥ ४८ ॥

स्थण्डिलं कारयेद्धीमानष्टद्रोणैश्च शालिभिः ।
तदर्धैस्तण्डुलैर्भूष्य तदर्धैश्च तिलैरपि ॥ ४९ ॥

लाजपुष्पतिलैर्दर्भैः विचित्वेत्तु (चित्रयेत्तु ?) विशेषतः ।
पञ्चगव्येन संप्रोक्ष्य पुनः पुण्याहमाचरेत् ॥ ५० ॥

सौम्यभागे तु कर्तव्यं शान्तिहोमं समाहितः (?) ।
पर्यग्निकरणं कुर्यान्मण्टपं तेन वह्निना ॥ ५१ ॥

---

43. c) AMS[1]S[2]SvT. शंखं for शंख°

50. a) M. जपा° T. जल° for लाज°

पञ्चगोचरसिद्धान्तपञ्चरात्रपरायणः ।
आचार्यः सुप्रसन्नात्मा दृढभक्तिर्दृढव्रतः ॥ ५२ ॥

कृत्वा तु विधिना स्नानं शुद्धचन्दनलेपितः ।
शुक्लवस्त्रश्च सोष्णीषः शुक्लमाल्यैरलङ्कृतः ॥ ५३ ॥

उत्तराभिमुखो भूत्वा रुचिरासनसंश्रितः ।
भूतशुद्धिं ततः कुर्यात् सकलीकृतविग्रहः ॥ ५४ ॥

मण्टपं तु प्रविश्याथ प्रोक्षयेत्तु विशेषतः ।
अङ्कुरार्पणपूर्वं तु स्थापयेच्छूलमुत्तमम् ॥ ५५ ॥

शूलानि दे देवीनां व्यूहं कृत्वा क्रमेण तु ।
त्रिरात्रमेकरात्रं वा जलवासं प्रकल्पयेत् ॥ ५६ ॥

जलाधिवासनं गुह्यं शृणुष्वैकमनाधुना (?) ।
समुद्रगामिनीनद्यां जलवासं समाचरेत् ॥ ५७ ॥

तस्मिन् मनोरमे तीरे संस्थाप्य हरिमव्ययम् ।
शूलमध्ये ततो ध्यात्वा साधकः परमार्थवित ॥ ५८ ॥

केवलं लोहबिम्बं वा साधयेत् साधकोत्तमः ।
अर्घ्यपाद्यादिनाभ्यर्च्य न्यासकर्म समाचरेत् ॥ ५९ ॥

अष्टाक्षरमहामन्त्रं ज्ञात्वा मन्त्रविचक्षणः ।
न्यासं कृत्वा स्वदेहे तु पश्चाद्देवे न्यसेत् क्रमात् ॥ ६० ॥

सृष्टिन्यासं न्यसेत्तस्मिन् संहारं न स्मरेदिह ।
षडक्षरं न्यसेद्धीमान् स्थितिन्यासं न्यसेत् क्रमात् ॥ ६१ ॥

52. a) AMMyS²SvT. शु° for सि°
60. b) M. कृत्वा for ज्ञात्वा
61. a) ASv. °स्थितिं for °न्यासं
d) S¹. क्रमात्ततः for न्यसेत् क्रमात्

देवाग्रे स्थण्डिलं कृत्वा शालिभिर्विमलैस्तथा ।
स्नपनं कारयेद्धीमान् यथा वित्तानुसारतः ॥ ६२ ॥

पञ्चगव्यं न्यसेन्मध्ये पूर्वे शुद्धोदकं न्यसेत् ।
दक्षिणे पुष्पतोयं तु निक्षिपेत् कुशपूर्वकम् ॥ ६३ ॥

पश्चिमे नालिकेराम्भश्चोत्तरे तु कुशोदकम् ।
आग्नेय्यां दधि विन्यस्य नैर्ऋतेक्षुरसं (?) ततः ॥ ६४ ॥

वायव्ये मङ्गलोदस्तु ईशान्ये तु यवोदकम् ।
एवं तु नवकं चाब्जमध्ये संस्थापयेत् क्रमात् ॥ ६५ ॥

पद्मं तु परितश्चाष्टलोकपालान् प्रकल्पयेत् ।
प्रत्येकं कलशस्यान्तः तोयैः संस्नापयेत क्रमात् ॥ ६६ ॥

नववस्त्रेण संवेष्ट्य कलशानां तनो (नामथो?) परि (?) ।
प्रत्येकैकं त्रिभिर्वापि नववस्त्रं पृथक् पृथक् ॥ ६७ ॥

पुण्याहं वाचयित्वा तु स्वस्तिसूक्तं ततोच्चरेत् (?) ।
गन्धपुष्पादिनाभ्यर्च्य स्वनाम्ना मन्त्रवित्तमः ॥ ६८ ॥

स्मरन् नारायणं पश्चात् स्नापयेच्छूलसर्वतः (?) ।
पञ्चगव्यादिकलशान् पूर्ववत् परमेष्ठिना ॥ ६९ ॥

पुष्पमाल्यैरलङ्कृत्य चित्रवस्त्रैस्तु वेष्टयेत् ।
गन्धपुष्पादिनाभ्यर्च्य स्मरेन्नारायणं हरिम् ॥ ७० ॥

जलमध्ये प्रपां कृत्वा वितानैरुपशोभिताम् ।
सप्तहस्तसमं वापि पञ्चहस्तमथापि वा ॥ ७१ ॥

63. d) AMMyS²SvT. °कूर्चकम् for °पूर्वकम्

68. b) AS¹S²Sv. सृष्टि° for स्वस्ति°

चतुर्हस्तं प्रकुर्वीत विस्तारायामतस्समम् ।
दर्भमालासमायुक्तं मुक्तादामैरलङ्कृतम् ॥ ७२ ॥

पुष्पमाल्यैरलङ्कृत्य तन्मध्ये चासनं न्यसेत् ।
चतुष्पादसमायुक्तं काष्ठासनमनुत्तमम् ॥ ७३ ॥

तन्मध्ये देवमावाह्य क्षीरार्णवमनुस्मरन् ।
शाययेत्तु विशेषेण मुक्तिमन्त्रेण मन्त्रवित् ॥ ७४ ॥

प्राक्छिरः शाययेत्तत्र दक्षिणे वाथ शाययेत् ।
पञ्चोपनिषदं ज्ञात्वा आचार्यस्तन्त्रपारगः ॥ ७५ ॥

गन्धपुष्पाक्षतैरेव अर्चयेत् पुरुषोत्तमम् ।
परितः कलशानष्टौ इन्द्रादीशावसानकम ॥ ७६ ॥

पूरयेद्गन्धतोयेन कूर्चपल्लवशोभितान् ।
स्वनाम्ना पूजयेत् सर्वानिन्द्रादिक्रमयोगतः ॥ ७७ ॥

प्रणवादिनमोन्तैस्तु घण्टाशब्दसमन्वितम् ।
अर्घ्यादिदीपपर्यन्तं देशिकः परमार्थवित ॥ ७८ ॥

बलिदानं ततः कृत्वा अष्टदिक्षु यथाक्रमम् ।
गन्धपुष्पादिनाभ्यर्च्य उत्तमन्ये निरीक्ष्यते (?) ॥ ७९ ॥

जलवासमिदं प्रोक्तं पश्चात्कर्म ततः शृणु ।
अपरेऽहनि देवेशमपराह्ने समाहितः ॥ ८० ॥

75. ab) M. om.

77. c) M. om 'सर्वा'
d) M. om.

79. b) S[1]. °विधि for °क्रमम्
d) MyT. उत्तमन्यो for उक्तमन्ये

जलादुत्तीर्य तत्त्वज्ञो भेरीपटहनिस्वनैः ।
शङ्खध्वनिसमायुक्तं वेदध्वनिसमन्वितम् ॥ ८१ ॥

पूजयेत्तु ततो देवमलङ्कृत्य स्रगादिभिः ।
ईशाने मण्टपे भागे स्थापयेत् कलशान् पृथक् ॥ ८२ ॥

पञ्चविंशति वा कुर्यात् द्वाविंशतिमथापि वा ।
स्नपनं कारयेत्तत्र विधिवद्देशिकोत्तमः ॥ ८३ ॥

गोभूहिरण्यवस्त्रादीनाचार्याय प्रदापयेत् ।
शिबिकायां नयेद्देवं वहेयुर्ब्राह्मणैः सह ॥ ८४ ॥

वेदघोषसमायुक्तः तूर्यघोषसमन्वितः ।
भक्तैर्भागवतैस्सार्धं आलयं तं प्रवेशयेत् ॥ ८५ ॥

पूर्वोदिते मण्टपे च आनयेत् स्नानविष्टरे ।
स्नपनं कारयेत्तत्र पूर्वोक्तेन विधानतः ॥ ८६ ॥

शयनं कल्पयित्वा तु शाययेच्छूलसंचयम् ।
तन्मध्ये देवशूलं तु देवीशूलं तु पार्श्वयोः ॥ ८७ ॥

वस्त्रैराच्छादयेच्छूलान् दर्भपुञ्जैस्तथैव च ।
पूजयेद्गन्धपुष्पेण सृष्टिन्यासादिपूर्वकम् ॥ ८८ ॥

संहारो नेष्यते तस्मिन तत्त्वानि विनियोजयेत् ।
पञ्चविंशतितत्त्वानां न्यासं कुर्यात्तु देशिकः ॥ ८९ ॥

ततस्तु वेदिकायां तु पूर्वोक्तक्रमयोगतः ।
पूर्णकुम्भान् स्थापयित्वा पल्लवैः कुशकूर्चकैः ॥ ९० ॥

धान्यराशौ विनिक्षिप्य आच्छाद्य नववाससा ।
तदुपरि तण्डुलं न्यस्य आच्छाद्य नववाससा ॥ ९१ ॥

तिलं च तदुपरि न्यस्य तन्मध्ये तु घटान् न्यसेत् ।
वाराहादिं यजेत्तत्र स्वनाम्नाष्टघटेषु च ॥ ९२ ॥

नेष्यते वेदिकायां तु ब्रह्मकुम्भाधिवासनम् ।
अर्घ्यपाद्यादिनाभ्यर्च्य स्मरन्नारायणं हरिम् ॥ ९३ ॥

वासुदेवादिमूर्तीं च पूर्वादिक्रमयोगतः ।
कुण्डे वा स्थण्डिले वापि जुहुयान्मतिमान् पृथक् ॥ ९४ ॥

समिधाज्येन चरुणा अष्टोत्तरशतं हुनेत् ।
पयसा मधुना दध्ना मूलमन्त्रेण मन्त्रवित् ॥ ९५ ॥

सूक्तेन पौरुषेणैव पूर्वादिक्रमयोगतः ।
षोडशीराहुतीर्हुत्वा कुण्डे कुण्डे च मूर्तिपः ॥ ९६ ॥

पूर्णाहुतिं ततो हुत्वा होममस्मिन् समाचरेत् ।
चतुर्विधानि चान्नानि देवाय विनिवेदयेत् ॥ ९७ ॥

घण्टारवपुरस्कं तु भेरीशब्दसमन्वितः ।
शङ्खदुन्दुभिनिर्घोषैस्तस्मिन् काले नियोजयेत् ॥ ९८ ॥

अष्टदिक्षु बलिं दद्यात् कुमुदादि (?) यथाक्रमम् ।
रात्रिशेषं नयेद्वेयनृत्तवीणादिभिः क्रमात् ॥ ९९ ॥

प्रभाते विमले शुद्धे कृतस्नानः कृताह्निकः ।
क्रमाद्द्वादशनामानि धारयेद्देशिकोत्तमः ॥ १०० ॥

उष्णीषैरुत्तरीयैश्च गन्धद्रव्यानुलेपनैः ।
नानाभरणसंयुक्तमङ्गुलीयकसंयुतम् ॥ १०१ ॥

मूर्तिपैः सह वाचार्यः शूलमूलमनुस्मरन् ।
गन्धपुष्पादिनाभ्यर्च्य नैवेद्यं दापयेत् क्रमात् ॥ १०२ ॥

---

94. d) M. मूर्तिपः MyS[1]S[2] मूर्तिपाः for मतिमान्

धाम प्रदक्षिण कृत्वा गर्भगेहं प्रवेशयेत् ।
आचार्यः स्थापयेच्छूलान् संप्रतिष्ठेति मन्त्रतः ॥ १०३ ॥

श्रीभूशूलं तु संस्थाप्य तं तमस्मिन् शिलादिना (?) ।
ऋगादिवेदमुच्चार्य ब्राह्मणान् संयतेन्द्रियान् ॥ १०४ ॥

वाराहादीनि चावाह्य शूलाग्रे सेचयेत् क्रमात् ।
मूर्धादिपादपर्यन्तं वाराहादीननुक्रमात् ॥ १०५ ॥

शूलदेहे तु विन्यस्य स्वनाम्ना तु पृथक् पृथक् ।
सदैव स्थापयेच्छूलं श्रीभूम्यौ (म्योः ?) देवपार्श्वयोः ॥ १०६ ॥

चित्रादिदारुलोहानां साङ्गोपाङ्गं समाचरेत् ।
शिल्पशास्त्रविधानेन कारयेच्छिल्पवित्तमः ॥ १०७ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां शूलस्थापनविधानो नाम
षष्ठोऽध्यायः ॥

103. d) M. सुप्र° for संप्र°

104. b) M. तन्त्रमस्मिन् ASv. तन्नमश्री for तंतमस्मिन्

d) M. संस्कृते° MyS¹S²Sv. सजिते° for संयते°

# सप्तमोऽध्यायः

## [ बालस्थानविधिः ]

* * *

अथातः संप्रवक्ष्यामि बालस्थानविधिं परम् ।
प्रथमावरणे वापि द्वितीयावरणेऽपि वा ॥ १ ॥

महाविमानाभिमुखं नातिदूरं समीपगम् ।
प्रासादस्याग्रतः कुर्यात् तरुणालयकल्पनम् ॥ २ ॥

आलयाभिमुखे भागे पूर्वे वा चोत्तरेऽपि वा ।
ईशान्ये वाप्यभावे तु बालालयमनन्तरम् ॥ ३ ॥

पञ्चहस्तप्रविस्तारं पट्टिकादित्रयान्वितम् ।
उपानजगतीपादं पालिकापरिशोभितम् ॥ ४ ॥

कपोतवे(व्या?)लनासां च विटङ्क परिकल्पयेत ।
हंसपादसमायुक्तं त्रिकूटाकारमेव वा ॥ ५ ॥

शालाकारं प्रपाकारं गोपुराकारमेव च ।
कल्पयेत् सिंहनासान्तं वर्धयेत कण्ठपट्टिकाम ॥ ६ ॥

दारुणा मृण्मया (वा मृदा ?) वापि इष्टकाभिर्नृपोत्तम ।
षट्पञ्चसप्तहस्तं वा नवहस्तमथापि वा ॥ ७ ॥

संज्ञात्वा (?) साधको वापि यजमानेच्छया ततः ।
गर्भमानत्रिभागैकं द्वारमानं प्रशस्यते ॥ ८ ॥

द्वारविस्तारमानस्य द्विगुणस्तु तथोच्छ्रयः ।
द्वारे चण्डप्रचण्डौ च मुनिवेषौ गदाधरौ ॥ ९ ॥

---

2. d) M. लक्तकद्युति for लयकल्पनम्
6. d) M. om.

कल्पयेच्छिल्पिना वापि कारयेदन्यमेव तु ।
पाले ... न्नु संकल्प्य आचार्यः शिल्पिभिः सह ॥ १० ॥

प्रथमेष्टकाविधानादि (?) कारयेदिह पूर्ववत् ।
मण्डपस्याग्रतः कृत्वा सप्रकारं सुरक्षितम् ॥ ११ ॥

गर्भन्यासं प्रकुर्वीत रत्नन्यासस्तु नेष्यते ।
तन्मध्ये कल्पयेत पीठं इष्टकै (?) दारुणापि वा ॥ १२ ॥

मृदा वा सुदृढं स्निग्धं काष्ठासनसमन्वितम् ।
हस्तमेकं त्रिहस्तं वा द्विहस्तमथवापि वा ॥ १३ ॥

चतुरश्रं भद्रपीठं विस्तारयाम (?) तादृशम् ।
उपकण्ठसमायुक्तं विटङ्कं परिवर्धयेत ॥ १४ ॥

जलधारां प्रकुर्वीत मध्ये सूक्ष्मतरं भवेत् ।
सिंहनासिकया युक्तं व्यालादिपरिशोभितम् ॥ १५ ॥

कालपीठं प्रपीठं वा उपपीठसमन्वितम् ।
सुधया च दृढीकृत्य चित्रयेत चित्रवित्तमः ॥ १६ ॥

कृत्वैव बालगेहं तु सायकश्चानुरूपतः ।
एवं कृत्वा विधानेन उत्तमं तरुणालयम् ॥ १७ ॥

मूलस्थानं च देशं च गृहीत्वा तदनन्तरम् ।
राष्ट्रवृद्धिकरं पूर्वे धनधान्यसुखावहम् ॥ १८ ॥

ग्रामराज्ञोश्च राष्ट्रस्य दक्षिणे वृद्धि सर्वदा (?) ।
सर्ववृद्धिकरं सौम्ये पुत्रपौत्रसुखावहम् ॥ १९ ॥

दुर्भिक्षभयनाशार्थं सोमेशानान्तरेऽपि वा ।
ईशाने तु भवेत्तस्मिन् ग्रामे नगरवृद्धिदम् ॥ २० ॥

आयुः कीर्तिश्रियं (यौ ?) नित्यं वर्धते (न्ते ?) च दिने दिने ।
इह लोकेऽखिलान् भोगानपरे जन्मवर्जितः ॥ २१ ॥

आचार्यं पूजयेत् पश्चात् वस्त्रहेमाङ्गुलीयकैः ।
शिल्पिनं पूजयेत् तत्र वस्त्रैराभरणैर्धनैः ॥ २२ ॥

तोषयेद्गुरुणा सार्धमिति शास्त्रविनिश्चयः ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां बालस्थानविधानो नाम सप्तमोऽध्यायः ।

— —xox— —

# अष्टमोऽध्यायः

## [ प्रतिमालक्षणम् ]

* * *

प्रतिमालक्षणं सम्यक् शृणु वक्ष्यामि भूपते ।
आदिमूर्तिर्वासुदेवः सङ्कर्षणमतः (?) परम् ॥ १ ॥

प्रद्युम्नश्च तृतीयं (यः ?) स्यादनिरुद्धस्ततः परम् ।
क्रमात् क्रमात्तु जायन्ते वासुदेवादिकारणम् (णाः ?) ॥ २ ॥

केशवादीनां मूर्तीनां (?) लक्षणं कथयाम्यहम् ।
वारिजं शङ्खचक्रं च केशवं दण्डधारिणम् (?) ॥ ३ ॥

शङ्खचक्रगदापद्मैः नारायण इति स्मृतः ।
गदाधरो माधवश्च चक्रशङ्खाम्बुजायुधः ॥ ४ ॥

मधुसूदनश्चक्रशङ्खवारिजं दण्डतत्परः (?) ।
पद्मशङ्खारिदण्डास्त्रो गुणविक्रमनामतः (कः ?) ॥ ५ ॥

शङ्खचक्रगदापाणिः वामनस्याब्जमीरितम् (?) ।
श्रीधरोऽब्जारिगदाभृच्छङ्खायुध इति स्मृतः (?) ॥ ६ ॥

2. a) AMMyS¹S²Sv. °म्नं तु for °म्नश्च
   b) AMyS¹S²SvT. °मतः for °स्ततः
3. a) AMyS¹Sv. °दिच for °दीनां
   c) T. °पर्णं for °चक्रं
4. a) AMyS¹S²Sv. °पद्म° M. °पद्मो for पद्मैः
5. a) T. °श्चतुः for °श्चक्र°
   c) S¹. °दण्डारिशङ्खास्त्रः for °शङ्खारिदण्डास्त्रः
   d) M. शृणु for °गुण
6. a) AMyS²SvT. °पाणि° for पाणिः
   cd) ASv. om.
   d) S¹. दीप्तिमान् T. °मिति स्थितम् for इति स्मृतः

गदाशङ्खं च चक्रं च हृषीकेशस्य वारिजम् ।
पद्मनाभः शङ्खचक्रगदायुधमिति (पद्मायुधः ?) स्मृतः ॥ ७ ॥

शङ्खचक्राब्जदण्डास्त्रधरो दामोदरः स्मृतः ।
शङ्खचक्रधराः सर्वे (?) एवं द्वादशमूर्तयः ॥ ८ ॥

वासुदेवो गदाशङ्खचक्राम्भोजधरः स्मृतः ।
सङ्कर्षणो गदाशङ्खवारिजं चक्रपाणयः (?) ॥ ९ ॥

प्रद्युम्नः शङ्खचक्राभ्यां सह दण्डधरोऽब्जवान् ।
चक्रदण्डाब्जशङ्खं (ङ्खः ?) च अनिरुद्ध इति स्मृतः ॥ १० ॥

पुरुषोत्तमश्चक्रपद्म (?) शङ्खकौमोदकी स्मृतः ।
अधोक्षजो वारिजदण्डशङ्खं चक्रं च बिभ्रवत् (?) ॥ ११ ॥

चक्रपद्मगदाशङ्ख (ङ्खो ?) नृसिंहः स्याद्भयानकः ।
अच्युतो गदया सार्धं पद्मारी शङ्खहस्तवान् ॥ १२ ॥

पद्म चक्रं च शङ्खं च दण्डायुध जनार्दनः (?) ।
उपेन्द्रः शङ्खदण्डारिपद्मायुधविभूषणः ॥ १३ ॥

---

8. b) T. श्रुतः for स्मृतः
c) AMMyS²SvT. गदाः for धराः
d) T. एव for एवं

9. b) T. श्रुतः for स्मृतः
c) AMMyS²SvT. सङ्कर्षण° for सङ्कर्षणो

10. c) T. चक्रदण्डश्च शङ्खश्च for चक्रदण्डाब्जशङ्खं च

11. d) ASv M. बिभ्रत् पर्यायवाचि for बिभ्रवत्

12. b) AMyS¹S²SvT. °हस्याभिधानतः for °हः स्याद्भयानकः
d) AMyS²SvT. पद्मारि M. पद्मारिः for पद्मारी

हरिः स्याच्छङ्खचक्राब्जदण्डायुध इति स्मृतः ।
शङ्खकौमोदकीपद्मचक्रपाणिश्च कृष्णसः (?) ॥ १४ ॥

दक्षिणं हस्तमारभ्य प्रादक्षिण्येन कारयेत् ।
चिह्नानि मूर्तेः शङ्खादीन्यायुधानि विचक्षणः ॥ १५ ॥

पीताम्बरधराः सर्वे चतुर्विंशतिमूर्तयः ।
वनमालया श्रीवत्सेन (?) कौस्तुभेन विराजिताः ॥ १६ ॥

भोगात्मनश्चेन्मूर्तेश्च देवीभ्यां स्थापयेत् सह ।
योगलक्ष्मीं तु श्रीवत्सं (त्से ?) भोगलक्ष्मीं द्विपार्श्वयोः ॥ १७ ॥

वीरलक्ष्मीस्तु वैशेषं (?) पृथग्भवनकल्पनम् ।
मीनादिदशमूर्तीनां लक्षणं कथ्यतेऽधुना ॥ १८ ॥

मत्स्याकारं भवेद्यस्तु षोडशाङ्गुलमुन्नतम् ।
षडङ्गुलं तु वैपुल्यं मीनाख्यं परिकल्पयेत (?) ॥ १९ ॥

कूर्मवत् कूर्ममूर्तिं तु षडष्टाङ्गुलविस्तृताम् ।
आननं तु षडङ्गुल्यं कण्ठं चैव षडङ्गुलम् ॥ २० ॥

14. a) T. °दि° for °ब्ज°
d) AS²Sv. °णि चतु° for °णिश्च कृ°
T. om. कृष्ण

16. c) AS²Sv. श्रीवत्सो for श्रीवत्सेन

17. a) My. om. °त्म° ; S¹S². °र्थि° for °त्म° ; ASv. श्च for श्चेत् ;

18. a) M. वर for वीर

20. a) AMyS²Sv. मूर्तिस्तु for मूर्ति तु
d) M. कूर्मं AS¹S²SvT. कर्णं for कण्ठं

शेषमङ्गुलभागेन कल्पयेच्छिल्पवित्तमः (?) ।
शिलामृत्काष्ठजं पद्मपीठे संस्थापयेत् प्रभुम् ॥ २१ ॥

कर्मार्चादिषु बिम्बानि सौम्यवक्त्राश्चतुर्भुजा ।
निर्माणं च वराहस्य कथयामि यथातथम् ॥ २२ ॥

पुरुषाकारं वपुष्मन्तं (?) वक्त्रं वाराहवद्भवेत् ।
शङ्खचक्रगदाधारी चतुर्भुजसमन्वितः ॥ २३ ॥

स्फटिकाभो महाकाय एतद्वाराहलक्षणम् ।
पीतवस्त्रं मकुटिनं मेचकाकृतिमेव वा ॥ २४ ॥

स देवीं च समुद्धृत्य वामहस्तेन कूर्परे ।
आलम्ब्य जानुभागे तु पाणिना दक्षिणेन तु ॥ २५ ॥

आसीने तु यथारूपं ब्रह्मस्थाने ऋजुर्भवेत् ।
आसीने तु तथासीना पुष्पहस्ता वसुन्धरा ॥ २६ ॥

वामपार्श्वे प्रतिष्ठाप्य वाराहवपुषो हरेः ।
कर्मार्चनादिप्रतिमा त्वासीना वा स्थितापि वा ॥ २७ ॥

---

21. a) M. °मङ्गल° for °मङ्गुल°
    b) S¹. शिल्पि° for शिल्प°

22. a) M. मर्मा° AMyS¹Sv. कूर्मा° for कर्मा°

23. c) MT. °धारि for °धारी

24. c) M. वक्त्रं for वस्त्रं

25. a) AMMyS²SvT. om. स before देवीं

26. a) M. तथा for यथा
    b) M. om. ऋ ; AS²SvT. जजु° for ऋजु°

देव्या सह क्रोडवक्त्रा सौम्यास्या वा चतुर्भुजा ।
बहुधा नृसिंहमूर्तिश्च तत्र काचित् प्रदृश्यते ॥ २८ ॥

आननं सिंहवत्कृत्वा नरवद्वपुषा स्मृतम् ।
चतुर्बाहुं विशालाक्षं स्फटिकाभसमन्वितम् ॥ २९ ॥

भ्रुकुटीकुटिलं भीमं कल्पयेत पृथुसत्तम ।
शिलामृत्काष्ठजं पद्मपीठे संस्थापयेत् प्रभुम् ॥ ३० ॥

वामनं वामनाकारं श्यामलं दण्डधारिणम् ।
मौञ्जीमेखलया युक्तं ब्रह्मसूत्रविराजितम् ॥ ३१ ॥

कौपीनाच्छादनधरं द्विबाहुं नररूपवत (पिणम् ?) ।
कृष्णाजिनधरं देवं शुद्धस्फटिकसन्निभम् ॥ ३२ ॥

काकपक्षधरं देवं रचितालकशोभितम् ।
ईषत्कुञ्चितसव्यांघ्रिं ऋजुं दक्षिणपादकम् (?) ॥ ३३ ॥

दक्षिणेन तु हस्तेन याचमानं वसुन्धराम् ।
आसीनं वा शयानं वा स्थितं वा यदि भूपते ॥ ३४ ॥

आरूढं विहगेशस्य पीठिका यदि (यां सु ?) संस्थितम् ।
एकबेरविधानं चेत् स्थापयेत् ब्रह्मणः पदे ॥ ३५ ॥

बहुबेरविधाने तु त्रैलोक्यक्रमणोद्यतम् ।
भुवनत्रयदातारं सभार्यं सपुरोहितम् (?) ॥ ३६ ॥

28. a) S[1]. सिंह for सह
b) AMMyS[2]SvT. वा स्यात् for °स्या वा

29. c) S[1]S[2] °भुजं for °बाहुं

33. b) M. रजिता for रचिता°
c) AS[1]S[2]Sv. °सर्वा° for °सव्यां°

36. a) M. °नं चेत् for °ने तु

पादोद्धिसमुद्भूतां गङ्गामाकाशगामिनीम् ।
तर्जन्या वामया वापि निर्देशं तु समुद्भृतम् ॥ ३७ ॥

चरणं सव्यमत्युच्चैः श्यामलं पीतवाससम् ।
शङ्खचक्रगदाखड्गधनुःपाशादिधारिणम् ॥ ३८ ॥

कुर्यात् भार्गवरामस्य निर्माणमधुनोच्यते ।
आसीनं द्विभुजं शान्तं जटामकुटधारिणम् ॥ ३९ ॥

चापं च परशुं शङ्खं दक्षिणे हस्त संग्रहेत् (?) ।
सौवर्णाभं महाकायं नानारत्नविभूषितम् ॥ ४० ॥

श्रीवत्सेनाङ्कितोरस्कं ब्राह्मया लक्ष्म्या समावृतम् ।
उ(सो ?)पवीतोत्तरीयं च स्थितं वा कल्पयेत्ततः ॥ ४१ ॥

एकबेरमिति प्रोक्तं बहुबेरविधिं शृणु ।
बहुबेरपदे दिव्ये देवीं वामे प्रकल्पयेत् ॥ ४२ ॥

चतुर्भुजा च कर्मार्चा जामदग्न्येन वा समा ।
त्रिभङ्गीकृतदेहं तु त्रयस्त्रिंशच्च (रस?) लक्षणम् ॥ ४३ ॥

शङ्खचक्रधरं शार्ङ्गशरहस्तं चतुर्भुजम् ।
लक्षणं राघवस्याथ कथयामि यथाश्रुतम् ॥ ४४ ॥

मेचकाभं मकुटिनं श्रीवत्सं द्विभुज प्रभुम् ।
त्रिभङ्गीकृतदेहं तु यद्वा रामं चतुर्भुजम् ॥ ४५ ॥

ऋजुस्थितं दक्षिणेन चरणेनेतरेण तु ।
कुञ्चितेनाङ्घ्रिणा स्तोकं शरशार्ङ्गधनुर्धरम् ॥ ४६ ॥

कटिसूत्रसमं कुर्यात् मुखमानं सगोलकम् ।
मुखं दक्षिणतो भङ्गं हस्ताभ्यां शङ्खचक्रभृत् ॥ ४७ ॥

---

37. d) M. निर्दिशेत्तु S¹S². निर्दिशन्तु for निर्देशं तु

कर्तव्या दक्षिणतो भङ्ग ललाटान्तधनुर्धरम् ।
कम्बुग्रीवं महोरस्कं त्रयस्त्रिंशत्सुलक्षणम् ॥ ४८ ॥

पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिगम्भीरं त्रिविस्तीर्णं यथातथम् ॥ ४९ ॥

शत्रुघ्नं चाङ्गदं चैव स्थापयेद्देवमव्ययम् ।
शरचापधरं कुर्यात् स्थितं लक्ष्मणवर्जितम् ॥ ५० ॥

अथवाभयदं हस्तं दक्षिणं दक्षिणेतरम् ।
कटिप्रकरणं कुर्याद्वरदं वा यथारुचि ॥ ५१ ॥

दक्षिणोत्तरयोर्भित्त्योः परिवारान् यथापुरम् (?) ।
रामस्य भ्रूप्रदेशान्तं भरतं परिकल्पयेत् ॥ ५२ ॥

लक्ष्मणं च कपोलान्तं चिबुकान्तं तथापि वा ।
शत्रुघ्नं कण्ठदेशान्तं सर्वे चापशरान्विताः ॥ ५३ ॥

करण्डिकामौलिधरा कबरीवालकैर्युताः ।
बिभ्राणा वामहस्तेन कुड्मलं सरसीरुहम् ॥ ५४ ॥

विश्रान्तोरुप्रदेशे च दक्षिणस्य भुजे तथा ।
विन्यस्य चोरुमध्ये तु वारिजं वामहस्तके ॥ ५५ ॥

सीता श्रीरिव कर्तव्या कल्याणबहुलक्षणा ।
हनूमान् मेचकाभस्तु पुरुषाकारसन्निभः ॥ ५६ ॥

आस्यं पिधाय हस्तेन दक्षिणेनेतरेण तु ।
वस्त्रप्रदेशमाच्छाद्य विनीतवदवस्थितम् ॥ ५७ ॥

---

49. c) S¹. °भङ्गीणं for °गम्भीरं

53 b) M. छिद्रं for चिबु°
c) S¹ T. कर्ण° for कण्ठ°

केशबन्धयुतं कुर्यादुच्छ्रयस्तस्य वक्ष्यते ।
रामस्य बाहुपर्यन्तमुच्छ्रयस्तस्य वक्ष्यते ॥ ५८ ॥

रामस्य बाहुपर्यन्तमुच्छ्रायः सममेव वा ।
रामस्य बलभद्रस्य लक्षणं कथयाम्यहम् ॥ ५९ ॥

मनुष्याकारवत् कुर्यात् भागेऽथ परिकल्पयेत् ।
द्विभुजं लाङ्गलं चैव प्रसव्येतरहस्तयोः ॥ ६० ॥

बिभ्राणमथवा न्यस्तं वामहस्तं कटिस्थले ।
एवं लक्षणसंयुक्तं कारयेच्छिल्पवित्तमः ॥ ६१ ॥

दारुजैर्लोहजैर्वापि यथा वित्तानुसारतः ।
भद्रपीठसमायुक्तं चतुरश्रं प्रकल्पयेत् ॥ ६२ ॥

वृत्तं वा उपपीठं तु जलधारां प्रकल्पयेत् ।
तिर्यग् विस्तारमानं वा पञ्चधा भेद उच्यते ॥ ६३ ॥

सङ्कोचं च प्रकोचं च पङ्कजं वाथ कारयेत ।
भद्रं चैव सुभद्रं च पञ्चभेदाः प्रकीर्तिताः ॥ ६४ ॥

किरीटिनं श्यामवर्णं नानाभरणभूषितम् ।
विश्वरूपं तु वा कुर्यात् केशवं केशिसूदनम् ॥ ६५ ॥

बृन्दावनगतं कृष्णं गवामनुचरं प्रभुम् ।
ईषत्कुञ्चितवामाङ्घ्रिमितरेण ऋजुस्थितम् ॥ ६६ ॥

गच्छन्तमपि गायन्तं वंशेन परमाद्भुतम् ।
एतत्कृष्णं समाख्यातं कलिनिर्माणलक्षणम् ॥ ६७ ॥

61. d) S[1]. शिल्पि° for शिल्प°

63. a) MyT. भद्रं for वृत्तं

66. a) M. विष्णुं for कृष्णं

वाहनं तुरगः प्रोक्तं पिङ्गश्मश्रुविराजितम् ।
वृत्तायतं सुवृत्ताक्षं रक्तवर्णं प्रकीर्तितम् ॥ ६८ ॥

द्विभुजं चर्मवसनं खड्गखेटकधारिणम् ।
करण्डिकामकुटिनं जटाजालविराजितम् ॥ ६९ ॥

ब्राह्मया लक्ष्म्या समाश्रित्य देवैः परिजनैः सह ।
कल्किलक्षणमित्येवं बेरभेदं प्रचक्षते ॥ ७० ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां
प्रतिमालक्षणविधानो नाम
अष्टमोऽध्यायः

॥ समाप्तः ॥

67. b) MMy. वशेन AS[1]SvT. वेशेन for वंशेन

70. a) S[1]. समावेत्य for समाश्रित्य

# नवमोऽध्यायः

## [ बेरादिलक्षणविधानम् ]

★ ★ ★

अथातः संप्रवक्ष्यामि बेराणां लक्षणं शृणु ।
मूलबेरं तु कर्मार्चा नित्योत्सवमतः परम् ॥ १ ॥

महोत्सवं तु तीर्थार्थं बिम्बषट्कं विधीयते (?) ।
इत्यमीषां प्रमाणानि शृणु राजकुलोद्भव ॥ २ ॥

षण्णवत्यङ्गुलायाममुत्तमस्योच्छ्रयं भवेत् ।
इतः पक्षाङ्गुलीहीनं मध्यमस्योच्छ्रयं भवेत् ॥ ३ ॥

एकपञ्चाशदित्युक्तमधमस्योच्छ्रयं ततः ।
इत्युक्त(त ?)मादिबेराणामुत्सेधं त्रिविधं त्विति ॥ ४ ॥

एकबेरप्रतिष्ठायामधमं बेरमुच्यते ।
कर्मार्चाबेरतन्मानं (?) उक्तं तन्मात्रतो (?) भवेत् ॥ ५ ॥

बहुबेरविधिं वक्ष्ये शृणुष्व नृपसत्तम ।
पीठिके (?) दैविकादीनि स्थापयेद्देविभिस्सह ॥ ६ ॥

मत्स्यादिलोकपालादि निर्मितं प्रियया सह ।
बहुबेरमिति ज्ञेयमेकत्वेन विधिं शृणु ॥ ७ ॥

चतुर्भुजं शङ्खचक्रं मध्यस्थाने तु बेरकम् ।
न प्रभा नावतारादिर्न कर्मार्चा न च स्त्रियोः (?) ॥ ८ ॥

---

1. d) M. मितः for मतः
6. c) AS¹S²Sv. पीठिको for पीठिके
8. b) M. स्थानैश्च T. स्थानैक for स्थाने तु
   d) AMySvT. च स्त्रयोः M. चासती for च स्त्रियोः

वीरलक्ष्मीस्तु श्रीवत्समेकबेरमिति स्मृतम् ।
बहुबेरविधानेन कर्मार्चायां(र्चां तु?) समाचरेत् ॥ ९ ॥

एकबेरविधानेन स्नानं कुर्याद्दिने दिने ।
दैविकं बहुबेरं च एकबेरे तु मानुषम् ॥ १० ॥

तत्तत्कर्मानुगुण्येन दैविकं मानुषं क्रमात् ।
बेरं च त्रिविधं प्रोक्तं बाल्ययौवनवार्धकम् ॥ ११ ॥

बेरं च यौवनं प्रोक्तं शय्याबेरं तु बाल्यकम् ।
भोगबेरं तु वृद्धं स्यात् बेरभेदा यथाक्रमम् ॥ १२ ॥

राजसं चोत्थिते मूर्तिः (?) आसीने तामसं भवेत् ।
शयने सात्त्विकं कुर्यादिति मूर्तिर्विधीयते ॥ १३ ॥

मोक्षार्थे यौवनस्यापि काम्यं चैव तु बाल्यकम् ।
रक्षणार्थं तु वार्धक्यं तत्तत्कर्मानुसारतः ॥ १४ ॥

स्थूलं सूक्ष्मं परं चैव त्रिविधं बिम्बमीरितम् ।
स्थूलमष्टभुजं प्रोक्तं षोडशं वा तथैव च ॥ १५ ॥

चक्रं शङ्खं सपरशुं शूलं बाणं तथाङ्कुशम् ।
वज्रं च दक्षिणभुजे प्रदेशेष्वितरेष्वपि ॥ १६ ॥

---

9. d) AS[2]Sv. कर्मार्चाथ S[1]T. कर्मार्चाया for कर्मार्चायां

10. b) T. स्थानं for स्नानं

12. b) MT. च for तु
d) AMMyS[2]SvT. भेदं for भेदा

15. a) S[1]S[2]T. स्थूलसूक्ष्मपरं for स्थूलं सूक्ष्मं परं

16. a) M. चक्र° for चक्रं
b) AMMyS[2]SvT. शूल° for शूलं

शङ्खचक्रगदाशक्ति शार्ङ्गं पाशं च तोमरम् ।
शिष्टौ (?) करौ यथापूर्वं स्थूलनामर्मिति स्मृतम् ॥ १७ ॥

चक्रं खड्गं च बाणं च (अ?) उभयं दक्षिणं भुजे ।
पाञ्चजन्यं गदाशार्ङ्गं वामबाहुचतुष्टये ॥ १८ ॥

जानूपरि तथा वामं हस्तमेकं प्रसारयेत् ।
यद्वा भुजयुगं जानुद्वयस्योपरि निक्षिपेत् ॥ १९ ॥

अथवा षोडशभुजो स्थूलमूर्त्यभिधीयते ।
चतुर्भुजं सुसूक्ष्मं तु परं तु द्विभुजं ततः ॥ २० ॥

लिङ्गं बेरं च बिम्बं च प्रतिमा च चतुर्विधम् ।
बेरं स्थापितमूर्ति स्यादरूपं लिङ्गमुच्यते ॥ २१ ॥

बिम्बं च लोहरूपं स्यात् प्रतिमा कनकं भवेत् ।
त्रिविधं (धां?) प्रतिमा (मां?) कर्मशास्त्रज्ञाः संप्रचक्षते ॥ २२ ॥

चित्रं चाप्यर्थचित्रं च चित्राभासं तथैव च ।
दृश्यन्तेऽवयवास्तत्र (यत्र?) प्रतिमायां तथैव च ॥ २३ ॥

मानोन्मानप्रमाणाभिः तच्चित्रमिति कथ्यते ।
शिलागताया यस्यास्तु पृष्ठभागो न दृश्यते ॥ २४ ॥

मानप्रमाणसंयुक्ता सार्धचित्रमिति स्मृता ।
या स्थिताऽऽलेख्यरूपेण लिखिता वापि शिल्पिभिः ॥ २५ ॥

---

17. d) AMMyS²SvT. स्मृतः for स्मृतम्

18. a) M. पाशं for बाणं
    d) M. महा° for वाम°

21. b) M. चतुष्टयम् for चतुर्विधम्
    c) AMyS¹S²SvT. °मूर्तिः for °मूर्ति

मानप्रमाणसंयुक्ता तच्चित्राभास उच्यते ।
उत्तमं तु फले चित्रं मध्यमं चार्धचित्रकम् ॥ २६ ॥

आलेख्यमधमं प्रोक्तं प्रतिमाकर्मणि क्रमात् ।
फलकायां पटे कुड्ये लिखितानां तु लक्षणम् ॥ २७ ॥

कर्मार्चालक्षणं यद्वदुक्तं तद्वत्प्रमाणकम् ।
अत्र किञ्चिद्विशेषोऽस्ति कनकाद्येन वा पुनः ॥ २८ ॥

पालाशेन तु बिल्वेन खादिरेण तु वा पुनः ।
औदुम्बरेण पश्चात्तु न्यग्रोधेन तु वा पुनः ॥ २९ ॥

पनसेषु द्रुमेष्वेषु अन्येन तु विशेषतः ।
द्व्यङ्गुलं तु घनं चैव चतुरङ्गुलमायतम् ॥ ३० ॥

चतुरश्रं तु वृत्तं वा मेखलात्रयसंवृतम् ।
तस्योपरि लिखेदब्जमष्टपत्रं तु वा पुनः ॥ ३१ ॥

दलैर्द्वादशभिर्युक्तं सर्वशोभासमन्वितम् ।
कर्णिकायां न्यसेत्तस्य नवरत्नं विशेषतः ॥ ३२ ॥

गोमेदं स्फटिकं चैव पुष्यरागमनन्तरम् ।
इन्द्रनीलं महानीलं वज्रं वैडूर्यमेव च ॥ ३३ ॥

खचिता पीठसर्वेषां (?) स्थापयेत्परितः क्रमात् ।
जलधारां प्रकुर्वीत सुषितमायतं (?) तथा ॥ ३४ ॥

29. a) AMMyS[2]SvT. पलाशेन for पालाशेन
d) AMMyS[2]T. भवेत् for पुनः

31. b) M. संयुतम् S[1]. सम्मितम् for संवृतम्
d) AMMyS[2]SvT. पद्मं for पत्रं

34. b) S[1]. reads परितः before स्थापयेत्

निम्नभागं न कुर्वीत अन्तरा खेटवर्जितम् ।
कुट्टिमं कुटिलाकारं ऋजु वा सौम्यमेव च ॥ ३५ ॥

सौख्यं सुलक्षणैर्युक्तं वृत्तं वा चतुरश्रकम् ।
भद्रपीठमिति ख्यातमुपपीठस्य लक्षणम् ॥ ३६ ॥

वक्ष्यामि शृणु राजेन्द्र ! यथावदवधारय ।
शुद्धपाषाणसंगृह्य (?) चतुरश्रं प्रकल्पयेत् ॥ ३७ ॥

गर्भभागं त्रिधा कृत्वा भागेनैकेन विन्यसेत् ।
कोणार्धमथवा सम्यक् पार्श्वभागे तु विन्यसेत् ॥ ३८ ॥

तदर्धं पादविस्तारं कर्णिकायाः समं भवेत् ।
पार्श्वतः पृष्ठतश्चैव अग्रे चैव महोत्कटे ॥ ३९ ॥

सिंहासनसमाकारमुपपीठमिदं भवेत् ।
कमले कमलाकारं पुरतः पार्श्वयोरपि ॥ ४० ॥

दलानि पङ्कजाकारं पद्मपत्रमथापि वा ।
वृत्तायतं सुवृत्तं वा दलानि परितः क्रमात् ॥ ४१ ॥

बेराणि चाङ्गुला भेदं (?) वक्ष्यामि शृणु सत्तम ।
चतुर्विंशाङ्गुलायामं मकुटस्योच्छ्रयं भवेत् ॥ ४२ ॥

अष्टादशाङ्गुलायामं यद्वा पञ्चदशाङ्गुलम् ।
मूलमस्याग्रनहनं किरीटस्य यथाक्रमम् ॥ ४३ ॥

35. c) S[1]. कुण्डलां for कुटिलां

37. b) AMyS[2]SvT. °तदव° for °वदव°
c) M. शुद्धं for शुद्ध°

39. a) M. नाथ for पाद°

42. a) M. भेदान् S[1]S[2]SvT. नेदं for भेदं

विंशता सप्तभिर्द्वाभ्यामेकेनापि यथाङ्गुलैः ।
तस्य मध्ये चतुर्दिक्षु पूरितानि प्रकल्पयेत ॥ ४४ ॥

शोभयेच्च महारत्ने रम्ये (?) चैव शिखामणिः ।
चतुर्दशाङ्गुलोत्सेधं कल्पयेत् केशबन्धनम् ॥ ४५ ॥

मुखपट्टकिरीटस्य विस्तीर्णं द्व्यङ्गुलं भवेत् ।
एकाङ्गुलममुष्यग्रं त्र्यङ्गुलं च शिखामणिम् ॥ ४६ ॥

पद्ममष्टदलं कुर्यादधस्ताच्च शिखामणिः ।
द्विगोलकायतश्चित्रै (?) रत्नैरपि यशो भवेत् ॥ ४७ ॥

शिरसः पृष्ठभागे स्याच्छिरश्चक्र तु वक्रवत् ।
विना कृतं तु ज्वालाभिः पद्मवद्वा यथारुचि ॥ ४८ ॥

प्रकल्पयेन्मध्यमतो चक्रगोलकमायतम् ।
नहनन्त्यङ्गुलास्तस्य नाहं स्यात खे खगायतम् ॥ ४९ ॥

मकरं गोलकोत्सेध कुर्यादष्टाङ्गुलायतम ।
तद्रक्ता सुमनोदाम निस्सृतं वहु चन्द्रवत ॥ ५० ॥

45. a) M. S[2]: om. रम्ये
b) M. अग्रे for रम्य
46. c) MS[1]. अमुष्यायं for अमुष्यग्र
47. b) M. शिखामणेः for शिखामणिः
c) M. त्रिगोलकायतं चित्रै
48. d) AMyS[1]S[2]SvT. चित्रं तु वक्रवत for श्चक्र तु वक्रवत्
S[1]. पद्मं यद्वा for पद्मवद्वा
49. a) A. मध्यतोमचग्रे गोलग° Sv. मध्यतोय चाग्रे गोलग
MyS[1]S[2]. मध्यतोम चक्रे गोलक for मध्यमतो चक्रगोलक°
c) M. न्याना for स्तस्य
50. c) M. तद्व्यक्ता सुमनोधाम

द्व्यङ्गुलं कण्ठसुमनः कण्ठे दामावलम्बयेत् ।
हाराम्त्र्यङ्गुलविस्तारमग्रयोर्नेत्रबन्धनम् ॥ ५१ ॥

मुक्ताविभूषितं मध्ये महारत्नपरिष्कृतम् ।
कुर्याच्च दक्षिणे वक्षःस्थले श्रीवत्समङ्गलम् ॥ ५२ ॥

अर्धोधिकं त्रिकोणं च तन्मध्ये मङ्गलालयाम् ।
द्विहस्तामुद्यनाम्भोजधारिणीं श्रियमद्भुताम् ॥ ५३ ॥

किरीटहारकेयूरसर्वाभरणभूषिताम् ।
कुर्यात् कोमलविस्तारं मुखे पद्माङ्गुलायतम् ॥ ५४ ॥

त्रिगुणं ब्रह्मसूत्रं स्यान्नाभेश्चापि प्रदक्षिणम् ।
एकाङ्गुलं चोत्तरीयं नेत्रबन्धेन बन्धयेत् ॥ ५५ ॥

विस्तीर्णं द्व्यङ्गुलं मध्यमग्रमेकाङ्गुलं भवेत् ।
मुक्तादामपरिष्कारं सर्वरत्नविभूषितम् ॥ ५६ ॥

कुक्षिबन्धनमाश्रयं नेत्रबन्धेन योजयेत् ।
मुखायामं च केयूरं कुर्यात् पूरितसन्निभम् ॥ ५७ ॥

सप्ताङ्गुलं च विस्तीर्णं नानारत्नपरिष्कृतम् ।
गोळिकाङ्गुलविस्तीर्णामायतां द्व्यङ्गुलेन च ॥ ५८ ॥

गुळिकानां त्रयं कुर्यात् नेत्रबन्धेन बन्धयेत् ।
सर्वरत्नपरिष्कारान् वलयांस्त्रीन् प्रकल्पयेत् ॥ ५९ ॥

51.　a) M. द्व्यङ्गुला for द्व्यङ्गुलं
　　b) AM. कर्णे for कण्ठे

54.　d) M. °युतम् S[1]. °यताम् for °यतम्

58.　c) M. गुलिकांकुल for गोलिकाङ्गुल°

एकाङ्गुलपरीणाहान् कटकैश्चोपशोभितान् ।
सौवर्णान्यङ्गुलीयानि बद्धानेकमणीनि च ॥ ६० ॥

परिणाहो भवेत्तेषां तद्विधस्त्रयतोऽपि वा (?) ।
मध्यमाङ्गुल्या यैतं मण्डयेदङ्गुलीयकैः (?) ॥ ६१ ॥

त्र्यङ्गुलं कटिसूत्रस्य विस्तारो रत्नशोभितम् ।
तन्मध्ये किचलीं चैव पञ्चाङ्गुलिसमायताम् (?) ॥ ६२ ॥

नानारत्नमयीं वापि यद्वा केवलपङ्कजाम् ।
कण्ठतश्चरणं यावत् लम्बयेदद्भुताकृतिम् ॥ ६३ ॥

अथवा मल्लिकाकारानाहतश्चतुरङ्गुलाम् ।
एवं तु लक्षणं सम्यक् नीतिशास्त्रस्य निश्चयः ॥ ६४ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां वेगादिलक्षणविधानो
नाम नवमोऽध्यायः ॥

60. b) MS¹T. °शोभिता for °शोभितान्

61. b) M. स्तु यथोपि for स्त्रयथोपि
e) MMy. वैतं for यैतं

62. b) MMy. शोभितः for शोभितम्
c) M. कचलि My. किचलीं for किचलीं

63. b) M. पङ्कजा for पङ्कजाम्
c) M. कर्णतं° for कण्ठत°

64. a) MS¹T. °कारां for °कारान्
d) MMyS¹. इति for नीति°

वातायनगतैकांशु चन्द्रिकानन दृश्यते (?) ।
ज्योत्स्नाष्ट रथरेणुः स्यात् रेणोरष्ट तिलं स्मृतम् ॥ १७ ॥

तिलाष्टं तु यवं प्रोक्तं यवाष्ट त्वङ्गुलिः स्मृता ।
व्रीहित्रयोच्छ्रयं वापि यवाष्टं तिर्यगेव च ॥ १८ ॥

अथवाङ्गुलिमानत्वं शृणुष्व नृपसत्तम ।
देशिकाङ्गुलिमध्यस्य मध्यरेखासमायतम् ॥ १९ ॥

मध्यमस्य करस्याथ करमध्याङ्गुलैस्तथा ।
मध्यपर्वसमां विद्धि मात्राङ्गुलमिति स्मृतः ॥ २० ॥

त्रिधाङ्गुलमिति प्रोक्ता स्पष्टाङ्गुलि महामते ।
विमानस्यापि बेरस्य मानं कार्यं तथाऽङ्गुले ॥ २१ ॥

अथवाष्टस्रुवस्यापि तोरणस्यापि वेदिकम् ।
होमाङ्गानि स्रुवादीनि पर्वः स्यदाङ्गुलिः स्मृतः ॥ २२ ॥

कूर्चमण्डलकुम्भादीन् करेणाङ्गुलिभिः स्मृतम् ।
अष्टमाङ्गुलकादीनां मानार्थं वदतो नृप ॥ २३ ॥

17. b) M. °नन् for °नन
c) A. रधरेण M. रपरेण for रथ (?) रेणुः
d) ASv. द्रोणो° for रेणो°

18 a) AMMyS²Sv. यवा प्रोक्ता for यवं प्रोक्तं
b) AMMySv. यवाष्टा for यवाष्टं

19 d) AMyS²SvT. °समायुतम् for °समायतम्

20. b) AMMyS²SvT. स्ततः for स्तथा
c) M. om. मध्यपर्व°

21. d) M. नाकार्यं ...

22. b) AMMyS²SvT. वेदिकान् for वेदिकम्
c) AMS¹. सर्वः for पर्वः

23. d) M. मानात्सं° for मानार्थं

द्वादशाङ्गुलमानं हि तालमित्यभिधीयते ।
तालद्वयं भवेद्धस्तमिति मानविदो विदुः ॥ २४ ॥

इत्युक्तं त्रिविधं मानमङ्गुलीनां प्रभेदतः ।
मानं प्रमाणमुन्मानं परिमाणं प्रमाणतः (?) ॥ २५ ॥

लम्बमानं षडेतानि मानानि कथयाम्यहम् ।
मानं यत्प्रतिमायामं तिर्यङ्मानप्रमाणतः ॥ २६ ॥

उन्मानं तत्प्रदेशे तु द्व्यन्तरमुपमानकम् ।
नाभिमानं प्रसूतं स्यादन्तरान्तरयोगकम् ॥ २७ ॥

षडेतन्मानमाख्यातं बेरस्याङ्गुलिभेदकम् ।
मकुटं पूर्वमेवोक्तं ललाटोच्छ्रायपञ्चकम् ॥ २८ ॥

अङ्गुली तु सुसूक्ष्मेण भेदस्तत्तद्वदेव तु ।
वक्षःस्थले चानने च सममानमुदाहृतम् ॥ २९ ॥

कक्षबाह्वन्तरे चैव एकाङ्गुलमुदाहृतम् ।
गलेषु सङ्गुलं प्रोक्तं पिठरे च महाङ्गुलम ॥ ३० ॥

पञ्चपञ्चप्रकारेण पञ्चमं पञ्चमाञ्चितम् ।
पञ्चविंशत्यङ्गुलानां बाहुदीर्घं प्रशस्यते ॥ ३१ ॥

बाह्वोरधश्चतुर्विंशत्यङ्गुलस्य प्रमाणकम् ।
मणिबन्धादधस्ताच्च दशाङ्गुलमिति स्मृतम् ॥ ३२ ॥

26. d) M. क्रियमाण° for तिर्यङ्मान°

27. d) S[1]T. °योगतः for °योगकम्

29. b) ASv. भेदस्तद्वदनेन तु MS[2]. भेदस्तद्वदेव न

32. b) ASv. प्रमाणतः for प्रमाणकम्

नाभेरूर्ध्वं सवक्षान्तमङ्गुलाष्टादश स्मृतम् ।
स्तनयोर्वृतमध्यान्तं पञ्चाङ्गुलमिति स्मृतम् ॥ ३३ ॥

नाभेरधस्तादृगुह्यान्तं दशाङ्गुलमितीरितम् ।
आजानु चोरुमध्यान्तं अङ्गुलाष्टदश स्मृतम् ॥ ३४ ॥

जानोरधस्तात्पादान्तं यावत्पञ्चदशाङ्गुलम् ।
पादं षडङ्गुलं प्रोक्तं विस्तृतं च दशाङ्गुलम् ॥ ३५ ॥

उरस्सपादहीनं वा अधमं प्रतिमोच्छ्रयम् ।
... मानमिति प्रोक्तं चित्र चाप्यर्धचित्रकम् ॥ ३६ ॥

पीठविस्तारमानं तु वक्ष्यामि नृपसत्तम ।
बेरोच्छ्रयं त्रयं कृत्वा भागैकं पीठिकोच्छ्रयम् ॥ ३७ ॥

चतुर्भागैकभागं वा आसने पीठिकोच्छ्रयम् ।
पञ्चभागैकभागं तु स्थानके पीठिकोच्छ्रयम् ॥ ३८ ॥

अथवा पीठमेवं वा कल्पयेच्छिल्पवित्तमः ।
पद्मपुष्पं भवेत्फुल्लमष्टपत्रं सकर्णिकम् ॥ ३९ ॥

द्वारात् पादांशविस्तारं तावदुत्सेधसंयुतम् ।
तस्य नालं भवेद्वृत्तं चतुरश्रं तु वा पुनः ॥ ४० ॥

वृत्तं शिवमिति प्रोक्तं चतुरश्रं पितामहः ।
हस्तमानं तदायामस्तन्मानं मानमुच्यते ॥ ४१ ॥

35. c) ASv. om. पादं षडङ्गुलं S[1]. om.
d) S[1]. om.

36. a) ASv. तस्य My. र...स्य S[1]. ...स्य S[2]. नरस्य for उरस्स
AMS[2]Sv. विहीनं for हीनं

39. d) AMMySvT. °पद्मं for °पत्रं

स्थानकस्येदमाख्यातमासनस्योच्यतेऽधुना ।
गर्भद्वारायताङ्गं तु पादपद्मोच्छ्रयं तु वा ॥ ४२ ॥

तावदायामविस्तारे पूर्ववच्छेषमुच्यते ।
एतन्मानेन शयनं कार्यं नैव कदाचन ॥ ४३ ॥

देवस्य बाहुमूलान्तं देवीनामिति चोच्छ्रयम् ।
स्तनान्तं वा नृपश्रेष्ठ उच्छ्रायः परिपठ्यते ॥ ४४ ॥

देवीनां दक्षिणे पद्ममुकुलं यदि विन्यसेत् ।
पद्मं तु वामहस्ते स्यान्महद्भयमवाप्नुयात् ॥ ४५ ॥

राजा कलहमाप्नोति तस्माद्यत्नेन वर्जयेत् ।
बहुबेरप्रतिष्ठायां देवीनां लक्षणं शृणु ॥ ४६ ॥

पार्श्वयोः सह देव्यौ च (वीभ्यां?) बेरे यत्र प्रतिष्ठितम् ।
तद्बेरं बहुबेरं स्यादिति शास्त्रस्य निश्चयः ॥ ४७ ॥

मत्स्यादिलोकपालानां प्रभया कल्पितस्ततः ।
बहुबेरं समाख्यातं एकबेरविधानतः ॥ ४८ ॥

पृथग्देव्याप्यसर्वत्र सर्वकारणसिद्धिदम् ।
वैकुण्ठे तु समासीनं सर्वसंहारकारणम् ॥ ४९ ॥

अनादिनिधनं विष्णुं प्रतिष्ठाप्य प्रपूजयेत् ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां देव्यादिमूर्तिलक्षणं
नाम दशमोऽध्यायः ॥

44. a) MAyS*SvT. पाद° for बाहु°

# एकादशोऽध्यायः

## (समाराधनोपकरणम्)

* * *

आराधनोपकरणलक्षणं प्रवदाम्यहम् ।
सु(सौ ?)वर्णं राजतं वापि ताम्रं वापि यथारुचि ॥ १ ॥

चतुस्तालप्रविस्तारं तदर्धं वार्धमेव वा ।
घृतपात्रप्रविस्तारं पञ्चाङ्गुलसमन्वितम् ॥ २ ॥

चतुष्पादं त्रिपादं वा यानदण्डाकृतिर्भवेत् ।
वृत्तं वा चतुरश्रं वा घृतध्वभ्रं च विंशतिम् ॥ ३ ॥

तदर्धं वाष्टमथवा द्वादशं वाथ षोडशम् ।
बहुनात्र किमुक्तेन युग्ममेव प्रदृश्यते ॥ ४ ॥

धूपदण्डं तथैवं स्यादङ्गारस्थलविस्तरम् ।
विंशदङ्गुलविस्तारं तदर्धं वार्धमेव वा ॥ ५ ॥

तस्यार्धं वा प्रकर्तव्यं यथाकाममथापि वा ।
नीराजनं घटाकारमग्रे दाडिमसन्निभम् ॥ ६ ॥

वृत्तायतं सुवृत्तं वा जलपूर्यप्रमाणकम् ।
शिवयोम्यं द्रोणयोम्यं तदर्धं वार्धमेव वा ॥ ७ ॥

1. d) S²T. वाथ for वापि

4. a) AMyS¹S²SvT. चाष्ट for वाष्ट
   d) S¹ प्रदश्यंते also

6. d) ASv. om. दा

7. b) M. °पूर° for °पूर्य°

पादविस्तारमानं तु षडङ्गुलसविस्तृतम् ।
एतन्नीराजनं प्रोक्तं मङ्गलादीपलक्षणम् ॥ ८ ॥

प्रवक्ष्यामि विशेषेण शृणु राजकुलोद्भव ।
एकहस्तप्रविस्तारं वृत्ताकारं यथाकृतिम् ॥ ९ ॥

मध्ये कीलकनालं स्यात् चतुरङ्गुलमायतम् ।
तत्पार्श्वे पद्मजालं तु अष्टपत्रमथापि वा ॥ १० ॥

द्वादशाङ्गुलपत्रं तु समावृत्य तु शिल्पिना ।
एतन्मङ्गलदीपं तु सलक्षणमुदाहृतम् ॥ ११ ॥

नळिकालक्षणं वक्ष्ये शृणुष्व नृपसत्तम ।
हविर्द्रव्यप्रमाणानि वृत्तानि परिकल्पयेत् ॥ १२ ॥

दर्वी हस्तायनामग्रमूल्योर्मण्डलाकृतिम ।
सुवर्णे राजतं वापि कांस्यं वा मृण्मयं तु वा ॥ १३ ॥

यद्वा वृत्तसरोजाभं कारयेच्छिल्पवित्तमः ।
पादुकालक्षणं वक्ष्ये शृणु राजकुलोद्भव ॥ १४ ॥

एकपादं द्विपादं वा वृत्ताकारं तु चक्रवत ।
तन्मध्ये चतुरङ्गुल्यं छिद्रिनानां सुवृत्तकम् ॥ १५ ॥

पादुकालक्षणं प्रोक्तं घण्टालक्षणमुच्यते ।
पालिकाकारकांस्येन उन्मत्तकुसुमाकृतिः ॥ १६ ॥

8. b) AMySv. विधिस्मृतम् for सविस्तृतम्
d) . अङ्गुलादिव for मङ्गलादीप
9. b) M. श्रियं for शृणु
11. a) M. पद्मं for पत्रं
13. a) AMMyS¹SvT. दर्वि for दर्वी

दण्डं द्वितालमुच्छ्रायमग्रे चक्रस्य लाञ्छनम् ।
चक्राकारं च शङ्खं वा लाञ्छयेत्तु तदग्रके ॥ १७ ॥

आयसेन तु नादं वा घण्टालक्षणलक्षितम् ।
मुखविस्तारमानं तु द्वितालार्धमिति वृत्तकम् ॥ १८ ॥

घटिकां वा प्रकुर्वीत दृढसन्धिसमन्वितम् ।
पञ्चघण्टा एकनालं चक्रमग्रे तु वा ततः ॥ १९ ॥

पञ्चदिक् पञ्चघण्टा च महानासासमन्वितम् ।
पञ्चघण्टा इति प्रोक्तं पञ्चभूतसुखावहम् ॥ २० ॥

पञ्चशुद्धिकरत्वं च पञ्चपूजाविधेः फलम् ।
आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ॥ २१ ॥

तस्माल्लक्षणपूर्वं तु कारयेच्छिल्पवित्तमः ।
वक्ष्यामि लक्षणं पूजापात्राणां चैव लक्षणम् ॥ २२ ॥

प्रस्थपूर्णाम्भसा कार्यं वक्त्रं चैव दशाङ्गुलम् ।
पीठे षडङ्गुलं कुर्यान्मध्ये वाष्टाङ्गुलं भवेत् ॥ २३ ॥

पञ्चपात्रं त्रिपात्रं वा एकपात्रमथापि वा ।
सौवर्णं राजतं वापि कांस्यं वा ताम्रमेव वा ॥ २४ ॥

एकाङ्गुलघनं प्रोक्तं वृत्ताकारं तु चक्रवत् ।
द्रोणपूरणयोग्यादि शिवयोग्यादि वा भवेत् ॥ २५ ॥

17. d) S[1]. तदग्रतः for तदग्रके
19. a) S[1]. adds त before वाग्र
b) ASv[2] om. त द्रस S[1]. दण्डग्रन्थि T. रथसन्धि for दृढसन्धि
20. b) S[1]. °नाद° for °नासा°
21 a) M. करं पञ्च for करत्वं च
M. adds the following after 21 cd—
कुर्याद्घण्टारवं तत्र देवताह्वानलाञ्छनम्

वृत्तायतं सुवृत्तं वा भाण्डं मज्जनलक्षणम् ।
घटिकालक्षणं वक्ष्ये यथावदवधारय ॥ २६ ॥

द्रोणयोग्याम्भसा पूर्णमथवा शिवयोग्यकम् ।
प्रस्थयोग्यकमथवा आननं हस्तविस्तृतम् ॥ २७ ॥

अन्तरालं दशाङ्गुल्यं धूर्तपुष्पाकृतिर्भवेत ।
गण्डूषार्थं तु देवानां पट्टिकां कारयेत क्रमात ॥ २८ ॥

लक्षणं पर्णपात्रस्य वक्ष्यामि नृपसत्तम ।
हस्तायतं वृत्तमेव त्रिंशदङ्गुलसूत्रकम् ॥ २९ ॥

भ्रामयेत् सूत्रपरित: पर्णपात्रस्य लक्षणम् ।
काळांजिलक्षणं वक्ष्ये यथा तदवधारय ॥ ३० ॥

उन्मत्तकुसुमाकारं वक्त्रमम्भोजसन्निभम ।
त्र्यङ्गुलं पादविस्तारं तदग्रे मण्डलाकृति: ॥ ३१ ॥

दण्डमण्डलविस्तीर्णं पुण्डरीकाभमेव च ।
ताम्रं वा कांस्यमथवा राजतं कनकं तु वा ॥ ३२ ॥

छत्राणां लक्षणं वक्ष्ये यथा तदवधारय ।
विस्तीर्णं पञ्चहस्तं स्यात चक्राकारं तु कारयेत ॥ ३३ ॥

---

26. b) MS[1]. भाण्ड° for भाण्डं

26. d) MMyT. यथा तदव° for यथावदव°

28. b) M. धूप for धूर्त°

30. a) M. चात्र for सूत्र°

31. d) M. om. ण्ड

32. c) AMyS[1]T. कांस्यं च मथवा M. कांस्यं तथा वापि for च कांस्य मथवा

दण्डं वेणुकया युक्तं पञ्चहस्तायतं शुभम् ।
छत्रलक्षणमित्युक्तं कारयेच्छिल्पवित्तमः ॥ ३४ ॥

दर्पणं प्रतिमामानं तदर्धं वाथ शोभनम् ।
वृत्तं कांस्यं महारत्नं खचितं वा यथावसु ॥ ३५ ॥

पादयुक्तमयुक्तं वा मुखमानमथापि वा ।
कार्तस्वरमथ प्रोक्तं राजतं वा यथातथम् ॥ ३६ ॥

प्रतिपद्मदलं मध्ये लाञ्छयेत् सर्वदिक्षु च ।
मुखोन्नतिं समाम्नातं विंशत्यूनमथापि वा ॥ ३७ ॥

शतं वाश्चर्यमाप्नोति यथाकाममथापि वा ।
एतद्दर्पणमित्युक्तं चामरस्य च लक्षणम् ॥ ३८ ॥

मृगपुच्छं श्वेतमेव आयतं च द्विहस्तकम् ।
दण्डायतं हस्तमात्रं दारुजं राजतं तु वा ॥ ३९ ॥

सौवर्णं तु प्रकारेण कारयेच्छिल्पवित्तमः ।
शृणुष्वावहितो राजन् यथापूर्वं मया श्रुतम् ॥ ४० ॥

शिबिकाकारमथवा यानाकारं यथाक्रमम् ।
चतुरन्तयानं यत्प्रोक्तं नानारत्नविभूषितम् ॥ ४१ ॥

---

35. a) M. दर्पण° for दर्पणं
35. c) M. यथा for महा
 d) M. महा for यथा
36. c) MMyS². मधिवृत्तां S¹T. मयी वृत्ता for °मथ प्रोक्तं
 d) M. राजतं वा MyS¹S²T. राजीवाय for राजीवास्यं
37. c) MMyS¹T. समामानं for समाम्नातं
38. ab) M. om. प्नोति यथाकाम
41. a) M. शिखरा° for शिबिका°
 b) S¹. यथाकृति for यथाक्रमम्
 c) M. चतुरन्तु° for चतुरन्त°

सप्ततालायतं दीर्घं पञ्चतालप्रविस्तरम् ।
चतुष्पादसमायुक्तं शय्जं कारयेत्ततः ॥ ४२ ॥

बलिपात्रस्य विस्तारं द्वादशाङ्गुलविस्तृतम् ।
वृत्तायतं सुवृत्तं वा तालकाकारवद्भवेत् ॥ ४३ ॥

अष्टपत्रं लिखित्वाथ सरोजाकृतिमेव वा ।
एकाङ्गुलघनं प्रोक्तं बलिपात्रमिति स्मृतम् ॥ ४४ ॥

चारुपात्रं प्रवक्ष्यामि ताम्रं वा मृण्मयं तु वा ।
ताराणि वा प्रकर्तव्यं कल्पयेत् क्रमयोगतः ॥ ४५ ॥

लक्षणं कोर्परस्यैव दशभारप्रपूर्वकम् ।
वक्त्रविस्तारमानं तु सप्तहस्तं प्रविस्तरम् ॥ ४६ ॥

पीठं तु एकहस्तं च अधिष्ठानतलान्वितम् ।
शुद्धमायसकं कृत्वा कारयेद्विश्वकर्मणा ॥ ४७ ॥

रौप्याकृतिं सुवर्णाभं लाञ्छयेत् सर्वदिक्षु च ।
साधारणं तु पात्राणां यथाक्रममथापि वा ॥ ४८ ॥

चेरकालक्षण वक्ष्ये पञ्चविंशाङ्गुलोच्छ्रयम् ।
वृत्ताकारं प्रकुर्वीत कांस्यं वा ताम्रमेव वा ॥ ४९ ॥

43. d) M. षोडशाङ्गुलमुच्यते
T. तन्तुकाकार for तालकाकार
M. reads verses 15 to 46 a of chapter XIII after 43 cd.

45. a) MyT. चारु° for चरु°
d) M. तर्पयेत् for कल्पयेत्
d) M. °हस्त° for °हस्तं

49. a) M. बेरका° for चेरका°

गन्ध्रमन्तर्गतं कार्यं मध्ये कङ्कणयान्वितम् ।
पक्षाङ्गुलं पादहीनं नहनं चतुरङ्गुलम् ॥ ५० ॥

दीपदण्डसमाकारं मध्ये निम्नोन्नतं यथा ।
अङ्गुलाङ्गुलभेदेन विस्तारं तत्समं भवेत् ॥ ५१ ॥

घण्ठाकारं यथा नालं सुषिरायतसम्मितम् ।
भद्राकारं पादपीठं पक्षिराट् हनुमान् तथा ॥ ५२ ॥

दर्पणं पार्श्वतः पृष्ठे अग्रे चैव यथाक्रमम् ।
एतल्लक्षणमित्युक्तं पालिकालक्षणं शृणु ॥ ५३ ॥

पादं षडङ्गुलं प्रोक्तं विस्तारार्धमथापि वा ।
गुणं सुगुणया युक्तं मध्ये दीर्घायतं भवेत् ॥ ५४ ॥

अजवत् कण्ठमध्ये तु अग्रे चोन्मत्तपुष्पवत् ।
भद्राकारं प्रकुर्वीत कोणभागत्रयाङ्गुलम् ॥ ५५ ॥

वृत्ताकारं शिखायुक्तं पादपीठं प्रशस्यते ।
त्र्यङ्गुलं जघनं मूले मुखे चैव शताङ्गुलम् ॥ ५६ ॥

स्वस्तिकाकारमथवा प्रकुर्याच्छिल्पवित्तमः ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां आराधनोपकरणविधानो नाम
एकादशोऽध्यायः ॥

54. c) M. सुवर्णया for सुगुणया

55. a) S[1]T. अब्ज° for अज°

d) AMyS[2]Sv. °भाग त्र्यङ्गुलम् M. °भागत्रयाङ्गुलम् for °भागत्रयाङ्गुलम

# द्वादशोऽध्यायः

## [आचार्यलक्षणदीक्षाविधिः]

* * *

आचार्यलक्षणं वक्ष्ये समासाच्छृणु भूपते ।
ब्राह्मणं योनिजं शुद्धं नियतं ब्रह्मवादिनम् ॥ १ ॥

भगवद्भक्तियुक्तं च प्रथमं वरयेत् सुधीः ।
तोताद्रिं पौण्ड्रवर्धनं च सालग्रामं मृगस्थलम् ॥ २ ॥

अनन्तपुरमित्येतत् पञ्चग्राममिति स्मृतम् ।
पञ्चग्रामप्रसूता ये चक्राब्जे मण्डले हरेः ॥ ३ ॥

पञ्चरात्रेण शास्त्रेण दीक्षासंस्कारसंयुताः ।
ते वै भागवता ज्ञेया ब्राह्मणाश्च महाश्रुताः ॥ ४ ॥

वंशे भागवतानां च प्रसूता ये च मानवाः ।
तेषां दीक्षाविधिर्नैव उपदेशश्च केवलम् ॥ ५ ॥

शास्त्राभ्यासश्च कर्तव्यः क्रियादिः वर्षसंख्यया ।
वर्षसंख्यावियुक्तैस्तु सर्वकर्म न कारयेत ॥ ६ ॥

तस्मात् सर्वप्रयत्नेन विज्ञानीया विचारणा ।
प्रायो विभागो मर्त्यानां कथ्यते तु चतुर्विधः ॥ ७ ॥

बालो युवा समो जीर्ण इत्येवं परिकल्पितः ।
आषोडशाब्दपर्यन्तं बाल इत्युच्यते बुधैः ॥ ८ ॥

2. b) ASv. धार° for वर°

3. a) MMyS¹S²SvT. °मित्येते for °मित्येतत्

4. d) ASv. ममाश्रि° for महाश्रु°

पञ्चविंशतिसंपूर्णवत्सरस्तु युवा भवेत् ।
अतः परं समो मर्त्यः षष्टिवर्षावसानकम् ॥ ९ ॥

अत ऊर्ध्वं नृपश्रेष्ठ जीर्ण इत्यभिधीयते ।
योग्यो नित्यार्चनविधौ बालो वाथ युवा भवेत् ॥ १० ॥

नैमित्तिकादिकार्याणि अङ्कुरेण युतानि च ।
महोत्सवपवित्रादि कारयेन्न कदाचन ॥ ११ ॥

अज्ञानाद्यदि वा कुर्यात् तद्ग्रामं नाशयेद्ध्रुवम् ।
तस्मात्सर्वप्रयत्नेन वर्जयेत्तौ विचक्षणः ॥ १२ ॥

अङ्कुरार्पणपूर्वाणि यानि कर्माणि भूपते ।
तानि सर्वाणि कर्माणि समेनैव तु कारयेत् ॥ १३ ॥

अथवा कारयेत्तानि जीर्णेन विदुषा तथा ।
आचार्यलक्षणं प्रोक्तं शृणु दीक्षाविधानकम् ॥ १४ ॥

पूर्ववन्मण्टपं कृत्वा प्रतिष्ठोक्तविधानतः ।
द्वारतोरणकुंभादि वेदिकुण्डानि कारयेत् ॥ १५ ॥

मार्जनं लेपनं चैव मण्टपादि विशेषतः ।
रजसा रञ्जयेत् पूर्वं सन्दामैर्विविधैस्ततः ॥ १६ ॥

अलङ्कृत्य यथान्यायं आरभेनाङ्कुरार्पणम् ।
समिदाद्यग्निसंभारान् दशम्यां च प्रदोषके ॥ १७ ॥

अथवा संप्रकुर्वीत एकादश्यपराह्णके ।
चक्राब्जमण्डलं कृत्वा पञ्चवर्णेन शोभयेत् ॥ १८ ॥

कुम्भं च हेमादिमयमथवा मृण्मयं तु वा ।
क्षालयेदथ तोयेन सूत्रवस्त्रादि वेष्टयेत् ॥ १९ ॥

उत्पूर्य चाम्भसा कुम्भान् स्थापयेद्धान्यराशिषु ।
हरिं कुम्भे समावाह्य अर्चयेद्देशिकोत्तमः ॥ २० ॥

भगवद्बिम्बमादाय वेद्याः पश्चिमभागके ।
भद्रासने समारोप्य वस्त्राभरणमाल्यकैः ॥ २१ ॥

अलङ्कृत्य यथान्यायमर्चयेद्देशिकोत्तमः ।
रक्षाबन्धं ततः कृत्वा देवहस्तेन तु देशिकः ॥ २२ ॥

बन्धयित्वा दृढीकृत्य रक्षां कुर्यात्तु देशिकः ।
सुस्नातः सोत्तरीयश्च सोर्ध्वपुण्ड्रो जितेन्द्रियः ॥ २३ ॥

पुष्पाञ्जलिं तु तोयेन देवदेवस्य पादयोः ।
अनुज्ञां याचयेत्तत्र देवदेवस्य हस्तके ॥ २४ ॥

भक्तैर्भागवतैस्सार्धं यागशालां प्रवेशयेत ।
कुम्भमण्डलबिम्बादीनर्चयेद्देशिकोत्तमः ॥ २५ ॥

आरभेद्धोमकर्माणि समिदाज्यैर्यथाक्रमम् ।
अष्टोत्तरशतं हुत्वा अष्टाविंशतिरेव वा ॥ २६ ॥

मूलमन्त्रेण जुहुयात् प्रार्थयेदनलेश्वरम् ।
आचार्यः शाययेत् वेदिमध्ये दर्भममन्विते ॥ २७ ॥

सुस्वप्नदर्शने तत्र मुक्तिः करतले स्थिता ।
दुःस्वप्नदर्शने तत्र महाशान्तिं च कारयेत् ॥ २८ ॥

ब्राह्मे मुहूर्ते चोत्थाय वेदोक्तेन विधानतः ।
सन्ध्यादिवन्दनं कुर्यात् पश्चात् गेहं प्रवेशयेत् ॥ २९ ॥

स्तुतिमङ्गलघोषैश्च प्रणम्य च मुहुर्मुहुः ।
यागशालां प्रविश्याथ होमं कुर्याच्च पूर्ववत् ॥ ३० ॥

पूर्णाहुत्यन्तमखिलं संपाताज्यं समानयेत् ।
चरुशेषं गृहीत्वाथ कबलीकृत्य यत्नतः ॥ ३१ ॥

त्रींश्च पिण्डान् गृहीत्वाथ गच्छेद्देवस्य सन्निधौ ।
निधाय तान् प्रणम्याथ हस्तं प्रक्षालयेत्ततः ॥ ३२ ॥

यागशालां प्रविश्याथ अर्चयेत् कुण्डदेवताम् ।
मण्डलस्थं च देवेशं कुम्भमध्ये समाह्वयेत् ॥ ३३ ॥

अग्निमध्यगतं देवं दीपकुम्भे नियोजयेत् ।
कुम्भांस्तत्र समादाय प्रविशेद्देवसन्निधौ ॥ ३४ ॥

निक्षिप्य पूर्ववत् कुम्भान् प्रोक्षयेद्देशिकोत्तमः ।
भक्षयित्वा त्रयः (?) पिण्डान् आचामं कारयेत्ततः ॥ ३५ ॥

प्रणम्य देवदेवेशं स्वगृहं संप्रवेशयेत् ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां आचार्यलक्षणस्वयंदीक्षाविधिर्नाम
द्वादशोऽध्यायः ॥

# त्रयोदशोऽध्यायः

## [ अङ्कुरार्पणविधिः ]

* * *

अथातः संप्रवक्ष्यामि अङ्कुरार्पणमुत्तमम् ।
उत्सवे स्नपने चैव प्रोक्षणे स्थापने तथा ॥ १ ॥

अन्ये च मङ्गले कार्ये द्विविधं तत्समुच्यते ।
भद्रं क्षुद्रं च सर्वेषु यागं पूर्वे (गात् पूर्वं ?) नवे तथा ॥ २ ॥

पञ्चमे सप्तमे चैव दिने चैवाङ्कुरार्पणम् ।
एवं यागं समुद्दिश्य कृते तत्राङ्कुरार्पणे ॥ ३ ॥

यागे तस्मिन् समाप्ते तु प्राप्ते नैमित्तिकान्तरे ।
तदन्यदपि कर्तव्यं अङ्कुरार्पणमुत्तमम् ॥ ४ ॥

अधिवासदिनं मुख्यं सयुग्मं तु प्रचक्षते ।
तत्प्रोक्षणदिनं मुख्यं अयुग्ममिति चोच्यते ॥ ५ ॥

प्रतिपच्च द्वितीया च तृतीयं च चतुर्थकम् ।
पञ्चमे षष्ठके चैव नवमे दशमे तथा ॥ ६ ॥

तत्र कालं (क्रमं ?) प्रवक्ष्यामि प्रथमं स्थापनं तथा ।
.................... तृतीयं नामधेयकम् ॥ ७ ॥

चतुर्थं वर्णभेदं च पञ्चमं देवतानपि (?) ।
षष्ठकं सूत्रपातं च शोधयेत पद्ममध्यकम् ॥ ८ ॥

6. b) MMyS²T. °के for °कम्
8. c) MMyS¹S²T. बन्धं for पातं
d) MT. पद्मं for पद्म

सप्तमं बीजविन्यासं अष्टमं स्थापनं चरेत् ।
कर्मारम्भे तु नवमं दशमं क्रममेव च (?) ॥ ९ ॥

प्रतिष्ठासूत्सवे चैव प्रोक्षणे स्नपनेऽपि वा ।
विषुवे चैव संक्रान्त्यामयने ग्रहणेऽपि वा ॥ १० ॥

शुभनक्षत्रयोगे च जन्मऋक्षोत्सवेऽपि च ।
अमावास्योत्सवे चैव प्रायश्चित्तेषु सर्वशः ॥ ११ ॥

आकस्मिकोत्सवे चैव अन्यस्मिन्नपि चोत्सवे ।
अङ्कुरार्पणपूर्वं तु सर्वकर्म तु कारयेत् ॥ १२ ॥

पालिका घटिका चैव शरावं च त्रिधा मतम् ।
सौवर्णं राजतं वापि ताम्रजं मृण्मयं तु वा ॥ १३ ॥

पालिकाष्टदशाङ्गुल्यो क्रममात्राङ्गुलेन तु ।
पालिकामुखविस्तारं षोडशाङ्गुलमुच्यते ॥ १४ ॥

तदर्धं पादविस्तारं तत्षड्भागैकमष्टकम् ।
विस्तारस्य त्रिभागैकवर्धितं बिलमुच्यते ॥ १५ ॥

एवं पादतमं (लं ?) प्रोक्तं शेषदण्डमिहोच्यते ।
विस्तारस्य त्रिभागैकं दण्डविस्तारमुच्यते ॥ १६ ॥

पालिकालक्षणं प्रोक्तं घटिकालक्षणं शृणु ।
घटिकाघटविस्तारं अष्टाङ्गुलमुदाहृतम् ॥ १७ ॥

10. a) MyS[1]T. °षु° for °सू°; M. adds the following, after a)
'प्रायश्चित्तेषु सर्वशः । आकस्मिकोत्सवे चैव'

15. M. reads verses 15 to 46 a after verse No. 43 of chapter XI.

पालिकापादवत् कुर्यात् दण्डं वै चतुरङ्गुलम् ।
पञ्चवक्त्रसमायुक्तां घटिकां कारयेद् बुधः ॥ १८ ॥

शरावमुखविस्तारं अष्टाङ्गुलमुदाहृतम् ।
तदर्धं पादविस्तारं उत्सेधोऽष्टाङ्गुलोत्तमम् ॥ १९ ॥

नाहं स्यात् पालिकानां च विस्तारार्धेन वर्धनम् ।
कालं भिन्नं च सुषिरं भेदच्छेदं च लीनकम् ॥ २० ॥

वर्जयेत्तु प्रयत्नेन साधयेल्लक्षणान्वितम् ।
ईशो विष्णुर्विरिञ्चिश्च पालिकाद्यधिदेवताः ॥ २१ ॥

प्रत्येकमष्टकं वापि तदा स्थापनमारभेत ।
प्रासादस्याग्रके वापि दक्षिणे चोत्तरेऽपि वा ॥ २२ ॥

गोमयालेपिते शुद्धे मण्टपे समलङ्कृते ।
प्राक्सूत्रं वसुभिः कुर्यादुदक्सूत्रं तथैव च ॥ २३ ॥

मध्ये व्योमपदं गृह्य लेपयेदभितोऽष्टकम् ।
तन्नवाभ्यन्तरे त्यक्त्वा चतुर्दिक्षु यथाक्रमम् ॥ २४ ॥

द्वारार्थकं महाशासु पदमेकं परित्यजेत् ।
स्थण्डिलं कारयेद्धीमानष्टद्रोणेन शालिना ॥ २५ ॥

तस्य मध्ये लिखेत् पद्ममष्टपत्रं सकर्णिकम् ।
स्थापयेत् कर्णिकादीनां न्यसेन्मध्ये तु देशिकः ॥ २६ ॥

तन्मध्ये चन्द्रकुम्भं च स्थापयित्वा दृढं यथा ।
ससूत्रं सापिधानं च सवस्त्रं परिपूरितम् ॥ २७ ॥

18. M. reads 19 cd in betwen verses 17 and 18 also.
27. d) M. °पूजि° for °पूरि°

पूजयित्वा यथान्यायं वारुणं मन्त्रमुच्चरन् ।
पायसान्नं ददेत् पश्चात् ताम्बूलं तु निवेदयेत् ॥ २८ ॥

पालिके द्वे न्यसेद्धीमान् द्वाराणां पार्श्वयोर्द्वयोः ।
विन्यसेद्धटिके द्वे तु कोणेष्वेव पदद्वयोः ॥ २९ ॥

शेषेषु च शरावाणि स्थापयेत हृदयेन तु ।
दर्भाग्रैश्च कुशाभिर्वा निश्छिद्रं सुषिरे कुरु ॥ ३० ॥

वालुकैश्च करीषैश्च पालिकादीनि पूरयेत् ।
पूजयित्वा यथान्यायं पुण्याहं तत्र कारयेत् ॥ ३१ ॥

ततो जनेभ्यस्ताम्बूलं दापयेत्तु विशेषतः ।
बीजानि वापयेत पश्चात् पयसा भावितानि वै ॥ ३२ ॥

तिलसर्षपमुद्गानि मार्षशिवाढकानि च (?) ।
कुलुत्थं सप्तबीजानि हृदयेन विशेषतः ॥ ३३ ॥

आचार्यो वापयेद् बीजान् प्राङ्मुखो वाप्युदङ्मुखः ।
सोमकुम्भस्थतोयेन पालिकादीनि सेचयेत् ॥ ३४ ॥

आचार्यं पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ।
भद्रमेवं समाख्यातं क्षुद्रं वक्ष्ये शृणु अथ ॥ ३५ ॥

प्राङ्मुखः पञ्चसूत्राणि उदक्सूत्रं तथैव च ।
मध्यमेव चतुष्पादं स्थण्डिलं कारयेत्सुधीः ॥ ३६ ॥

28. b) M. °च्चरेत् for च्चरन्
29. a) M. पालिकादौ for पालिके द्वे
d) MT. पदं for पद°
33. c) MS¹S²T. कलम्थं for कुलुत्थं
34. a) AMS¹T. धीमान् for बीजान्

मध्यमे सोमकुम्भं तु पूजयेत् पूर्ववद् बुधः ।
हृदयेन तु मन्त्रेण पालिकादीनि विन्यसेत् ॥ ३७ ॥

शरावं पालिकां चैव घटिकां च यथाक्रमम् ।
ईशानादिममारभ्य प्रत्येकं युगसंख्यया ॥ ३८ ॥

पूर्वोक्तविधिना सर्वं कारयेद्देशिकोत्तमः ।
विधिना सर्वपात्राणि स्वनुगुप्तानि धापयेत (?) ॥ ३९ ॥

आरक्तानि च कृष्णानि श्यामलानि तथैव च ।
आधूम्राणि च कुब्जानि तथा तिर्यग्गतानि च ॥ ४० ॥

अङ्कुराण्यशुभान्यत्र तद्दोषशमनाय च ।
अस्त्रमन्त्रं समुच्चार्य जुहुयाच्छतसंख्यया ॥ ४१ ॥

वास्तुप्रदक्षिणं कुर्यात् यथाकाममथापि वा ।
अन्येषां चैव सर्वेषां वर्जयेत्तु प्रदक्षिणम् ॥ ४२ ॥

प्राङ्मुखोदङ्मुखो वाथ निविशेद्देशिकोत्तमः ।
विष्वक्सेनं हनूमन्तं तार्क्ष्यं वा चक्रराजकम् ॥ ४३ ॥

मकुटादिविशेषेण अलङ्कृत्य विशेषतः ।
नदीनदतटाकेषु कान्तारे वा विशेषतः ॥ ४४ ॥

शुद्धस्थानमनुप्राप्य शुद्धिं कृत्वा महीतलम् ।
गन्धादिना समभ्यर्च्य हृदयेन तु देशिकः ॥ ४५ ॥

---

38. a) M. °कादींश्च for °कां चैव
b) M. घटिकांश्च for घटिकां च
d) S¹. °संज्ञया for °संख्यया
40. b) S¹. मङ्गलानि for श्यामलानि
c) AMyS²Sv. कुम्भानि for कुब्जानि
43. c) M. adds 39 cd after 43 ab.
45. b) AMMyS²SvT. °ही तदा for हीतलम्

बिम्बमभ्यर्च्य विधिना गन्धपुष्पादिना बुधः ।
खानयेद्ब्रह्ममन्त्रेण मृदं संगृह्य कामतः ॥ ४६ ॥

मृदमभ्यर्च्य विधिना प्रदक्षिणमथाचरेत् ।
प्रविशेदालयं पश्चात् बीजनिर्वापमारभेत् ॥ ४७ ॥

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां
अङ्कुरार्पणविधिर्नाम
त्रयोदशोऽध्यायः

46. d) S[1]. °ग्राह्य for °गृह्य
48. b) S[1]. पुण्य° for पुण्यां

# चतुर्दशोऽध्यायः

## [ प्रतिष्ठाविधानम् ]

* * *

प्रतिष्ठालक्षणं वक्ष्ये शृणुष्व नृपसत्तम ।
पूर्ववन्मण्डपं कृत्वा कारयेच्छिल्पवित्तमः ॥ १ ॥

तन्मध्ये वेदिकां कृत्वा पञ्चहस्तप्रविस्तराम् ।
चतुरश्रं प्रकुर्यात्तु उच्छ्रायं हस्तमात्रकम् ॥ २ ॥

दर्पणोदरवत् कुर्याद्यथाकाममथापि वा ।
त्रितालं वेदिकायां तु कुण्डं कुर्याद्विचक्षणः ॥ ३ ॥

पूर्वे तु चतुरश्रं तु चापाकारं तु दक्षिणे ।
वृत्तकुण्डं पश्चिमे च फुल्लपद्मं तथोत्तरे ॥ ४ ॥

योन्याकारं चाग्निकोणे त्रिकोणान्तं तु नैर्ऋते ।
कुण्डं कुर्यात् प्रपूर्वे तु वायव्ये तु षडश्रकम् ॥ ५ ॥

ईशान्यां चतुरश्रं तु नवाश्रं परिकल्पयेत् ।
पञ्चमूर्तिप्रतिष्ठायां चतुरश्रं प्रकल्पयेत् ॥ ६ ॥

एकमूर्तिप्रतिष्ठायां एककुण्डं प्रकल्पयेत् ।
चतुर्विंशाङ्गुलं सूत्रं आयामं विस्तृतं समम् ॥ ७ ॥

चतुरश्रं प्रकुर्वीत चतुरश्रं विधीयते ।
चापः षष्ट्यङ्गुलं प्रोक्तं नारिः (?) षट्त्रिंशदङ्गुलम् ॥ ८ ॥

---

4. a) S[1]. वा for तु
6. d) MMyT. °ग्नि for °श्रं

चापकुण्डं भवेदेतद्यथा षट्त्रिंशदङ्गुलम् ।
पातयेत् त्रिगुणेनैव त्रिगुणं विद्यते स्फुटम् ॥ ९ ॥

पञ्चाशदङ्गुलं सूत्रं मध्यतो भ्रामयेत्ततः ।
वृत्तकुण्डं भवेदेवं पद्मकुण्डं तदेव तु ॥ १० ॥

पद्मपत्रसमं कुर्यात् कर्णिकादलसंयुतम् ।
यथावृत्तं प्रमाणं हि तावत् पद्मस्य लक्षणम् ॥ ११ ॥

चतुरश्रा भवेद्वेदिः कुण्डप्राचीनभूतले ।
कल्पयेत पूर्ववत् कृत्वा प्रकुर्याच्छिल्पवित्तमः ॥ १२ ॥

अथ वक्ष्यामि राजेन्द्र तोरणानां च लक्षणम् ।
अश्वत्थोदुम्बरं चैव न्यग्रोधं तु तथैव च ॥ १३ ॥

प्लक्षश्चैव तु चत्वारो तोरणार्थं तरुः स्मृतः ।
दारुसारं प्रसंगृह्य अवक्रं ग्रन्थिवर्जितम् ॥ १४ ॥

तदुत्सेधमथो वक्ष्ये तोरणानाञ्च सर्वतः ।
मण्डपद्वारतुल्यं वा पादं शक्यमथापि वा ॥ १५ ॥

तदर्धं द्विगुणं वापि स्तम्भोत्सेधसमं तु वा ।
पञ्चहस्तसमो वापि चतुर्हस्तं तु वा पुनः ॥ १६ ॥

तदर्धं पट्टिकाकारं तोरणानि च कारयेत् ।
दशतालं तदायामः तदर्धं पट्टिका भवेत् ॥ १७ ॥

9. d) S²T. त्रिकोणं for त्रिगुणं
10. a) A. सूत्र° for सूत्र
d) S¹. तदैव for तदेव
11. c) M. यथावृत्त° for यथावृत्तं
12. a) S¹S². देदि° for °द्वेदिः
16. a) M. तद्दण्डं for तदर्धं

स्तम्भयोर्मूलनाहं स्याद् द्वात्रिंशाङ्गुलमीरितम् ।
तयोर्मध्ये तु नाहं तु अष्टाविंशतिरङ्गुलम् ॥ १८ ॥

तदग्रयोस्तु नाहं स्यात् चत्वारिंशाङ्गुलोन्नतम् ।
स्तम्भायामं त्रिधा कृत्वा मूलभागे युगाश्रकम् ॥ १९ ॥

मध्यभागे तु वस्वश्रं ऊर्ध्वभागे तु वर्तुलम् ।
अथवा स्तम्भनाहं स्यान्मूलमध्याग्रकेषु च ॥ २० ॥

चतुर्विंशद्विंशतिर्वा षोडशाङ्गुलमिष्यते ।
षोडशाङ्गुलनाहं वा पादादग्रं समन्ततः ॥ २१ ॥

स्तम्भयोर्नाहमुक्तश्च यथाशोभं भवेत्ततः ।
स्तम्भयोरग्रतः कुर्यात् पद्मकुड्मलवद्भवेत् ॥ २२ ॥

अथवाग्निशिखावापि यथाशोभं तु कारयेत ।
स्तम्भोत्सेधार्धमानेन विस्तारं पट्टिके उभे ॥ २३ ॥

पट्टिकाद्वयविस्तारं द्वादशाङ्गुलमेव वा ।
अष्टाङ्गुलं वा कुर्वीत षोडशाङ्गुलमायनम ॥ २४ ॥

चतुरङ्गुलविस्तारं पट्टिकाधं तु पङ्कजम् ।
स्तम्भं चतुर्धा विभजेद्देवभागं क्षितौ क्षिपेत ॥ २५ ॥

याज्ञिकान् वृक्षसंगृह्य यथाकाममथापि वा ।
द्वारप्रमाण वा कुर्यात् प्रमाणं पुरुषायनम् ॥ २६ ॥

नहनं बाहुदण्डः स्यात् यथाकाममथापि वा ।
एवं लक्षणसंयुक्तं कारयेत्तोरणानि च ॥ २७ ॥

24. c) MyS¹S²SvT. प्र for वा
26. a) M. वृक्षान् for वृक्ष°

वक्ष्यामि लक्षणं चाष्टमङ्गलं पृथिवीपते।
याज्ञिकान् वृक्षानादाय क्षीरवृक्षं विशेषतः ॥ २८ ॥

आयाममेकहस्तं स्यात् विस्तारं च षडंशकम्।
घनत्रयाङ्गुलं प्रोक्तं रत्नाभं श्वेतवर्णकम् ॥ २९ ॥

पीताभं पङ्कजाभं च राजराष्ट्रसुखावहम्।
इत्येवं बहुधा राजन् अष्टमङ्गललक्षणम् (?) ॥ ३० ॥

अप्रशस्तेषु योगेषु वर्जयेत् स्थापनक्रियाम्।
अयनं दक्षिणं दुष्टं प्रशस्तं चोत्तरायणम् ॥ ३१ ॥

शुक्लपक्षे चतुर्थी च अष्टमी नवमी तथा।
चतुर्दशी पञ्चदशी प्रतिपच्चाशुभाः स्मृताः ॥ ३२ ॥

यमाग्निपैतृसर्वाणि श्रविष्ठा चैव वारुणम्।
ज्येष्ठा च त्रीणि पूर्वाणि वर्जनीया विशेषतः ॥ ३३ ॥

कृष्णपक्षे तु वा कुर्यात् प्रशस्तं स्थापनं हरेः।
राशिकेषु धनुश्चैव चतस्रश्चरराशयः ॥ ३४ ॥

अप्रशस्ताश्च विज्ञेयाः शेषाश्च शुभदाः स्मृताः।
सितसोमजगुर्विन्दुवाराः श्रेष्ठतमाः स्मृताः ॥ ३५ ॥

अशुभा रविसौराणां शुभयोगाः शुभप्रदाः।
रोहिण्यनिलसंयुक्तः शनिवारस्तु शोभनः ॥ ३६ ॥

पूषासवितृसंयुक्तः सूर्यवारो वरः स्मृतः।
विश्वेदेवाश्विनीयुक्तः कुजवारो वरः स्मृतः ॥ ३७ ॥

शुभानां होरकाश्चैव द्रेक्काणं दर्शनं शुभम्।
शुभानामुभयं शस्तं तत्र शस्योदयस्तु वा ॥ ३८ ॥

32. d) M. स्मृता शुभा for शुभा स्मृता

लग्नस्य नैधनस्थाने ग्रहान् सर्वांश्च वर्जयेत् ।
द्वादश्यैकादशी चैव पञ्चमी च द्वितीयका ॥ ३९ ॥

षष्ठ्यष्टमी च नवमी सूर्यादिभिः क्रमान्विताः ।
दग्धवारा इति ज्ञेयाः स्थापनादिषु वर्जयेत् ॥ ४० ॥

पूषा च नवमीयुक्ता अश्विनी च द्वितीयया ।
पुष्या वैष्णवसंयुक्ता सितवारोत्तरेण तु ॥ ४१ ॥

सौम्येन गुरुवारस्तु उत्तराषाढसंयुतम् ।
सोमवारस्तु हस्तेन चाश्विनीयुक्तवारका ॥ ४२ ॥

एते चाशोभनाः प्रोक्ताः कुर्युः प्राणिविनाशनम् ।
पापग्रहसमायुक्तं मुक्त्वा राशिषु मध्यगे ॥ ४३ ॥

गण्डस्थानं व्यतीपातं पृष्ठकाणं च संक्रमम ।
कण्टकं ब्रह्मदण्डं च उल्कापातं च दग्धकम् ॥ ४४ ॥

ग्रहणं वधनक्षत्रं शूलं वा भूमिकम्पनम ।
कालं च कालदण्डं च वर्जयेत्तु प्रयत्नतः ॥ ४५ ॥

प्रतिष्ठां वर्जयेज्जीवभार्गवास्तमयेऽपि वा ।
एवं परीक्ष्य बहुधा स्थापनं च समाचरेत ॥ ४६ ॥

शिल्पिभिर्निर्मितं बेरं क्षीरेणैवाभिषेचयेत ।
स्नपनं कारयेत् पश्चात् अष्टोत्तरशतं क्रमात ॥ ४७ ॥

कूर्चेनोद्वर्तनं कुर्यात् बिम्बं बेरं च शुद्धिदम् ।
वीक्षयेद्देवगात्रं तु निषिञ्चेत् तिलतैलकम् ॥ ४८ ॥

39. b) M. गृहान् for ग्रहान्
45. a) MS[1] गृहाणां for ग्रहणं

उरः कण्ठः शिरः कुक्षिर्बाहूपार्श्वौ च कूर्परौ ।
मणिबन्धं च इत्येते महाङ्गं संप्रचक्षते ॥ ४९ ॥

नासिका श्रोत्रनेत्रं च चिबुकोष्ठौ तथैव च ।
चक्रं च मकुटं पाणिपादाङ्गुल्यं तथैव च ॥ ५० ॥

बेरं च गुह्यकं पृष्ठमुपाङ्गं परिकीर्तितम् ।
आसप्तदिवसान्तं च क्रियते चेत् घटस्थितम् ॥ ५१ ॥

बालाल्यं ततः कृत्वा पूर्वोक्तेन विधानतः ।
यद्रूपं च यथा मानं तद्रूपं तस्य मानता ॥ ५२ ॥

मानहीने तु दुर्भिक्षमधिके शक्तिनाशनम् ।
मानाधिके वा हीने वा शिल्पिनं हन्ति देशिकम् ॥ ५३ ॥

चित्राभासेऽर्धचित्रे वा तथा पटमये तथा ।
छायाधिवसनं कुर्यादन्ये तु जलवासनम् ॥ ५४ ॥

जलाधिवासनं कुर्यात् शूलस्थापनवद्भवेत् ।
घटानामाकृतिं वक्ष्ये शृणुष्व नृपसत्तम ॥ ५५ ॥

पञ्चविंशाङ्गुलायामं विस्तारं तत्समं भवेत् ।
विंशदङ्गुलमानं वा उदरं तद्वदेव तु ॥ ५६ ॥

अष्टादशाङ्गुलोच्छ्रायं द्वादशं षोडशं ततः ।
महाकुम्भं तु कुर्वीत तदर्धं च समाचरेत् ॥ ५७ ॥

50. a) AMyS¹S²SvT. °नेत्रे for °नेत्रं
51. d) ASv. चेत् क्रिया° M. च जय° for चेत् घट°
53. b) AMyS¹S²SvT. शत्रु° for शक्ति°
57. b) M. तथा for ततः

कुम्भस्यार्धे च मानेन वर्धनीं कारयेत्ततः ।
तस्योदरे न्यसेद्द्रोणां यथालोचनसुप्रियम् ॥ ५८ ॥

अष्टाङ्गुलसमुच्छ्रायभाक्कृतिं कुम्भवत्तरम् ।
द्वारकुम्भमिति प्रोक्तं कलशस्तत्र उच्यते ॥ ५९ ॥

षडङ्गुलं तदुच्छ्रायं नालिकेरफलोपमम् ।
कलशाकार इत्येव देवस्य स्नपनेषु च ॥ ६० ॥

अपक्वं मानहीनं च कालमण्डलवर्जितम् ।
छिद्रस्फोटसमायुक्तं सभिन्नं मृदुभावितम् ॥ ६१ ॥

तत्कुम्भं वर्जयेत्तस्मिन् लोभाद्वा ग्राहयेद्यदि ।
ततः प्रभृति तद्यागो निष्फलः स्यान्न संशयः ॥ ६२ ॥

कांस्यनादसमायुक्तं पक्वबिंबफलोपमम् ।
महाकुम्भं तु निर्दोषं क्षालयेच्छुद्धवारिणा ॥ ६३ ॥

प्रोक्षयेत् पञ्चगव्येन स्थापयेद्दक्षिणे करे ।
तन्तुभिः क्रमयोगेन वेष्टयेन्मूलविद्यया ॥ ६४ ॥

महाकुम्भं त्रिसूत्रेण वर्धनीं च द्विसूत्रतः ।
कलशांस्त्वेकसूत्रेण अन्तरं यवमात्रकम् ॥ ६५ ॥

सूत्रावलम्बनं यत्र तदम्बरमिहोच्यते ।
यत्र सूत्रं समाप्तं तु तन्मुखं वक्त्रमुच्यते ॥ ६६ ॥

तत्पुष्पं दृष्टिरित्युक्तं कूर्चं तस्य शिखा भवेत् ।
तद्वृत्तं वक्ष इत्युक्तं तन्मध्यं कुक्षिरेव च ॥ ६७ ॥

61. d) M. नाभि संमृदु° for सभिन्नं मृदु
65. c) M. कलशं लेक° for कलशांस्त्वेक°
67. b) M. मुखाद् for शिखा

तत्पार्श्वौ पाणिपादौ च गात्रमित्यभिधीयते ।
सूत्रं यज्ञोपवीतं च तद्वस्त्रं वस्त्रमेव च ॥ ६८ ॥

तद्बन्धनास्यग्रहणं (?) पल्लवं श्रोत्रमुच्यते ।
तद्बलमग्निरित्युक्तं जलं रुधिरमेव च ॥ ६९ ॥

तच्चर्म मृण्मयं ज्ञेयं तत्फलं मांसमेव च ।
सुवर्णं शक्तिरित्युक्तं पञ्चलोहं तु धातवः ॥ ७० ॥

मणिमुक्ताप्रवालं च वज्रं वैडूर्यमेव च ।
नीलं मरकतं चैव गारुडं पुष्यमेव च ॥ ७१ ॥

गोमेदस्फटिकं चैव नवरत्नाः प्रकीर्तिताः ।
अपराह्णे तु संप्राप्ते शान्तिहोमं तु कारयेत ॥ ७२ ॥

दर्भपुञ्जैः दीपयित्वा पर्यग्निकरणं तथा ।
पञ्चगव्यैः प्रोक्षयित्वा चूर्णैरालेपयेत्ततः ॥ ७३ ॥

गोमयालेपितां भूमिं सुधाचूर्णैरलङ्कृताम् ।
दीपैश्च बहुभिर्दीप्य कपिलाज्येन संयुतैः ॥ ७४ ॥

शिल्पिभिर्निर्मिते बिम्बे शास्त्रदृष्टेन वर्त्मना ।
कर्मार्चापीठिकायां च रत्नादिन्यासने कृते ॥ ७५ ॥

उद्घाटिते च नयने यथार्हं सर्वशान्तिदे ।
स्थूलसूक्ष्मेषु चान्येषु प्रतिमाङ्गेषु सर्वथा ॥ ७६ ॥

70. a) M. हृदयं for मृण्मयं
b) M. मान° for मांस°

76. a) M. उत्पा° for उद्घा°
b) M. °शान्तिषु for °शान्तिदे
c) ASv. चांगेषु for चान्येषु

सुकृतेषु यथाशास्त्रं कर्मान्ते देशिकोत्तमः ।
रथकारेण विदुषा सुनिरूप्य निरूपकः ॥ ७७ ॥

धनैश्च कर्मानुगुणैः स्थपतीन् परितोषयेत् ।
विष्णोश्च लक्षणं वक्ष्ये समासाच्छृणु भूपते ॥ ७८ ॥

हरिं परात्परं सूक्ष्मं नित्यं सर्वाङ्गमव्ययम् ।
अनिन्दितमनौपम्यमप्रमेयमनामयम् ॥ ७० ॥

शुद्धत्वाद्धरिमुद्दिष्टं परादूर्ध्वं परात्परम् ।
व्योमोदितगुणानां तु नित्यकारणशून्यतः ॥ ८० ॥

व्याप्ते सर्वगतं प्रोक्तं अक्षीणादव्ययं भवेत् ।
अमलादतमं ज्ञेयमसादृश्यमनामयम् ॥ ८१ ॥

प्रमाणं व्यक्तमित्युक्तं अप्रमेयमिति स्मृतम् ।
निर्गुणत्वविशेषेण अनामयमिति स्मृतम् ॥ ८२ ॥

इत्येतैर्लक्षणैर्युक्तं विष्णुरूपमिहोच्यते ।
स्रष्टृत्वं सर्वतत्त्वानां लोकोत्पत्तेश्च कारणम् ॥ ८३ ॥

योगिनां मुक्तिकारेण स्वेच्छया चिन्त्यते हरिः ।
तद्धरेस्तत्परा शक्तिः सहस्रांशे तु जायते ॥ ८४ ॥

तच्छक्तेस्तु सहस्रांशात् ज्ञानशक्तिसमुद्भवः ।
ज्ञानशक्तिसहस्रांशादिच्छाशक्तिसमुद्भवः ॥ ८५ ॥

81. b) AMyS[1]SvT. °दिव्ययं for दव्ययं
d) ASv. सादृश्यस्य for असादृश्य°
82. a) AS[2]Sv. प्रमाण, My. प्रभावा for प्रमाणं
83. c) M. सूक्ष्ममवम् S[1]. सृष्टयत्वं for स्रष्टृत्वं
d) MS[1]. °त्पत्तिश्च for त्पत्तेश्च

इच्छाशक्तिसहस्रांशात् क्रियाशक्तिसमुद्भवः ।
एता वै शक्तयः पञ्च निष्कलं चेति कीर्तितम् ॥ ८६ ॥

विष्णुसृष्टिरिति प्रोक्तं शक्तीनां सृष्टिरुच्यते ।
योगिनां च यतीनां च ज्ञानिनां मुक्तिकारणम् ॥ ८७ ॥

ध्यानपूजासमायुक्तं सकलं निष्कलं भवेत् ।
तत्पद हि समांशोन सादारव्यत्वमिति शृणु ॥ ८८ ॥

सादाख्यं पञ्चधा प्रोक्तं तेषां लक्षणमुच्यते ।
परशक्त्यादिशक्त्या च सादाख्यानं शृणुष्व च ॥ ८९ ॥

प्रथमं विष्णुसादाख्यं अमूर्ति तु द्वितीयकम् ।
तृतीयं मुक्तिसादाख्यं चतुर्थं कर्तृनामकम् ॥ ९० ॥

पञ्चमं कर्मसादाख्यं पञ्चसादाख्यमुच्यते ।
सदाविष्णुश्च ईशाद्या ब्रह्मादिरविदेवताः ॥ ९१ ॥

ईशानश्चेति पञ्चैते तत्त्वभेदाः प्रकीर्तिताः ।
विष्णुस्सदा हरिर्ज्ञेयो अमूर्तिर्हरिरुच्यते ॥ ९२ ॥

मूर्तिर्ब्रह्ममिति प्रोक्ता कर्तारं चेश्वरस्तथा ।
कर्म ईशानमित्युक्तं इत्येवं हि द्विधा स्मृतम् ॥ ९३ ॥

परात्परतरं चैव सूक्ष्मात् सूक्ष्मतरं भवेत् ।
स्थूलं चैव क्रमेणैव विष्णुदीपस्य लक्ष्यते ॥ ९४ ॥

एतेषु पञ्चतत्त्वं च विशेषश्चाधुनोच्यते ।
तत्त्वमूर्तिप्रभावं च त्रिभेदं विद्यते क्रमात् ॥ ९५ ॥

---

87. b) M. तेषांलक्षणमुच्यते for शक्तीनां सृष्टिरुच्यते
93. b) ASv. °स्त्रिधा MyS¹S². °स्स्मृतः for °स्तथा
95. a) AS¹S²SVT. हृतेषु for एतेषु

विष्णुतत्त्वमिदं प्रोक्तं मूर्तिर्यस्य सदा हरि: ।
ततो योगेन यद्रूपं तद्रूपं भावमुच्यते ॥ ९६ ॥

भावं सादाख्यमित्युक्तं सादाख्यमिति कीर्तितम् ।
निष्कलं तत्त्वमित्युक्तं सकला मूर्तिरुच्यते ॥ ९७ ॥

देहि देहि ससामर्थ्यं भावरूपमिति स्मृतम् ।
सर्वेषां साध्यपूजार्थं सकलं निष्कलं भवेत ॥ ९८ ॥

एवं ध्यात्वा विशेषेण सर्वकर्म समाचरेत् ।
पञ्चसादाख्यतत्त्वानां उद्भवं हि पृथक् पृथक् ॥ ९९ ॥

एषां रूपं च वक्त्रं च समासाच्छृणु भूपते ।
विष्ण्वाद्यादिपराशक्ति: तस्य पर्यायवाचका: ॥ १०० ॥

पराशक्तेर्दशांशेन विष्णुसादाख्यमुद्भवम् ।
पराशक्त्युद्भवत्वं च शुद्धत्वाद्धरिरुच्यते ॥ १०१ ॥

तद्रूपं सूक्ष्मरूपं च ज्योतीरूपमिति स्मृतम् ।
बिन्दुरूपमिवांशेन पक्षं वा सर्वतोमुखम् ॥ १०२ ॥

विष्णुतत्त्वमिदं प्रोक्तं मूर्तिं च शृणु भूपते ।
आदिशक्तिश्च शान्तिश्च च तस्य पर्यायवाचका: ॥ १०३ ॥

आदिशक्तेर्दशांशेन आदिशक्ति: समुद्भवम् ।
आदिशक्तिरमूर्तित्वात् अमूर्तिश्चेति कीर्तितम् ॥ १०४ ॥

96. a) MMy. तत्त्वादिकं प्रोक्तममृतं
101. b) M. °द्भवेत् for द्भवम् ।
c) MS[2]. पराशक्तयोद्भवत्वाच्च for पराशक्त्युद्भवत्वं च
104. b) MMyS[1]S[2]. समुद्भवा for समुद्भवम्
d) S[1]. कीर्तित: for कीर्तितम्

अमूर्तित्वकलाहीनं तद्रूपं बेरमुद्भवम् ।
सूर्यकोटिप्रतीकाशं ज्योतिस्तम्भाकृति स्मृतम् ॥ १०५ ॥

तस्योपान्तगतो मूर्तिं मूर्तिं चैवोच्यतेऽधुना ।
एतद्वै दिव्यबेरं तु मूलस्तम्भमिहोच्यते ॥ १०६ ॥

बेरे च सर्वमुत्पन्नं लयं तत्रैव चोच्यते ।
अमूर्तिरेवमाख्याता समूर्तिं तु ततः शृणु ॥ १०७ ॥

इच्छा शक्तिश्च क्रिया या तस्याः पर्यायवाचकाः ।
तस्याः शक्तेर्दशांशेन ज्योतिर्मूर्तिरिहोच्यते ॥ १०८ ॥

इच्छामूर्तिगुणत्वाच्च तस्मान्मूर्तिरुदाहृता ।
मूर्ति....कलायुक्तं रूपं चेति प्रकीर्तितम् ॥ १०९ ॥

ज्वालाख्यसदृशप्रख्यं देवबेराकृतिर्भवेत् ।
स तु द्वांशैकभागे तु एकवक्त्रेण संयुतम् ॥ ११० ॥

द्विनेत्रं चारुवदनं सर्वावयवसंयुतम् ।
एकमेकासनोपेता विष्णुमूर्तिरुदाहृता ॥ १११ ॥

मूर्तिसादाख्यमेवोक्तं कर्तृसादाख्यमुच्यते ।
ज्ञानं चैव प्रतिष्ठा च तस्य पर्यायवाचकाः ॥ ११२ ॥

ज्ञानशक्तेर्दशांशेन कर्मसादाख्यमुद्भवम् ।
ज्ञानकर्तृविभावत्वात् कर्तृतापि प्रकीर्तिता ॥ ११३ ॥

---

105 a) M. °श्च for °त्व°
106. a) S¹. AS¹Sv. तस्या वा °for तस्योपा°
M. मूर्ति for मूर्ति
b) M. °स्मूर्तिः for मूर्ति
110. c) ASv. om. तु.

ज्ञानं हि शुद्धरूपत्वात् स्फटिकाभं तथोच्यते ।
दिव्यबेरमहादैर्घ्यं महास्थूलनया चितम् ॥ ११४ ॥

अष्टहस्तं द्विपादं च सर्वलक्षणसंयुतम् ।
शंखं चक्रं च खड्गं च अभयं दक्षिणे करे ॥ ११५ ॥

पाशं बाणं च चापं च वरदं वामहस्तके ।
सर्वावयवसंयुक्तं सर्वाभरणभूषितम् ॥ ११६ ॥

एवं त्वमीश्वरोपीति विष्णुः कर्ता इहोच्यते ।
कर्तृसादाख्यमेवोक्तं कर्मसादाख्यमुच्यते ॥ ११७ ॥

निवृत्तिश्च क्रियाशक्तिः तस्याः पर्यायवाचकाः ।
क्रियाशक्तेर्दशांशेन कर्मसादाख्यमुच्यते ॥ ११८ ॥

क्रिया कर्मेति विज्ञेयं तस्य कर्मेति नामतः ।
बिम्बबेरप्रकारेण कर्मसादाख्यलक्षणम् ॥ ११९ ॥

नादं बेरमिति ज्ञेयं बिन्दुः पीठमुदाहृतम् ।
नादबिन्दुयुतं रूपं कर्मसादाख्यमुच्यते ॥ १२० ॥

क्रियारूपादे चत्वारि केवलं नादमुच्यते ।
बेरं विष्णुरेति ज्ञेयं पीठशक्तिरुदाहृता ॥ १२१ ॥

114. d) M. °स्थलतया for °स्थूलनया
117. a) ASv. मीखरोपेत S[1]. मीपरोपेत for मीश्वरोपीति
118. a) MS[1]. °स्तस्या for °शक्ति.
M. om.
119. a) S[1]. विज्ञेय for विज्ञेयं
121. c) ASv. विष्णो° for विष्णु°

येन लिङ्गप्रकारेण जगत्सृष्ट्यन्तकारणम् ।
तदसंयोगभावत्वात् कर्मरूपमुदाहृतम् ॥ १२२ ॥

बिन्दुमध्ये गतं नादं नादमध्ये तु मूर्तिकम् ।
मूर्तिमध्ये गतं तत्त्वं तन्मध्ये तु स्थितो हरिः ॥ १२३ ॥

एतद्धरिमयं बेरं सर्वतत्त्वाख्यं स्मृतम् ।
बेरं तु जायते तत्र जगत् स्थावरजंगमम् ॥ १२४ ॥

तस्माद्रूपविशेषेण कर्मरूपमुदाहृतम् ।
कर्मोदये तु सृष्टिः स्यात् कर्मान्ते संस्थितिर्भवेत् ॥ १२५ ॥

एतत् कर्मेशरूपं तु सृष्टिस्थितिलयावहम् ।
पञ्चसादाख्ययोगेन कर्मसादाख्य उच्यते ॥ १२६ ॥

विष्ण्वाख्यं च विशेषेण विष्णुरूपमुदाहृतम् ।
अमूर्तिं तु समासेन विष्णुसादाख्यमाश्रितम् ॥ १२७ ॥

मूर्तिरूपविशेषेण अमूर्त्यादिं समाश्रितम् ।
कर्तृसादाख्यरूपं हि समूर्त्यादि यथाविधि ॥ १२८ ॥

कर्मरूपक्रमेणैव .... वादिसमाश्रितम् ।
अनेनैव क्रमेणैव एकैकं तु समाश्रितम् ॥ १२९ ॥

तस्मात् कर्मैव रूपं तु पञ्चमूर्त्याश्रितं विदुः ।
सर्वतत्त्वात्मकं ज्ञेयं सर्वाधारमिति स्मृतम् ॥ १३० ॥

एकैव मूर्तिपिण्डत्वात् पिण्डाकारमिति स्मृतम् ।
पिण्डत्वं पिण्डमध्यस्थं पिण्डाधारेण पीठकम् ॥ १३१ ॥

---

122. c) MMyS[1]. तदा for तद°
123. d) S[1]. हरिम् for हरिः
124. c) MS[1]S[3]. बेरे for बेरं
131. a) M. बिम्ब° for पिण्ड°
d) M. पिण्डरूपमुदाहृतम्

पिण्डेन पीडितं पिण्डं पिण्डरूपमुदाहृतम् ।
एतद्विष्णुमयं पिण्डं सर्वतत्त्वमिदं विदुः ॥ १३२ ॥

पञ्चमूर्तिमयं देवं सर्वकारणकारणम् ।
एवं बेरे तु कर्मेशं ध्यायेत् सकलनिष्कलम् ॥ १३३ ॥

देहं तु सकलं ज्ञेयं निष्कलं देहजीवकम् ।
देहस्य तु कलास्सर्वा धातुपिण्डमिति स्मृतम् ॥ १३४ ॥

षट् कलाश्च चतुःपञ्चषडङ्गैस्तु प्रकल्पयेत् ।
सर्वैरङ्गैश्च संपूर्णं सर्वावयवसंयुतम् ॥ १३५ ॥

.... .... मात्रं तु मूर्तिं सकलरूपधृक् ।
निष्कलस्तदभावे तु तस्मात् सकलनिष्कलम् ॥ १३६ ॥

सकलेनात्मकं देहमांसास्थिरुधिराणि च ।
इन्द्रियं चापमब्जं च दर्पणे प्रतिबिम्बितम् ॥ १३७ ॥

इति देहं हि संकल्प्यं निष्कलं सकलोद्भवम् ।
ध्यानलक्षणमेवोक्तमङ्गभावमिहोच्यते ॥ १३८ ॥

---

132. a) M. पिण्डितं for पीडितं
d) S[1] मयं for मिदं

133. b) MyS[1]. पञ्चतत्वात्मकं भवेत्
M.S[1]. read the following after 133 ab)
मूर्तीनां देहभेदैस्तु गुणैः पञ्चगुणैर्युतम् ।
तद्देहं तु महेशादि सर्वतत्त्वादिसंभवात् ॥
तस्य वक्त्रे तु संभूतं सिद्धितादीनि तन्त्रकैः ।
सर्वज्ञानमयं देवं सर्वकारणकारणम् ॥

134. b) M. °दीपकम् for जीवकम्

137. d) MS[1]S[2]. बिम्बवत् for बिम्बितम्

138. a) ASv. देह संकल्पा for देह संकल्प

अङ्गं देहमिति प्रोक्तं तच्चतुर्विधमुच्यते ।
अङ्गप्रत्यङ्गसाङ्गं च उपाङ्गं च मयोद्भवम् ॥ १३९ ॥

शिरो वक्त्रं च हृदयमङ्गं चेति प्रकीर्तितम् ।
अस्थिकर्णोष्ठवदनं गलं च घ्राणमेव च ॥ १४० ॥

ऊरू जानू च जंघे च पादपाणितलानि च ।
नाभिगुह्योदरं चैव प्रत्यङ्गं चेति कीर्त्यते ॥ १४१ ॥

मूर्तीनां गुणरूपं च साङ्गं चेति प्रकीर्तितम् ।
गुणं चिह्नमिति ज्ञेयं तद्गुणं दशधा भवेत ॥ १४२ ॥

त्रिगुणं तद्विजानीयात दशभेदं वदाम्यहम् ।
इत्थं मायात्रिवरणं नादसंभूतमेव च ॥ १४३ ॥

एते दशगुणं प्रोक्तं तेषां लक्षणमुच्यते ।
त्रिगुणं शूलमित्युक्तं तथा परशुरुच्यते ॥ १४४ ॥

खड्गमीशपद्मापि दुर्जयो वज्र इष्यते ।
ईशस्यानुग्रहं चैवमुभयं तत्प्रशस्यते ॥ १४५ ॥

ऋद्धिमस्यां नागरूपं पाशं नानास्वरूपकम् ।
कुलिशं अङ्कुशं चैव घण्टानामात्मकं विदुः ॥ १४६ ॥

141. a) M. om. च जंघे च
b) M. om.

142. a) तु for च

143. b) देश° for दश
c) ASv. इत्थमावा for इत्थं माया°

144. d) MMy. सदा for सदा

सम्भारमग्निरूपं स्यात् विष्णुरूपमिहोच्यते ।
एतद्वै गुणरूपं स्यात् साङ्गं चेति प्रकीर्तितम् ॥ १४७ ॥

वस्त्रोपवीतमाल्यानि गन्धमाभरणं तथा ।
आसनावरणं चैव उपाङ्गं संप्रकीर्तितम् ॥ १४८ ॥

अङ्गभावमिति प्रोक्तं तस्य रूपमिहोच्यते ।
कुन्देन्दुस्फटिकाभासं जटामकुटमण्डितम् ॥ १४९ ॥

पञ्चमूर्तिसमायुक्तं पञ्चतत्त्वमिदं जगत् ।
चतुर्विंशतिमूर्तीनां तत्तत्स्थापनमिष्यते ॥ १५० ॥

मीनादिदशमूर्तीनां क्रमेण स्थापनं ततः ।
तत्तन्मन्त्रमनुस्मृत्य स्थापयेद्देशिकोत्तमः ॥ १५१ ॥

शूलस्थापनवत् कुर्यात् जलाधिवसनं ततः ।
स्थापयेदष्टबन्धेन लाक्षादितिलतैलकम् ॥ १५२ ॥

योजयेच्छिल्पशास्त्रेण सुमुहूर्ते सुलग्नके ।
स्थापयेत् पीठमध्ये तु जलाधिवसनात्परम् ॥ १५३ ॥

ब्राह्मणान् भोजयित्वा तु पश्चाद्देवं प्रतिष्ठयेत् ।
अन्यथा चेन्महादोषो राजराष्ट्रविनाशनम् ॥ १५४ ॥

तस्मादुक्तप्रकारेण स्थापयेद्देवमव्ययम् ॥ ।
प्रोक्षणं तु ततः पश्चात् ब्राह्मणांश्चैव भोजयेत् ॥ १५५ ॥

147. c) M. च S[1]. तु for स्यात्
148. d) A. निष्यते M. कीर्त्यते MyS[1]S[2]. रिष्यते for नेष्यते
149. b) M. °मथोच्यते for °मिहोच्यते
154. c) M. महान् for महा°

दक्षिणां दापयेत् पश्चात् यथावित्तानुसारतः ।
आचार्यं पूजयेत्पश्चात् वस्त्रहेमाङ्गुलीयकैः ॥ १५६ ॥

यागद्रव्याणि सर्वाणि आचार्याय प्रदापयेत् ।
ऋत्विजः परिचारांश्च पूजयेन्नृपसत्तमः ॥ १५७ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां प्रतिष्ठाविधानो
नाम चतुर्दशोऽध्यायः ॥

# पञ्चदशोऽध्यायः

## [ नित्यार्चनविधिः ]

* * *

अथातः संप्रवक्ष्यामि नित्यार्चनविधिं शृणु ।
पुंसां पापहरं सर्वं यागं सर्वफलप्रदम् ॥ १ ॥

सर्वदारिद्र्यनाशं च कीर्तिपुत्रविवर्धनम् ।
रिपुवश्यकरं नृणां लक्ष्मीसान्निध्यमेव च ॥ २ ॥

तस्मात् सर्वप्रयत्नेन नित्यमाराधयेद्धरिम् ।
तव स्नेहात् प्रवक्ष्यामि गुह्याद्गुह्यतरं नृप ॥ ३ ॥

ब्राह्मे मुहूर्ते चोत्तिष्ठ मनसैकाग्रचेतसा ।
नामानि कीर्तयेद्विष्णोरवतारद्विपञ्चकम् ॥ ४ ॥

भूमिमन्त्रमनुस्मृत्य वामपादं तु विन्यसेत् ।
ग्रामबाह्ये निर्गमनं वेदोक्तेन विधानतः ॥ ५ ॥

सन्ध्यावन्दनगायत्रीगुरुवन्दनपूर्वकम् ।
एवं पूर्वोक्तविधिना कारयेद्देशिकोत्तमः ॥ ६ ॥

स्वगृहं संप्रविश्याथ देवमात्मार्थकं यजेत् ।
पश्चाद्देवालयं गत्वा दण्डवद्बलिपीठके ॥ ७ ॥

प्रणमेच्छिरसा देवं पुण्डरीकाक्षविद्यया ।
कवाटं मोचयेत् पश्चाद्दीपमारोपयेत्ततः ॥ ८ ॥

---

1. d) MS²T. भोगं for याग
2. c) AMyS¹S²SvT. मुख° for रिपु°
3. d) M. °तमं for तरं
7. b) M. °मात्यन्तिकं for °मात्मार्थकं
   d) M. °पीठकम् for °पीठके

अर्घ्यं शिरसि विन्यस्य पाद्यं पादतलेऽपि च ।
आचामं चास्यशुद्धिं च गन्धं कायानुलेपनम् ॥ २८ ॥

स्नानासनं ततो वक्ष्ये अर्घ्यपाद्यपरिग्रहम् ।
मुखवासं ततो दद्यात् गण्डूषं दन्तकाष्ठकम् ॥ २९ ॥

तैलमामलकस्नानं स्नापयेन्मूलमन्त्रतः ।
एकबेरविधानं चेन्मूलबेराभिषेचनम् ॥ ३० ॥

बहुबेरविधानं चेत् स्नापयेत् स्नानबेरकम् ।
वस्त्रैराभरणैर्माल्यैः अलङ्कृत्य तु देवराट् ॥ ३१ ॥

दशदीपांश्च प्रज्वाल्य देवस्याग्रे विनिक्षिपेत् ।
अङ्गारके धूपपात्रे धूमयेद्धूमधूलिभिः ॥ ३२ ॥

अर्चयेद्गन्धपुष्पाभ्यां दीपमुद्धृत्य देशिकः ।
दीपं प्रथमतो दद्यात् पश्चाद्धूपं तु दर्शयेत् ॥ ३३ ॥

घटदीपं प्रदद्यात्त्रिः प्रादक्षिण्येन वेष्टयेत् ।
घटिकां च शुचिर्भूतां निक्षिप्यावरणाद्बहिः ॥ ३४ ॥

यथोपचारबेरे च तथा बिम्बेषु पूजयेत् ।
मात्रादानं विशेषेण बिम्बहस्तेन दापयेत् ॥ ३५ ॥

28. c) M. चाङ्ग° for चास्य°
29. a) S[1]. तथा for ततो
32. d) M. धूपयेद्धूप° for धूमयेद्धूमं
33. c) AS[2]SvT. पृथक्ततो for प्रथमतो
34. c) AMMyS[2]SvT. गणिकां for घटिकां
S[1]. °र्भूता for र्भूतां

देवाय देशिकायापि राष्ट्रस्याभ्युदयावहम् ।
स्तुतिमङ्गलपाठैस्तु देवाग्रे नृत्तवाद्यकम् ॥ ३६ ॥

महानसात्तु नैवेद्यमुद्धृत्य भगवन्मया ।
देवाग्रे तु विनिक्षिप्य प्रदद्याद्दक्षिणे करे ॥ ३७ ॥

अर्घ्यं च दापयेत् पश्चात्ताम्बूलं च प्रदापयेत् ।
पूजाविधानं बहुधा वक्ष्यामि शृणु भूपते ॥ ३८ ॥

अर्चनं विधिवत् प्रोक्तं यागं चाराधनं ततः ।
अभ्यर्चनं च पूजा च समाराधनमेव च ॥ ३९ ॥

संपूजनं तु विधिना कथितान्यर्चनानि ते ।
द्वारपूजादिबल्यन्तमर्चनं तु विधीयते ॥ ४० ॥

द्वारपूजादिहोमान्तं यागं चेति प्रकीर्तितम् ।
नित्योत्सवविधानं तु आराधनमुदाहृतम् ॥ ४१ ॥

दीपादिहविषान्तं तु अभ्यर्चनमिति स्मृतम् ।
मधुपर्कसमायुक्तं प्रपूजेति प्रकीर्तिता ॥ ४२ ॥

मात्रादानविधानेन छत्रचामरपिञ्छकैः ।
नीराजनं दर्शनं च अन्नपिण्डसमायुतम् ॥ ४३ ॥

नृत्तं वाद्यरवैर्युक्तं वीणावेणुरवैस्ततः ।
एवमादिषु चान्येषु समाराधनमिष्यते ॥ ४४ ॥

36. d) S[1]. नित्य° for नृत्य°
39. c) MS[1]S[2]. प्रपूजा for च पूजा
40. a) S[1]My. तत् for तु
43. c) MS[2]. चादर्शनं for दर्शनं च
44. d) S[1]. तथा for ततः

पञ्चकालार्चनायुक्तं षट्कालार्चनमेव वा ।
एवमादिषु सर्वेषु संपूजनमिति स्मृतम् ॥ ४५ ॥

इत्येवं कथितं सम्यग्यथा पूर्वं मया श्रुतम् ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां अर्चनाविधानो नाम
पञ्चदशोऽध्यायः ॥

# षोडशोऽध्यायः

## [ अग्निकार्यविधिः ]

* * *

अग्निकार्यविधिं वक्ष्ये शृणुष्व नृपसत्तम ।
उत्सवे स्नपने चैव प्रतिष्ठायां तथैव च ॥ १ ॥

प्रोक्षणे चैव दीक्षायां पवित्रदमनेषु च ।
कर्षणादिषु सर्वेषु प्रायश्चित्तेषु सर्वशः ॥ २ ॥

कुण्डे वा स्थण्डिले वापि चतुरश्रं तु कारयेत् ।
पूर्ववत् कारयेत् कुण्डं प्रोक्षयेत् गन्धवारिणा ॥ ३ ॥

कुशेन प्रोक्षयेत् कुण्डं पुण्यतोयेन सेचयेत् ।
कुण्डस्य वारुणस्थाने विष्टरं विन्यसेत्ततः ॥ ४ ॥

तदुपरि स्थित आचार्य उत्तरासङ्गसंयुतः ।
प्राङ्मुखो वाग्निकर्माणि कारयेद्देशिकोत्तमः ॥ ५ ॥

प्राच्यग्रैस्तु त्रिदर्भैस्तु उत्तराग्रैस्तु लेखयेत् ।
दक्षिणादुत्तरान्तं तु लेखयेदाद्यमेव च ॥ ६ ॥

पूर्वान्तमपरादिस्तु लिखित्वा देशिकोत्तमः ।
मूलमन्त्रेण मतिमान् कुशकाण्डं विमृज्य च ॥ ७ ॥

प्रक्षालयेत्तु हस्तं तु आनीयाग्निं समाचरेत् ।
अग्निमुल्लेखनं कृत्वा प्राणायामं तु कारयेत् ॥ ८ ॥

---

1. c) S[1]. उत्सव for उत्सवे
2. b) MMyS[1]S[2]T. पवित्रे for पवित्र°
6. b) M. वेषयेत् for लेखयेत्
7. d) S[1]. विमज्य for विमृज्य

दर्भैः परिस्तरं कृत्वा पवित्रं प्रोक्षणीं तथा ।
प्रणीतां ब्रह्मकूर्चं च आज्यं दर्वीं च मार्जयेत ॥ ९ ॥

होमद्रव्याणि सर्वाणि अग्नेर्मुखगतं तथा ।
पुरस्तात्तन्त्रमित्येवं कुण्डमध्ये सदा हरिम् ॥ १० ॥

लक्ष्मीनारायणाज्जात स्याग्नेरुत्पत्तिरुच्यते ।
ततोऽग्निं जनयेत्तत्र अग्निबीजेन देशिकः ॥ ११ ॥

प्रोक्षणेद्दर्भतोयेन अग्निकुण्डं तु देशिकः ।
कात्स्न्येन दीपयेत्तत्र प्राणायामं तु देशिकः ॥ १२ ॥

आज्यपात्रं चरुस्थालीं प्रणीतां प्रोक्षणीं ततः ।
दर्वीमिध्मं च परिधिं स्रुक्स्रुवौ च तथैव च ॥ १३ ॥

इन्धनाग्नारद्दर्भैस्तु अग्नेरुत्तरपार्श्वतः ।
परिस्तरं सुदर्भैस्तु द्वन्द्वपात्रं तु सादयेत् ॥ १४ ॥

प्रोक्षयित्वा तथा सर्वान् पुण्यतोयेन देशिकः ।
पुरतः प्रोक्षणीं न्यस्य .... .... .... ॥ १५ ॥

पादुकां प्रोक्षणीं चैव आज्यस्थालीं च तत्समम् ।
वासुदेवादिभिर्मन्त्रैः दर्भान् दिक्षु निधापयेत् ॥ १६ ॥

पूर्वे षोडशदर्भांस्तु उत्तराग्रेण निक्षिपेत् ।
ततः षोडशदर्भांस्तु पूर्वाग्रेणैव विन्यसेत् ॥ १७ ॥

11. d) M. °बिम्बेन for °बीजेन
12. c) M. कान्ति न S[1]. कार्तेन for कात्स्न्येन
cd) My. om.
16. a) M. वाचनं प्रोक्षणं for पादुकां प्रोक्षणीं
d) M. °दिषु for दिक्षु

त्रिदर्भैरासनं चैव प्रोक्षणीं सप्तदर्भकैः ।
प्रणीतां नवदर्भैस्तु द्वादशैश्चैव कूर्चकम् ॥ १८ ॥

पञ्चदर्भैः स्रुवं मार्जं स्रुङ्मार्जं किल नातकैः ।
द्विदर्भैः चरुशुद्धिं च द्विदर्भैराज्यशोधनम् ॥ १९ ॥

पात्राणां सादनं चैव षड्दर्भैस्तु विधीयते ।
प्रोक्षणीं पूरयेत्तत्र करकेनोदकं ततः ॥ २० ॥

अम्भसोत्पूय तत्रैव प्रोक्षयेत् गन्धवारिणा ।
अखण्डिताग्रौ निर्गर्भौ कुशौ प्रादेशसम्मितौ ॥ २१ ॥

ताभ्यामुत्तानपाणिभ्यामङ्गुष्ठानामिकेन तु ।
उत्तानयित्वा पात्राणि प्रोक्षयेत्तेन वारिणा ॥ २२ ॥

प्रणीतां पुरतः स्थाप्य निक्षिपेत्तु पवित्रकम् ।
पूरयित्वा तदुत्पूय स्थापयेदीशकोणके ॥ २३ ॥

अर्चनं गन्धपुष्पाद्यैः दर्भेण च विधाय च ।
कुण्डस्य दक्षिणे पार्श्वे ब्रह्मकूर्चं तु निक्षिपेत ॥ २४ ॥

चतुरङ्गुलमानेन उत्तराग्रं तु देशिकः ।
आज्यपात्रे निषिच्याज्यमुत्तरेऽङ्गारकं न्यसेत् ॥ २५ ॥

पर्यग्निकार्यादुत्तीर्य यथास्थानं निवेशयेत ।
उत्पूयोत्पवनः कूर्चमद्भिः स्पृष्टमुपर्बुधैः ॥ २६ ॥

प्रमृज्य च मृदीकृत्य धृत्वं सुरभिमुद्रया ।
अवकुण्ठ्य च दिक्पालान् इन्द्रादीन् पूजयेत् क्रमात् ॥ २७ ॥

26. d) S[1]. अद्भ्यः for अद्भिः

उष्णोदकेन प्रक्षाल्य स्रुक्स्रुवौ कुशपञ्चकैः ।
कूर्चमादाय तोयेन मूले मध्ये च मूर्धनि ॥ २८ ॥

संमृज्य कूर्चमूलेन मध्ये वाग्रेण च क्रमात् ।
निष्टप्याग्नौ निधातव्यौ तामुदीच्यमथात्मनः ॥ २९ ॥

स्रुवेणाज्यं समादाय होमवस्तुषु सेचयेत् ।
चरुं चाज्येन संचिच्य पार्श्वे तमवकल्पयेत् ॥ ३० ॥

केवलान्नं तथा मौद्गं पायसं च गुडोदनम् ।
चतुर्विधश्चरुर्ज्ञेयः पाकचूल्यमपीष्यते ॥ ३१ ॥

तत्तत्कर्मानुगुण्येन आहुतिं जुहुयात्ततः ।
पूर्णाहुतिं ततः पश्चात् प्रोक्षयेत् आत्मनस्तनुम् ॥ ३२ ॥

स्रुवं निधाय पुरतस्तस्य पार्श्वे विनिक्षिपेत् ।
याम्ये तु घृतपात्रं तु उत्तरे स्रुक्स्रुवौ तथा ॥ ३३ ॥

सर्वान् कुशान् समादाय उत्तराग्रेण हस्तयोः ।
आज्यपात्रे तथा मूलं मध्यमं स्रुवमध्यमे ॥ ३४ ॥

अग्रेण स्रुवगर्ते तु स्पर्शयित्वा यथाक्रमम् ।
त्रीणि कृत्वा यथान्यायं दर्भानग्नौ विनिक्षिपेत् ॥ ३५ ॥

उपयोग्यानि हुत्वैवं कारयेद्देशिकोत्तमः ।
प्रोक्षणीजलमादाय सेचयेत् प्रणिताजलम् ॥ ३६ ॥

ब्रह्मादीशानपर्यन्तं परिषेचनमेव च ।
पश्चिमे तु विनिक्षिप्य प्रोक्षयेदात्मनस्तनुम् ॥ ३७ ॥

---

29. a) S[1]. चाग्रेण for वाग्रेण
c) A. निष्टप्याग्नौ S[1]S[2] निष्टप्याग्नि for निष्टप्याग्नौ
31. d) S[1]. पाकचूल्यमुपेष्यते

इध्मप्रव्रश्चनं हुत्वा ब्रह्मोद्वासनमेव च ।
प्राणायामं ततः कृत्वा आचामन्तं विशेषतः ॥ ३८ ॥

पादप्रक्षाळनं कृत्वा गर्भगेहं समाविशेत् ।
पुष्पाञ्जलिं ततः कृत्वा प्रार्थयेद्देवमव्ययम् ॥ ३९ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां अग्निकार्यविधानं
नाम षोडशोऽध्यायः ॥

# सप्तदशोऽध्यायः

## [नित्योत्सवविधिः]

* * *

अथातः संप्रवक्ष्यामि नित्योत्सवविधिं शृणु ।
सर्वपापहरं पुंसां सर्वभोगफलप्रदम् ॥ १ ॥

तस्माद्यत्नेन राजेन्द्र! बलिदानं प्रशस्यते ।
बलिबिम्बमलङ्कृत्य गन्धपुष्पैश्च देशिकः ॥ २ ॥

यानं वा कुञ्जरं वापि शिबिकां वाश्वमेव वा ।
आरोप्य देवदेवेशं उद्धृत्य भगवन्मया ॥ ३ ॥

प्रासादद्वारमारभ्य बहिर्द्वारावसानकम् ।
बलिदानं प्रकुर्यात्तु तत्तद्देवमनुस्मरन् ॥ ४ ॥

अन्नैश्च विविधैर्भक्ष्यैः बलिदानं प्रशस्यते ।
ग्रामाश्रितादिदेवानामन्तर्बलिमथाचरेत् ॥ ५ ॥

ग्रामेषु न बलिं कुर्यात स्वगृहेषु बलिं क्षिपेत ।
ग्रामेषु च न कुर्वीत प्रथमावरणे बलिम् ॥ ६ ॥

तस्मात सर्वप्रयत्नेन अन्तर्बलिमथाचरेत ।
यदि मोहाद्बलिं कुर्यान सद्यो दोषः समुद्भवेत् ॥ ७ ॥

ग्रामनाशश्च दुर्भिक्षं व्याधिं चैव प्रयच्छति ।
तस्मात् सर्वप्रयत्नेन ग्रामेषु न बलिं क्षिपेत ॥ ८ ॥

आलयाश्रयबिम्बानां नैवेद्यान्तं सुपूजयेत् ।
मन्त्रन्यासं बलिं चैव परिवारान्वितं भवेत् ॥ ९ ॥

नैवेद्यानन्तरे काले अन्तर्बलिमथाचरेत ।
हविश्शेषं जलं पुष्पमिश्रितं बलिमुत्तमम् ॥ १० ॥

ग्रामाश्रितादिदेवानां पर्वताश्रितमेव च ।
नैवेद्यान्तं समभ्यर्च्याभ्यन्तरे च बलिं क्षिपेत ॥ ११ ॥

मर्त्यावतारदेवानां शुद्धोत्सवमथाचरेत् ।
महोत्सवादिसर्वेषु मानुष्यं च न कारयेत ॥ १२ ॥

काम्यकामं तु विज्ञेयं प्रार्थितार्थफलोदये ।
अङ्कुरार्पणहीनं च शुद्धोत्सवमथाचरेत ॥ १३ ॥

शुद्धोत्सवेषु सर्वेषु प्रायश्चित्तेषु सर्वतः ।
प्रासादाभ्यन्तरे वाथ मूलाग्रे निक्षिपेद्बलिम् ॥ १४ ॥

ग्रामेषु न बलिं कुर्यात् स्वगेहेषु बलिं क्षिपेत् ।
लोभाद्वा यदि वा मोहात् करोति यदि देशिकः ॥ १५ ॥

तद्ग्रामं नाशयेत् सत्यं कर्तारमपि नाशयेत ।
तस्मात् सर्वप्रयत्नेन अन्तर्बलिमथाचरेत ॥ १६ ॥

प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।
तृतीयावरणे वापि चतुर्थावरणेऽपि वा ॥ १७ ॥

पञ्चमावरणे वाथ षष्ठे चावरणेऽपि वा ।
सप्तमावरणे वाथ देशे योग्यावकाशके ॥ १८ ॥

इन्द्रादिकुमुदादिभ्यः उक्तदेवेभ्य एव च ।
जलं पूर्वं प्रदद्यात्तु पश्चादन्नं प्रदापयेत ॥ १९ ॥

प्राणायामं ततः कृत्वा श्रोत्रस्पर्शनमाचरेत ।
प्राङ्गणे मण्टपे देशे बलिपीठसमीपके ॥ २० ॥

उत्तराभिमुखो वाथ देवस्याभिमुखोऽपि वा ।
प्रक्षाल्य बलिपीठं तु प्रोक्षयेद् गन्धवारिणा ॥ २१ ॥

कुमुदादिगणेभ्यश्च बलिदानं यथाक्रमम् ।
मालिका (?) द्वारमासाद्य शीघ्रं कृत्वा प्रदक्षिणम् ॥ २२ ॥

देवस्याभिमुखो भूत्वा अर्चयेद् गन्धपुष्पकैः ।
पादप्रक्षालनं कृत्वा आचम्य च पुनः पुनः ॥ २३ ॥

आरोप्य देवदेवेशं मूलबेरसमीपके ।
अर्चयेत्तु पुनः पश्चात् मूलबेरे च योजयेत् ॥ २४ ॥

नृत्तगीतैश्च विविधैः नानावाद्यरवैर्युतः ।
एवं बलिप्रदानं तु कारयेद्देशिकोत्तमः ॥ २५ ॥

ग्रामस्य रक्षणार्थाय देवानां विभवाय च ।
राक्षसानां विनाशाय शत्रूणां हननाय च ॥ २६ ॥

तत् स्थानस्य समृद्ध्यर्थं बलियागं समाचरेत् ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां
नित्योत्सवविधिर्नाम
सप्तदशोऽध्यायः ॥

# अष्टादशोऽध्यायः

## [ पञ्चशुद्धिः ]

* * *

अथातः संप्रवक्ष्यामि पञ्चशुद्धिं यथाक्रमम् ।
शृणुष्व पृथिवीपाल ! यथापूर्वं मया श्रुतम् ॥ १ ॥

पञ्चशुद्धिं पुरा कुर्याद्देशिकः संयतेन्द्रियः ।
असाङ्कर्येण कुर्वीत पञ्चशुद्धिपुरस्सरम् ॥ २ ॥

देहशुद्धिर्मन्त्रशुद्धिः स्थानशुद्धिस्ततः परम् ।
द्रव्यशुद्धिर्बिम्बशुद्धिः शुद्धयः पञ्च ईरिताः ॥ ३ ॥

योगः संयोग इत्युक्तं सृष्टिस्थित्यन्तकारणम् ।
कर्मयोगः शरीरार्थं ज्ञानयोगः परो हरिः ॥ ४ ॥

योगी हृदयतःपूजां वह्नौ विप्रः समाचरेत् ।
भक्तः साधुजनश्चैव प्रतिमां संप्रपूजयेत् ॥ ५ ॥

ब्राह्मणानां तु योगत्वं प्राणायामक्रमेण तु ।
प्राणायामविधिः प्रोक्तः सर्वपापविनाशनः ॥ ६ ॥

सर्वदोषविनाशार्थं प्राणायामत्रयं विदुः ।
शोषणैर्दाहनैश्चैव प्लावनैश्च तु सम्भवम् ॥ ७ ॥

भूतशुद्धिर्भवेत्तत्र अन्तर्यागमिदं क्रमात् ।
देहशुद्धिर्भवेत्तत्र आत्मशुद्धिस्तथैव च ॥ ८ ॥

---

2. a) S[1]. ततः for पुरा
4. b) S[1]. °स्थित्यर्थं° for °स्थित्यन्त°
5. a) S[1]. योग for योगी
8. bc) S[1]. om.

प्राणायामं तु योगत्वं दृश्यादृश्यं तु सिद्धिदम् ।
योगं साध्यं ततः कृत्वा प्रतिमां तां न दूषयेत् ॥ ९ ॥

सर्वमन्त्रफलं चैव प्राणायामत्रयं विदुः ।
अकारं च उकारं च मकारं चाक्षरत्रयम् ॥ १० ॥

अकारमात्मतत्त्वं तु विद्यातत्त्वमुकारकम् ।
हरितत्त्वं मकारं तु एतन्मन्त्रं समुच्चरन् ॥ ११ ॥

ब्रह्माणं चात्ममूर्तिं तु विद्यामूर्तिं तु केशवम् ।
रुद्रांश शिवमूर्तिं तु त्रिमूर्तिस्तु विशेषतः ॥ १२ ॥

अकारं रेचकं मन्त्रं इडास्थानं समुच्चरन् ।
अकारं पूरकं मन्त्रं पिङ्गलास्थानमुच्चरन् ॥ १३ ॥

मकारं कुम्भकं चैव सुषुम्नास्थानमुच्चरन् ।
आधाराधेयमित्युक्तं प्राणायामत्रयं क्रमात् ॥ १४ ॥

तदूर्ध्वं द्वादशान्तं च व्योमकैर्विष्णुतत्त्वकैः ।
शोषणैश्च तदूर्ध्वं तु दहनैर्मध्यमैस्तथा ॥ १५ ॥

प्लावनैश्च अधोकृत्वा योगपीठस्त्वधोमुखम् ।
अमृतं चिन्तयेत्तस्मिन् सुषुप्तैर्मस्तकैस्तथा ॥ १६ ॥

आपूर्य तत्तदूर्ध्वं चेदमृतात्मा तथैव च ।
ध्यायेदमृतमात्मानमेनद्विष्णुतनुः स्मृतम् ॥ १७ ॥

9. d) MMy. °दृष्टिताम् S¹S². °दृषिताम् for °दूषिताम्
13. b) MyS¹S². तमु° for समु°
14. ab) S¹S². om.
16. d) My. सुषुम्नैः for सुषुप्तैः

पूरकं कुम्भकं चैव रेचकं पूर्वमभ्यसेत् ।
औदरं वायुमद्‌गुह्य नाडिकाः पीड्य रेचयेन ॥ १८ ॥

श्रुतिवत् पूरयेत् सम्यक् जठरो बाह्यवायुना ।
अन्तर्बहिः स्थितं वायुं न गृह्णाति न मुञ्चति ॥ १९ ॥

पूर्णकुम्भ समं यस्मात् तस्मात् कुम्भकमुच्यते ।
द्वादशेन तु मन्त्रेण रेचकाद्यास्तथाभ्यसेत् ॥ २० ॥

ब्रह्मा विष्णुश्च रुद्रश्च क्रमेणास्याधिदेवताः ।
त्रिमलं सिद्धिरित्युक्तं त्रिगुणं सगुणं तथा ॥ २१ ॥

सात्त्विकं निर्गुणत्वं च ध्यात्वा सद्भावसम्भवम ।
भावत्वात् भूतशुद्धिं च आत्मशुद्धिस्तथैव च ॥ २२ ॥

देहमात्मानुशुद्ध्यन्ते शुद्धदेह इमां बुधः ।
देहशुद्धिं पुरा कुर्यात् स्नानसंशोषणादिभिः ॥ २३ ॥

निष्ठयादिकर्तृत्वेनैव मन्त्रशुद्धिमतः परम ।
स्नानशुद्धिं ततः कुर्यान्मन्त्रैः सम्मार्जनादिभिः ॥ २४ ॥

द्रव्यशुद्धिं प्रकुर्वीत ततो वेदादिनोदकं ।
सदा विष्णुरिति ध्यानैः बिम्बशुद्धिं च कारयेत ॥ २५ ॥

एवं हि बिम्बशुद्धिं च पश्चात् पूजां समाचरेत ।
द्रव्यशुद्धिं ततो वक्ष्ये शृणुष्व नृपसत्तम ॥ २६ ॥

20. d) S[1]S[2]. भवेत for °भ्यसेत्
21. d) M. अगुणं for त्रिगुणं
22. a) S[1]. निर्गुणं चैव for निर्गुणत्वं च
24. a) MS[2]. °कर्त° for °कर्तृ°
c) My. स्थान° for स्नान°
26. a) MS[1]. पञ्चशुद्धिश्च for बिम्बशुद्धिं च

धारणानि समस्तानि स्नानेनाचमनेन च ।
शरीरं पुरुषं तं च पुरुषस्य विशुद्ध्यति ॥ २७ ॥

ज्ञानप्रसादसन्तोषा मनसः शुद्धिहेतवः ।
आम्लकल्केन तोयेन हैमं ताम्रं च शोधयेत ॥ २८ ॥

धूमजुष्टेन कल्केन शुद्धिर्भवति राजते ।
तुषभस्म तथा कांस्ये फल्पालं च ताम्रभिः ॥ २९ ॥

शंखशुद्धिमथो वक्ष्ये लवणेन विशोधयेत ।
उष्णोदकेन क्रा णं च धूपपात्रादि शोधयेत ॥ ३० ॥

वस्त्राणां प्रोक्षणाच्छुद्धिः सूक्ष्मवस्त्रं तु धूपयेत् ।
सर्वेषां भूषणादीनां शुद्धिः प्रक्षालनाद् भवेत् ॥ ३१ ॥

गोमयालेपनं चैव स्नानभूमिश्च शुद्ध्यति ।
अष्टाक्षरेण मन्त्रेण पात्रेषु जलपूरणम् ॥ ३२ ॥

अष्टाधिकशतं वापि जप्त्वा तु जलशोधनम् ।
स्नेहादीनां च सर्वेषां शुद्धिरुत्पवनेन च ॥ ३३ ॥

कूर्चादीनां च सर्वेषां सद्यः कृत्वा तु शुद्ध्यति ।
सद्यः पक्वं घृतं शुद्धं प्रसाद्य च परित्यजेत ॥ ३४ ॥

तिलधान्यादिसर्वेषां क्षालनाच्छुद्धिरुच्यते ।
प्रोक्षणं पुष्पजातीनां गन्धादीनां तथैव च ॥ ३५ ॥

मङ्गलं तोरणं चैव स्रुक्स्रुवं पीठमेव च ।
शिबिकादिरथादीनां उलूखलं मुसलं तथा ॥ ३६ ॥

32. a) MS[1]S[2]. °लेपनं for °लेपने
34. c) S[1]. सदा for सद्यः
d) S[1]. प्रसादादि for प्रसादित
36. b) M. स्रुक्स्रुवौ for स्रुक्स्रुवं

एतेषां प्रोक्षणाच्छुद्धिः क्षालनात्तु तथैव च ।
जलद्रोणीं कटाहं च कुम्भं च कलशं तथा ॥ ३७ ॥

आज्यस्थालीं चरुस्थालीं प्रणीतां प्रोक्षणीं तथा ।
एतानि मृण्मयादीनि दहनाच्छुद्धिरुच्यते ॥ ३८ ॥

हविश्च दोषयुक्तंतु त्याज्यमेव उदाहृतम् ।
द्रव्याणां चैव सर्वेषां क्षालनात् प्रोक्षणादपि ॥ ३९ ॥

जपध्यानैस्ततः शुद्धिः भवत्येव न संशयः ।
अन्यो वा युक्तमन्यार्थमन्य एव समाहृतम् ॥ ४० ॥

द्रव्यं न शोधयेद्विद्वान् अर्हणं तु परित्यजेत् ।
अघृतं मलीनीभूतं अन्यार्थेन प्रकल्पितम् ॥ ४१ ॥

विण्मूत्रा दिष्वसंस्पृष्टं हीनद्रव्यं न शोधयेत् ।
अन्यैरनुपयुक्तं च सर्वेषां शुद्धिरुत्तमा ॥ ४२ ॥

अथ वक्ष्यामि मुद्राणां लक्षणं हि सविस्तरम् ।
शृणुष्व पृथिवीपाल ! यथापूर्वं मया श्रुतम् ॥ ४३ ॥

ज्ञानमुद्राऽर्थमुद्रा च आज्ञामुद्रा क्रिया स्मृता ।
ज्ञानमुद्रोत्तमा ज्ञेया मध्यमा चार्थमुद्रिका ॥ ४४ ॥

आज्ञामुद्राधमा कुर्यादिति मुद्राः प्रकीर्तिताः ।
दर्पणार्घ्ये च छत्रं च कूर्चन्यासं च शुद्धिदम् ॥ ४५ ॥

स्नानीये प्रोक्षणं चैव आज्ञामुद्रा प्रकीर्तिता ।
पाद्यं लेपनमार्जं च मुखमार्जनमार्जनम् ॥ ४६ ॥

44. b) S[1]. °स्तथा for स्मृता

अच्छिद्रमग्रपाणिं च पाणिमुद्रां प्रदर्शयेत् ।
न्यासान्तं शङ्खमर्घ्यान्तं पूजासंप्रोक्षणान्तकम् ॥ ४७ ॥

हविरन्तोद्वासकाले षडेते शङ्खमुद्रया ।
धूपं दीपं च घण्टा च चामरव्यजनादिकम् ॥ ४८ ॥

कूर्चेन मार्जनं पुष्पं मुष्टिमुद्रां प्रकल्पयेत् ।
अञ्जन तिलकं छत्रं कूर्चन्यासं च शुद्धिदम् ॥ ४९ ॥

मुखप्रक्षालनं चार्घ्यं पञ्चैते पद्ममुद्रया ।
न्यासान्तमर्चनान्तस्य नैवेद्ये मण्डलार्चने ॥ ५० ॥

जपं च शयनं चक्रमुद्रकं .... ....
न्यासादीनां निवेद्यादि धूपदीपार्चनादिकम् ॥ ५१ ॥

रजनीतैलशुद्ध्यर्थं पञ्चैते चास्त्रमुद्रिकाः ।
रथे च गरुडादीनां ध्वजछत्रादिवाहनम् ॥ ५२ ॥

पक्षीशस्य प्रतिष्ठान्तध्वजारोहावरोहयोः ।
सक्तेन तु क्रियान्ते च तार्क्ष्यमुद्रां प्रदर्शयेत ॥ ५३ ॥

पात्राणामर्चने काले नैवेद्यं दापयेत्तथा ।
अनलार्चनकाले तु सौरभिं दर्शयेत्ततः ॥ ५४ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां पञ्चशुद्धिविधानं
नाम अष्टादशोऽध्यायः ॥

47. d) MS[1]. पूजान्तं for पूजासं°
49. MMyS[1]S[2]. add the following after 49.
स्नानीये प्रोक्षणादीनां ज्ञानमुद्रां प्रदर्शयेत् ।
रजनीं चन्दनं चैव कूर्चन्यासं च शुद्धिदम् ॥
52. b) S[1]. शास्त्र° for चास्त्र°

# एकोनविंशोऽध्यायः

## [ मण्डलविधानम् ]

* * *

अथ वक्ष्यामि राजेन्द्र मण्डलं सर्वसिद्धिदम् ।
षोडशस्तम्भसंयुक्तं मण्डपं कारयेत् सुधीः ॥ १ ॥

तन्मध्ये कारयेद्वेदिमेकद्वित्रिचतुस्तथा ।
हस्तमानेन राजेन्द्र विस्तारायामतस्समम् ॥ २ ॥

दर्पणोदरवत् कुर्यात् गोमयेनोपलिप्य च ।
गन्धकल्केन संयोज्य सूत्रमादाय देशिकः ॥ ३ ॥

एकोत्तरचत्वारिंशत् सूत्राणां पातन ततः ।
षट्छतोत्तरसाहस्रं पदं तत्तु भवेत्ततः ॥ ४ ॥

शोधयेत् सूत्रमध्यं तु यथा लोचनसुप्रियम् ।
षोडशांशेन तन्मध्ये पद्मार्थं ग्राहयेत्ततः ॥ ५ ॥

बाह्यपङ्क्तिद्वयेनैव परः शोभा विशोधयेत् ।
आद्ये च पङ्क्तौ द्विपदं द्वितीये च चतुष्पदम् ॥ ६ ॥

एकीकृत्य तु यत्नेन सूक्ष्मद्वारं प्रकल्पयेत् ।
कोणं तु शोधयेत् पश्चात् षडंशेनैव देशिकः ॥ ७ ॥

एकपङ्क्त्ययेन तद्बाह्ये वीथीमेकेन शोधयेत् ।
बाह्यपङ्क्तिचतुष्केण भद्रकं शोधयेत्ततः ॥ ८ ॥

द्विपदं चाद्यपङ्क्तौ तु द्वितीये च चतुश्चतुः ।
चतुर्थे द्विपदं ग्राह्यं भद्रकां कुरु यत्नतः ॥ ९ ॥

4. cd) M. om.
9. b) S[1]. °श्शतम् for °श्चतुः

द्वादशांशेन राजेन्द्र भद्रकं कारयेत्ततः ।
गात्रकान् शोधयेत् पश्चात् द्वादशांशेन वा ततः ॥ १० ॥

चतुरंशमाद्यपङ्क्तौ द्वितीये च द्वयं द्वयम् ।
चतुरंशपदं पङ्क्त्या एकीकृत्य तु यत्नतः ॥ ११ ॥

कोणकां शोधयेत् पश्चात् विंशदंशेन यत्नतः ।
एकांशमाद्यपङ्क्तौ तु द्वितीये पञ्चकं ततः ॥ १२ ॥

तृतीये च चतुर्थे च सप्तसप्तपदं भवेत् ।
कूर्माकारं यथालब्धं शोधयेत्तद्वदेव तु ॥ १३ ॥

एकांशं लेपयेद्बाह्ये वीथ्यर्थं कल्पयेत्ततः ।
बाह्यपङ्क्तित्रयेणैव शोभाश्च परिकल्पयेत् ॥ १४ ॥

द्वितीये द्विपदं ग्राह्यं तृतीये च चतुष्पदम् ।
एकीकृत्य तु यत्नेन एकांशावरणं भवेत् ॥ १५ ॥

अथ ऊर्ध्वमुखाश्चैव द्वाराणां कल्पयेत्ततः ।
कोणान् विशोधयेत् पश्चात् दशांशेनैव देशिकः ॥ १६ ॥

द्वितीये च तृतीये च पञ्च पञ्च पदं ततः ।
मत्स्याकारं प्रकुर्वीत यथाभावं तथैव च ॥ १७ ॥

बाह्यपङ्क्तिद्वयेनैव परितो वीथिमाचरेत् ।
पञ्चपङ्क्त्या भवेद्बाह्ये स्थूलद्वाराणि कल्पयेत् ॥ १८ ॥

द्वितीये द्विपदं ग्राह्यं तृतीये च चतुष्पदम् ।
षट्पदं तु चतुर्थेन अष्टांशं पञ्चमे तथा ॥ १९ ॥

12. ab) S[1]. om.

विंशत्यंशेन राजेन्द्र सूक्ष्मद्वाराणि कल्पयेत् ।
द्वाराणां मध्यभागे तु एकांशावरणं ततः ॥ २० ॥

कोणं तु शोधयेत् पश्चात् अंशेन द्वादशेन च ।
एकद्वित्रिचतुष्पङ्क्तौ त्रिपदं त्रिपदं भवेत् ॥ २१ ॥

पद्मवर्णेन पद्मं तु अन्तरालं तु नीलकम् ।
शोभेन पूरयेदरुणं पीतं कोणेन पूरयेत् ॥ २२ ॥

श्यामेन पूरयेद्वीथीं भद्रकापीतवर्णकम् ।
श्यामेन पूरयेद्गात्रं कृष्णवर्णं तु कूर्मकम् ॥ २३ ॥

शोणितांशं प्रपूर्याथ वीथीमेकेन कारयेत् ।
शोभानां हेमवर्णेन पार्श्वशोभं तु रक्तवत् ॥ २४ ॥

प्रतिशोभेन शुक्लं तु श्यामेनावरणं ततः ।
कोणं तु जलवर्णेन वीथीं कृष्णेन पूरयेत् ॥ २५ ॥

द्वाराणां पाण्डुरं चैव प्रतिद्वारं तु रक्तकम् ।
शेषद्वारं तु श्यामेन रक्तेनावरणं ततः ॥ २६ ॥

पीतेन पूरयेत् कोणं यथावर्णेन पूरयेत् ।
ध्यायेद्देवं पङ्कजस्थं तच्छक्तिं च समाह्वयेत् ॥ २७ ॥

समस्तपरिवाराणां अर्चयेन्मण्डलं ततः ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां मण्डलविधानं नाम
एकोनविंशोऽध्यायः ॥

27. c) M. ततो देवं for ध्यायेद्देवं

# विंशोऽध्यायः

* * *

अथातः संप्रवक्ष्यामि चतुःषष्टि .... ।
.... .... कृत्वा तन्मध्ये वेदिकां क्रमात ॥ १ ॥

एकद्वित्रि च हस्तेन चतुरश्रं प्रकल्पयेत ।
दर्पणोदरवत कुर्यात् पूर्वोक्तं लक्षणान्वितम् ॥ २ ॥

गोमयालेपनं कृत्वा प्रोक्षयेत् पुण्यतोयकैः ।
गन्धकल्केन संयोज्य सूत्रमन्तर्गतं यथा ॥ ३ ॥

त्रयोदशगुणानां तु पातयेत तत समन्ततः ।
वीथीनां तु प्रविस्तारं चतुरङ्गुलविस्तृतम् ॥ ४ ॥

प्रागादीशानपर्यन्तं प्रवक्ष्यामि यथातथम् ।
पावकादिचतुष्कोणे विन्यसेत्तु चतुष्पदम् ॥ ५ ॥

षोडशं पदमारभ्य ब्रह्मस्थाने च कल्पयेत् ।
घृतं क्षीरं दधि चैव मधु विन्यस्य बुद्धिमान् ॥ ६ ॥

तन्मध्ये तु चतुष्कुण्डानग्न्यादीशावसानके ।
तत्पुरः कुम्भयुग्मं तु हिमतोयं तु चन्दनम् ॥ ७ ॥

.... .... .... ....

.... .... .... ....

[विंशोऽध्यायः समाप्तः]

---

3. a) MMy. °लेपितं for °लेपनं

7. All Mss. om. further portion.
S[1]. reads the following after this Sloka :

इति विंशोऽध्यायः समाप्तः

# एकविंशोऽध्यायः

## [ ध्वजारोहणविधिः ]

* * *

उत्सवस्य विधिं राजन् वक्ष्यामि अवधारय ।
तत्सर्वं विस्तरेणैव यथापूर्वं मया श्रुतम् ॥ १ ॥

नित्यो नैमित्तिकः काम्यः त्रिविधश्चोत्सवः स्मृतः ।
पक्षे मासे ऋतौ चैव विषुवे चायनद्वये ॥ २ ॥

पुण्यर्क्षवारसंयुक्ते कर्तव्यं प्रतिवत्सरे ।
प्रसूनाङ्कुरपुष्पं च रक्षाबन्धसमन्वितम् ॥ ३ ॥

एकद्वित्रिदिनं वापि उत्सवं च समाचरेत् ।
अन्ते चावभृथं कुर्यात् सेवितं सर्वदैवतैः ॥ ४ ॥

इति नित्यः समाख्यातः तद्विधानं क्रमाच्छृणु ।
तीर्थऋक्षस्य पूर्वेद्युः तद्रात्रौ चाधिवासयेत् ॥ ५ ॥

मण्डपस्य च मध्ये तु गोमयेनोपलिप्य च ।
शालिव्रीहितिलैश्चैव नववस्त्रेण संयुतम् ॥ ६ ॥

अन्तरान्तरयोगेन कल्पयेच्छास्त्रचोदितम् ।
स्नापयेत् तीर्थबिम्बं च कलशैः पञ्चविंशकैः ॥ ७ ॥

पुण्याहं वाचयेत् पश्चात् प्रोक्षयेत्तीर्थबिम्बकम् ।
तद्बिम्बं तु समादाय शाययेत् स्थण्डिलोपरि ॥ ८ ॥

* AMMy SvT. leave some space after 8 th verse in Chap. XX and continue from 'उत्सवस्य विधिं...'' with out giving title 'एकविंशोऽध्यायः ।'

3. a) MyT. om. °र्क्ष°

नववस्त्रेण संछाद्य दिग्बन्धं कारयेत्ततः ।
तस्य चोत्तरदिग्भागे होमकर्म यथाविधि ॥ ९ ॥

समिधाज्यचरून् हुत्वा प्रत्येकं चाष्टविंशतिम् ।
मूलमन्त्रेण मतिमान् संपाताज्यं समानयेत् ॥ १० ॥

उत्थाप्य स्थण्डिलस्थं च बिम्बमादाय पाणिना ।
भद्रासने समारोप्य घृतारोपणमाचरेत् ॥ ११ ॥

रक्षाबन्धं ततः कृत्वा धूपं दीपं च दर्शयेत ।
नैवेद्यं दापयेत पश्चात् ताम्बूलं च प्रदापयेत ॥ १२ ॥

अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत् ।
प्रभाते विमले शुद्धे कृतकृत्यस्तु पूजकः ॥ १३ ॥

नित्यपूजां समाप्याथ होमं कुर्यात्तु पूर्ववत् ।
कुण्डे महानसे चैव होमयेद्देशिकोत्तमः ॥ १४ ॥

अन्तरावरणेष्वेव बलिदानं यथाक्रमम् ।
औत्सवं बिम्बमादाय वस्त्राभरणमाल्यकैः ॥ १५ ॥

अलङ्कृत्य तु देवेशं यानमारोपयेत्ततः ।
अह्नि रात्रौ तु देवेशं परिभ्रमणमाचरेत् ॥ १६ ॥

पूर्णाहुतिं ततो हुत्वा तीर्थयात्रां च कारयेत् ।
एवमादिसुसंयुक्तो नित्यमुक्तो विधीयते ॥ १७ ॥

नैमित्तिकोत्सवविधिं वक्ष्यामि शृणु भूपते ।
माघमासे तु वै पुण्ये मासे फाल्गुन एव वा ॥ १८ ॥

चैत्रे मासे तु वैशाखे कुर्यान्नैमित्तिकोत्सवम् ।
ज्येष्ठमासे न कर्तव्यं दक्षिणायनमव्ययम् ॥ १९ ॥

अज्ञानाद्यदि वा कुर्याद्राजराष्ट्रं विनश्यति ।
उत्सवः प्रथमं कल्प्यः मासाधिक्यं तु वर्जयेत् ॥ २० ॥

भार्गवास्तमये चैव वर्जयित्वा विचक्षणः ।
उत्सवे तद्द्वितीयादौ नोक्तदोषः कथञ्चन ॥ २१ ॥

ध्वजाङ्कुरं तु प्रथमं तत्पश्चादुत्सवाङ्कुरम् ।
तीर्थाङ्कुरं च तदनु बीजावापनपूर्वकम् ॥ २२ ॥

ध्वजमारोपयेत् पश्चात् भेरीताडनसिद्धये ।
एकाहादिनवाहान्तमुत्सवं कारयेन्नृप ॥ २३ ॥

अन्ते चावभृथं कुर्याद्दशमे पुष्पयागकम् ।
एवमादिसुसंयुक्तं नैमित्तिकमथोच्यते ॥ २४ ॥

वर्षे वर्षे तु कर्तव्यं ध्वजारोहणपूर्वकम् ।
प्रवर्तयेद्यत्र देशे यज्ञकर्म यथाविधि ॥ २५ ॥

तद्देशक्षेममारोग्यं न दुर्भिक्षादिकं भयम् ।
रात्रौ न दृश्येच्चेन्द्रधनुरुल्कापातं न सम्भवेत् ॥ २६ ॥

न सम्भवेद्वालमीतो भूभेदस्तु न संभवेत् ।
बेरादिप्रतिकायानामुत्पातं न कदाचन ॥ २७ ॥

न सम्भवेद्भूमिकम्पो दिग्दाहो न कदाचन ।
भूतादिदर्शनं नैव नातिवृष्टिर्भवेत्तदा ॥ २८ ॥

तद्देशवासिनो राज्ञो रोगादिर्नैव बाधते ।
परचक्राद्भयं नैव महावातो न सम्भवेत् ॥ २९ ॥

वृष्टिं विना च दम्भोलिः पातयेन्न कदाचन ।
न भग्नो चैत्यवृक्षाणां जले चाग्निर्न संभवेत् ॥ ३० ॥

एवमादिमहोत्पातो यदि सम्भवते नृप ।
उत्पातदोषो नैव स्यात् देवयागे कृते सति ॥ ३१ ॥

तस्मात् सर्वप्रयत्नेन ध्वजपूर्वोत्सवं कुरु ।
बहुनात्र किमुक्तेन ध्वजारोहणपूर्वकम् ॥ ३२ ॥

प्रवर्तते यत्र यागस्तत्र नैमित्तिकः स्मृतः ।
यत्किञ्चित कालमुद्दिश्य क्रियते यत् फलार्थिना ॥ ३३ ॥

स काम्य इति विज्ञेयो यथेष्टफलदायकः ।
नवाहसप्तदिवसपञ्चाहैकदिनावधि ॥ ३४ ॥

यथा विभवविस्तारं प्रकल्प्यश्च महोत्सवः ।
अन्ते चावभृथं कुर्यात् त्रिविधः पुनरुत्सवः ॥ ३५ ॥

प्रतिष्ठान्तोत्सवैकश्च जन्मऋक्षदिनोत्सवः ।
उत्सवः पञ्चपर्वाख्यः त्रिविधोत्सव उच्यते ॥ ३६ ॥

ध्वजाद्यवभृथपर्यन्तं कर्तव्यं प्रतिवत्सरम् ।
कारयेत्तु विशेषेण प्रतिष्ठान्तोत्सवः स्मृतः ॥ ३७ ॥

अवताराणि सर्वाणि उद्भवन्ति महीतले ।
जन्मऋक्षोत्सवो ज्ञेय इति शास्त्रस्य निश्चयः ॥ ३८ ॥

दीपोत्सवपवित्रं च उत्सवो दमनीदलैः ।
फलोत्सवश्च कल्हारपञ्चपर्वोत्सवः स्मृतः ॥ ३९ ॥

अयने विषुवे वापि मासर्क्षेष्वथवा नृप ।
पौर्णमास्याममावास्यारोहिण्यां श्रवणे तथा ॥ ४० ॥

32. d) MS[1]. °पूर्वकः for °पूर्वकम्
39. a) MyS[1]T. उत्सवः पवित्राख्यः

प्रतिष्ठादिवसे वापि कारयेत् तीर्थवासरः ।
कल्पयित्वा नृपश्रेष्ठ तीर्थे तु त्रिविधोत्सवे ॥ ४१ ॥

नैमित्तिकोत्सवे विष्णोर्वर्तते ग्राममध्यके ।
कुर्यादन्योत्सवं नैव चौलादिं नैव संस्क्रिया ॥ ४२ ॥

अज्ञानाद्यदि वा कुर्यान्महादोषस्तु संभवेत् ।
तस्मात सर्वप्रयत्नेन वर्जयेत् वैष्णवोत्तमैः ॥ ४३ ॥

नैमित्तिकोत्सवविधौ राजन्नद्य प्रदृश्यते ।
हस्तैरष्टादशैर्युक्तं विस्तीर्णं पञ्चभिर्दृढम् ॥ ४४ ॥

सदशं वस्त्रयुग्मं च एकीकृत्य प्रयत्नतः ।
प्रासादद्वारमानं वा गर्भागारमम् न वा ॥ ४५ ॥

उपानदुत्तरान्तं वा पादाग्रस्य समं न वा ।
एवमुत्सेधमानं तु विस्ताराच्छृणु भूपते ॥ ४६ ॥

आयतं भूतभागेकं भागविस्तारमुच्यते ।
लम्बनं तत्समं प्रोक्तं द्विस्त्रिपुच्छमथापि वा ॥ ४७ ॥

मत्स्यपुच्छवदाकारं पुच्छार्धं शिखराकृतिः ।
कण्ठाग्रे चैव पुच्छाग्रे किङ्किणीरूपशोभितम् ॥ ४८ ॥

श्वेतं रक्तं तथा पीतं कृष्णं चैव चतुर्विधम् ।
ब्राह्मणादिक्रमेणैव ध्वजानां वर्णमुच्यते ॥ ४९ ॥

आलिप्य शङ्खकल्केन शकुनं स्थाप्य न देशिकः ।
शुभनक्षत्रदिवसे लिखित्वा विनतासुतम् ॥ ५० ॥

42. d) S¹. चौलादीन् नैव संभवेत्
M. संस्तुयः for संस्क्रिया

44. b) M. प्रदृश्यते for प्रदश्यते

वैनतेयं सुवर्णाभं पक्षमण्डलमण्डितम् ।
नीलनासाग्रसंयुक्तं नागेन्द्राभरणैर्युतम् ॥ ५१ ॥

सर्वलक्षणसंपूर्णं पटे वालिख्य चित्रकैः ।
तत्पार्श्वे चामरद्वन्द्वौ छत्रव्यजनपार्श्वयोः ॥ ५२ ॥

विचित्रकुसुमैर्युक्तं दीपदण्डसमन्वितम् ।
घण्टापालिकया सार्धं तदधः पूर्णकुम्भकम् ॥ ५३ ॥

कूपादिके च नैवेद्यं पार्श्वयोर्दीपधूपिकाम् ।
अन्तरालेषु सर्वत्र श्यामवर्णं च पूरयेत् ॥ ५४ ॥

हस्तं प्रक्षालयेच्छिल्पी पटमादाय बुद्धिमान् ।
पश्चाद्भूषणैर्युक्तं वस्त्रविद्गन्धवासितम् ॥ ५५ ॥

एवं सर्वं समादाय देशिकः सुसमाहितः ।
ध्वजारोहणनक्षत्रात् पूर्वेद्युश्च निशामुखे ॥ ५६ ॥

प्रयायात् कर्मशालां च सहितो मूर्तिधारकैः ।
लिखितं पटमालोक्य लक्षणं सुपरीक्ष्य च ॥ ५७ ॥

शङ्खदुन्दुभिनिर्घोषैः काहलध्वनिभिः सह ।
गीतैश्च विविधै रम्यैः श्रुतिघोषैः पृथग्विधैः ॥ ५८ ॥

सह ध्वजपटं तस्मादानयेन्मुखमण्टपे ।
प्रविश्याभ्यन्तरं मूलबेरस्थं परमेश्वरम् ॥ ५९ ॥

अभिवाद्यार्घ्यगन्धाद्यैः पूजयेद्गन्धपुष्पकैः ।
विसृज्य शिल्पिनं पश्चात् संप्रोक्ष्यार्घ्याम्भसा पटम् ॥ ६० ॥

---

53. c) S[1]. युक्तं for सार्धं
58. d) M. पृथक् पृथक् for पृथग्विधैः

सिद्धार्थकान्वितैः पुष्पैः ताडयेदस्त्रमन्त्रितैः ।
दर्शयेद्देवदेवस्य सम्मुखं साधकोत्तमः ॥ ६१ ॥

दहनाप्यायनं कुर्याद्विधिदृष्टेन कर्मणा ।
भूयोऽर्घ्यगन्धपुष्पाद्यैः प्रपूज्य परमेश्वरम् ॥ ६२ ॥

गिरोर्चयान्वितं मन्त्रं बद्धाञ्जलिकरः पठेत ।
लक्षणं विहगेशस्य उच्चार्य विधिना ततः ॥ ६३ ॥

धान्यपीठे तु संस्थाप्य पुण्याहं वाचयेत्ततः ।
पटशुद्धिं ततः कृत्वा अधिवासनमाचरेत ॥ ६४ ॥

मण्डपं पूर्ववत् कृत्वा सर्वालङ्कारसंयुतम् ।
वेदिमध्ये तु कुर्वीत षड्भारव्रीहिपीठकम् ॥ ६५ ॥

तदर्धं तण्डुलं चैव तदर्धं तिलमेव च ।
अन्तरान्तरयोगेन नववस्त्रान्तरेण तु ॥ ६६ ॥

रक्तकम्बलमाच्छाद्य व्याघ्रचर्म ततोपरि ।
कुशास्तरणकं कृत्वा मृदु वाच्छादयेत्ततः ॥ ६७ ॥

शिरोपधानसंयुक्तं पादगण्डुकशोभितम् ।
वेदिकाकलशेष्वष्टस्वनन्तादीन् प्रपूजयेत ॥ ६८ ॥

शङ्खादिमङ्गलानां तु विन्यसेत् परितः क्रमात ।
रक्तवस्त्रं सकूर्चं च हेमपत्रैश्च निक्षिपेत ॥ ६९ ॥

अनन्ताद्यष्टनागानां कुण्डेष्वष्टसु पूजयेत् ।
पूजयेत् कलशेष्वष्टमङ्गलानि यथाक्रमम् ॥ ७० ॥

---

66. d) S¹S²SvT. वस्त्रान्तरेण for वस्त्रान्तरेण
69. d) M. °पद्मं च for °पत्रैश्च

वासोभिर्वेष्टयेद्येषु निक्षिप्तकलशेषु च ।
वासांसि मध्ये संस्तीर्य गरुडं तत्र शाययेत् ॥ ७१ ॥

प्रतिग्रीवं ततो वस्त्रैस्संछाद्य पतगेश्वरम् ।
तस्य दक्षिणतः कुम्भं विन्यसेत् तण्डुलोपरि ॥ ७२ ॥

वारिपूर्णं सुसंवीतं सदशेनाहतेन तु ।
शुक्लानां रक्तयुग्मेन मृदुना सुशुभेन च ॥ ७३ ॥

सरत्नहेमसंयुक्तं सापिधानं सकूर्चकम् ।
अस्मिन्नावाहयेद्देवं गरुडं विनतासुतम् ॥ ७४ ॥

ततः पटगतं बिम्बं शयनं गरुडस्य तु ।
लयमार्गेण संहृत्य पुनरुत्पादयेत् क्रमात् ॥ ७५ ॥

सवाचकानि विन्यस्य मन्त्रदेवं प्रकल्पयेत् ।
सकलीकृत्य करणं ध्यानमार्गेण देशिकः ॥ ७६ ॥

कुम्भस्थितेन तोयेन प्रोक्षयेत् स्वस्वविद्यया ।
पूर्वादिकलशस्थाभिरनन्तादीन् स्वनामभिः ॥ ७७ ॥

प्रणवादिनमोन्तैश्च कुशैः संप्रोक्षयेत् क्रमात् ।
सान्निध्यमर्थयित्वा तु यावद्यागसमापनात् ॥ ७८ ॥

तावत्संपूजयेत्सर्वैरुपचारैः खगेश्वरम् ।
घृतप्लुतं तु मुद्गान्नं नैवेद्यमुपकल्पयेत् ॥ ७९ ॥

चित्राभासप्रतिष्ठां तु कारयेत्तत्रवित्तमः ।
छायाधिवासनं कुर्यात् जले संहृत्य देशिकः ॥ ८० ॥

76. c) S[1]. करणी° for करण°
79. c) M. पूतं for प्लुतं
80. b) S[1]. तन्त्र° for तत्र

शाययित्वा ततो वेद्यां संहृत्योत्पाद्य तत्त्वतः ।
स्थण्डिलं च चतुर्दिक्षु कृत्वा तत्र विधानतः ॥ ८१ ॥

वैष्णवाग्निं निधायात्र होमकर्म समाचरेत् ।
समिधाज्यचरूणां तु प्रत्येकं शतमष्ट च ॥ ८२ ॥

अष्टाविंशति वा कुर्यात् प्रत्येकं षोडश तु वा ।
पाकगेहस्य कुण्डे वा होमं कुर्यात्तु देशिकः ॥ ८३ ॥

चतस्रो मूर्तयः प्रोक्ताः पक्षिराजस्य देशिकैः ।
स्वाहान्तं जुहुयात् सर्वैः मूर्तिपा मूर्तिभाविना: ॥ ८४ ॥

एवं समाप्य होमं तु स्पृशेयुस्ते खगेश्वरम् ।
पादयोर्जठरे चास्ये मूर्ध्नि चैव यथाक्रमम ॥ ८५ ॥

अथवा मूलमन्त्रेण होममेकं गुरुः स्वयम् ।
एवं समाप्य होमं तु स्थापनं गरुडस्य च ॥ ८६ ॥

पुण्याहं कारयित्वा तु ब्राह्मणैर्मन्त्रवित्तमैः ।
बन्धयेत् कौतुकं पश्चात् वैनतेयस्य मन्त्रतः ॥ ८७ ॥

नयनोन्मीलनं कृत्वा रक्षाबन्धमतः परम ।
दर्शयेन्नवधान्यं तु सवत्सां गां च दर्शयेत ॥ ८८ ॥

अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत ।
ततः प्रभाते सुस्नात्वा स्वाचान्तो देशिकोत्तमः ॥ ८९ ॥

नित्यार्चनं विभोः कृत्वा विशेषयजनं तथा ।
वैनतेयं ततोऽभ्यर्च्य कुम्भपूर्वं यथाविधि ॥ ९० ॥

82. a) S¹. निधायाथ for निधायात्र
84. d) S¹S². °भाविनः for भाविना

महाहविर्निवेद्याथ होमं कृत्वा यथाक्रमम् ।
ततश्चतुर्थावरणे तृतीयावरणेऽपि वा ॥ ९१ ॥

द्वितीयावरणे वापि प्रथमावरणेऽपि वा ।
पीठगोपुरयोर्मध्ये पीठे वा गरुडाग्रके ॥ ९२ ॥

महामर्यादमध्ये वा ध्वजस्तम्भो विधीयते ।
अन्तस्सारं बहिस्सारं ध्वजदण्डस्य लक्षणम् ॥ ९३ ॥

अन्तस्सारं प्रवक्ष्यामि तयोः पूर्वमनुक्रमात् ।
चन्दनं चन्दकं वापि बिल्वमर्जुनमेव च ॥ ९४ ॥

आच्छायकं तु खदिरं सालं तिलकमेव च ।
शाखावृक्षध्वजं चैव एकहाटकमेव च ॥ ९५ ॥

लवस्तबककवृक्षं वा पनसं चाम्रमेव च ।
शीर्षकं जम्बुपुन्नागं अश्वत्थोदुम्बरं तथा ॥ ९६ ॥

खदिरादीनि वृक्षाणि याज्ञिकानीतराणि च ।
ग्राहयेत् ध्वजदण्डार्थमन्तस्सारः प्रकीर्तितः ॥ ९७ ॥

क्रमुकं नालिकेरं च वेणुतालं तथैव च ।
ग्राहयेद् ध्वजदण्डार्थं बहिस्सारोत्तमं नृप ॥ ९८ ॥

अन्तस्सारं बहिस्सरं तस्य लक्षणमुच्यते ।
शिराश्च विवराश्चैव आवर्ता ग्रन्थयस्तथा ॥ ९९ ॥

मण्डलाश्च तथा वक्रा गण्डा रूक्षाश्च वर्जयेत् ।
शिरास्थानादनारोग्यं विवराद्राष्ट्रनाशनम् ॥ १०० ॥

98. c) M. °दण्डार्थी for °दण्डार्थं

आवर्तेऽखिलदुर्भिक्षं गर्ते राजभयं भवेत् ।
भिन्ने छिन्ने शमीपातं प्रयत्नेन विवर्जयेत् ॥ १०१ ॥

ग्रहिणीविवरं वक्रे ग्रन्थौ च धनहीनता ।
मण्डले मण्डलं प्रोक्तं गर्भे पुत्रविनाशनम ॥ १०२ ॥

रूक्षे तु....ज्ञतोपायं वर्जयेच्च प्रयत्नतः ।
स्वयं शुष्के वधः प्रोक्तः कृमिदष्टे लयक्षयम् ॥ १०३ ॥

रोगदाऽशुभदा तेन वर्जयेच्च प्रयत्नतः ।
ऋजुस्निग्धघनं चैव युगपर्वसुखावहम् ॥ १०४ ॥

अयुग्मोऽशुभदो ज्ञेयस्तस्य लक्षणमुच्यते ।
उत्तमं शततालं तु तदर्धं मध्यमं भवेत् ॥ १०५ ॥

तदर्धमधमं विद्याद् ध्वजदण्डस्य लक्षणम् ।
अशीतितालमिच्छन्ति पटस्य द्विगुणोत्तमम ॥ १०६ ॥

गोपुरालयतुल्यं वा विमानोच्छ्रायमेव वा ।
बलिपीठं बहिः कुर्यात ध्वजस्तम्भं विचक्षणः ॥ १०७ ॥

पीठगोपुरयोर्यावदन्तरस्य च वास्तुतः ।
तावद्दूरं तु कुर्वीत ध्वजस्तम्भं यथाविधि ॥ १०८ ॥

प्रासादसदृशं श्रेष्ठं मध्यमं स्थलसीमकम् ।
जघन्यं तालहीनं च जघन्या यस्य उच्यते ॥ १०९ ॥

एतदायामविस्तारं ध्वजदण्डस्य नाळकाः ।
त्रिंशदङ्गुलनाहं तु अष्टाविंशच्च मध्यमम् ॥ ११० ॥

103. a) MS[2]. ... क्षेतु ... जंनोपायं
S[1]. ज्ञानो° for ज्ञतो°
d) S[1]. °दुष्टे for °दष्टे
110. b) MMy. ध्वजदण्डमनाहाका

षड्विंशमग्रतः प्रोक्तं स्तम्भमूलाग्रमध्यतः ।
अष्टादशाङ्गुलं नाहं षोडशाङ्गुलमेव वा ॥ १११ ॥

पञ्चदशाङ्गुलं नाहमुत्तमाधममध्यमम् ।
त्रिविधं दण्डनाहं तु सर्वेषां च प्रवर्तते ॥ ११२ ॥

स्तम्भं तु दशधा कृत्वा एकभागं गतक्षितौ ।
अथवा मूलमध्यं तु सममेव विधीयते ॥ ११३ ॥

ध्वजदण्डं त्रिभागं तु अग्रभागं तु पालिकाः ।
क्रमुकादिबहिस्सारं सत्वचं पत्रयुग्मकम् ॥ ११४ ॥

एवं लक्षणसंयुक्तं दण्डं संगृह्य देशिकः ।
फेणकालक्षणं वक्ष्ये तव चेदं यथातथम् ॥ ११५ ॥

फेणकाः सप्तपञ्चोक्तास्त्रयो वात्र सुलक्षणम् ।
फेणकाहस्तमानं तु द्विनवाङ्गुलिविस्तृतम् ॥ ११६ ॥

मूलदेशेऽग्रदेशे तु चतुरङ्गुलविस्तृता ।
द्वितालं सार्धहस्तं तु एकतालं तु वा तथा ॥ ११७ ॥

स्तम्भाग्रान् सव्ये बाह्यैव द्वितालं तालमेव वा ।
अधोधः फेणकाः सर्वे स्थापनीयाः सुनिश्चलम् ॥ ११८ ॥

एकैकस्योत्तरं प्रोक्तं द्वितालं हस्तमेव वा ।
दण्डोत्सेधमनेनैव फेणकान् विन्यसेत् क्रमात् ॥ ११९ ॥

तस्य मानं त्रिधा कृत्वा पूर्वस्तम्भे नियोजयेत् ।
अग्रभागे कन्दली स्यात गर्तं तु सुदृढीकृतम् ॥ १२० ॥

118. a) M. सव्योतिहाव्यैव MyS[1]S[2]. सव्योति बाह्यैव for °सव्ये बाह्यैव.

119. a) M. °स्यान्तरं for °स्योत्तरं

पूर्वभागे सुवृत्तं स्यात् मध्यं तु चतुरश्रकम् ।
अग्रं तु मुकुलाकारं दण्डस्थानं सुवृत्तकम् ॥ १२१ ॥

स्तम्भदण्डं निवेश्याथ पद्मं संलिख्य देशिक: ।
एवं लक्षणसंयुक्तान् फेणकान् कारयेद्बुध: ॥ १२२ ॥

फेणकामूलदेशे तु ध्वजस्तम्भं नियोजयेत् ।
क्षुद्रदण्डं निवेश्याथ तदग्रं सुषिरेव च ॥ १२३ ॥

प्रथमे पालिकायां तु गरुडं तं नियोजयेत् ।
पद्मासनसमासीनं बिम्बं वै गरुडस्य तु ॥ १२४ ॥

लोहजं दारुजं वापि यथा वित्तानुसारत: ।
तत्र बिम्बं सुखासीनं कृताञ्जलिपुटं सुधी: ॥ १२५ ॥

पालिकासुषिरं चैव स्तम्भदण्डं निधाय च ।
यथोक्तमानसंयुक्तं क्षुद्रदण्डमथोच्यते ॥ १२६ ॥

दशहस्ता पञ्चहस्ता सप्तहस्ताऽथवा तत: ।
नव द्वादशहस्ता वा कर्तव्या मानत: क्रमात् ॥ १२७ ॥

क्षुद्रदण्डं त्रिधा कृत्वा तिस्र: संस्थाप्य पालिका: ।
नाभीसुषिरयुक्ताभि: युक्तं कुर्वीत बुद्धिमान् ॥ १२८ ॥

आद्यायां पालिकायां तु गरुडं तं नियोजयेत् ।
ध्वजदण्डेन बध्नीयात् रज्जुना च दृढाङ्कनम् ॥ १२९ ॥

विप्रैरनधिकारैश्च अवश्यं न समाचरेत् ।
असंस्कारेण संयुक्तैराचार्यवचनस्थितै: ॥ १३० ॥

दीक्षितैर्बन्धयित्वा तु ध्वजं सम्यक् समाहित: ।
शिखिपिञ्छादिभिर्घण्टां क्षुद्रदण्डेऽपि बन्धयेत् ॥ १३१ ॥

ध्वजदण्डनिवेशार्थं लोहयन्त्रसमन्वितम् ।
वेष्टयेद्दर्भमालाभिः ध्वजदण्डं प्रदक्षिणम् ॥ १३२ ॥

पीठस्य पुरतो खात्वा दण्डस्थानं द्विहस्तकम् ।
प्रोक्षयेत् कुम्भतोयेन पुण्याहं वाचयेत्ततः ॥ १३३ ॥

सुवर्णरत्नबीजानि गर्तमध्ये विनिक्षिपेत ।
पूर्वाह्णे वाथ मध्याह्ने ध्वजमुत्थापयेत् सुधीः ॥ १३४ ॥

ब्राह्मणो यजमानश्चेत् प्रातःकाले ध्वजक्रिया ।
बहवो यजमानाश्चेत् कुर्यात् पूर्वाह्णिकेऽपि वा ॥ १३५ ॥

मुहूर्ते शोभने प्राप्ते ब्राह्मणानामनुज्ञया ।
ध्वजमुत्थापयेत्तत्र शङ्खादिस्वस्तिवाचनैः ॥ १३६ ॥

उत्सवारम्भदिवसे ध्वजोत्थापनमुत्तमम् ।
स्तम्भमूलस्थले वेदिं कृत्वा तु चतुरश्रकम् ॥ १३७ ॥

एकद्वित्रिसुहस्तं वा मेखलात्रयसंयुतम् ।
एकहस्तसमुत्सेधं विस्तारायामतत्समम् ॥ १३८ ॥

तस्योर्ध्वे पङ्कजं कुर्यात् त्रिभागैकैकभागकम् ।
अष्टपत्रसमायुक्तं दण्डमूले सकर्णिकम् ॥ १३९ ॥

मण्डपं तत्र कुर्वीत षोडशस्तम्भसंयुतम् ।
विभज्य शिल्पिनं पश्चात् पुण्याहं वाचयेत्ततः ॥ १४० ॥

यद्वा रजन्यां पूर्वस्यां कृत्वा स्तम्भाधिवासनम् ।
सद्य एव तु कर्तव्यं गत्वा गरुडसन्निधिम् ॥ १४१ ॥

140. d) S¹. सुधीः for ततः

रथे वा कुञ्जरे याने ध्वजमारोप्य यत्नतः ।
प्रभया चित्रकुसुमैः कृतया भूषयेद् ध्वजम् ॥ १४२ ॥

उत्सवं बिम्बमादाय वस्त्राभरणमाल्यकैः ।
आरोप्य शिबिके याने यथाविभवविस्तरम् ॥ १४३ ॥

बलिबिम्बमलङ्कृत्य आरोप्य शिबिकादिषु ।
आचार्यं पूजयेत् पश्चात् वस्त्रहेमाङ्गुलीयकैः ॥ १४४ ॥

परिचारैस्तु कर्तव्यं बिभ्राणं बलिपात्रकं ।
हरिद्रान्नं विशुद्धान्नं केवलं तण्डुलं नु वा ॥ १४५ ॥

पुष्पदर्भसमायुक्तं योजयेत् परिचारकैः ।
छत्रचामरसंयुक्तं मायूरव्यजनैस्ततः ॥ १४६ ॥

गीतकैर्व्यजनैर्वाद्यैः शङ्खकाहळनिस्वनैः ।
सुवेषगणिकासंघैस्तथा भक्तजनैस्तथा ॥ १४७ ॥

बलिबिम्बं पुरस्कृत्य मध्ये ध्वजपटं तु वा ।
आलोक्य चोत्सवं बिम्बं पुरस्तान बलिबेरकम् ॥ १४८ ॥

चण्डादिग्राममध्यान्तं बलिं कुर्याद्विचक्षणः ।
ब्रह्माणं ग्राममध्ये तु पूजयेद्देशिकोत्तमः ॥ १४९ ॥

इन्द्रादीशानपर्यन्तं लोकपालान् प्रपूजयेत् ।
बलिदानं प्रकुर्वीत उत्सवं कारयेत्ततः ॥ १५० ॥

कुमुदादींश्च देवांश्च पूजयेद्बलिपीठके ।
एवं प्रदक्षिणं कृत्वा ग्रामग्रामादिकं तथा ॥ १५१ ॥

---

146. d) M. °स्तथा for °स्ततः

147. d) MS¹S²T. °स्सह for °स्तथा

ध्वजं तु मण्डपे स्थाप्य कृतं च यदि पूर्वतः ।
स्थापनं ध्वजदण्डस्य स्थापयित्वा तु तत्पदम् ॥ १५२ ॥

अवरोप्य चोत्सवं बिम्बं मुखमण्टपविस्तरे ।
देव्यौ च देवदेवेशं पूजयेत् क्रमयोगतः ॥ १५३ ॥

पूर्वस्थापितकुम्भानां उद्धृत्य भगवन्मया ।
सहशङ्खनिनादाद्यैः प्रादक्षिण्येन मन्दिरम् ॥ १५४ ॥

अच्छिन्नधारयाचार्यः करकास्त्रजलेन तु ।
ध्वजपीठे समानीय तदग्रे विन्यसेत् पटम् ॥ १५५ ॥

पुण्याहं वाच्य संप्रोक्ष्य कृत्वा वै सोदकेन तु ।
महाकुम्भस्थतोयेन प्रोक्षयेद्भिन्नतासुतम् ॥ १५६ ॥

प्रोक्षयेदष्टनागानां शेषकुम्भस्थवारिणा ।
आचार्यो मन्त्रन्यासं तु पुष्पाञ्जलिपुरस्सरम् ॥ १५७ ॥

सन्निधिं सन्निरोधं च सम्मुखं च समाचरेत् ।
विभवे सति वस्त्रेण संवेष्टय ध्वजदण्डकम् ॥ १५८ ॥

ध्वजकुम्भं तु संवेष्ट्य प्रोक्षयेद् ध्वजदेवताः ।
दण्डस्तु मेरुदैवत्यं यष्टिश्चन्द्रस्तु देवता ॥ १५९ ॥

अनन्तो रज्जुदेवश्च ध्वजस्य विहगाधिपः ।
वासुकिर्वलयः प्रोक्तः फेणकानां त्रिदैवतम् ॥ १६० ॥

घण्टाधिदेवता लक्ष्मीर्दर्भमाला सरस्वती ।
ध्वजपीठस्य देवानामर्चयेद्देशिकोत्तमः ॥ १६१ ॥

एवं संकल्प्य मतिमान् ध्वजदण्डं प्रपूजयेत् ।
मूलादियात्राबिम्बानि पूजयेद्भिन्नतासुतम् ॥ १६२ ॥

162. b) M. प्रपूज° for प्रपूर°

मुद्गान्नपायसादीनि नैवेद्यं कबलीकृतम् ।
प्रार्थयेद्देवदेवेशमाशीर्वादमतः परम् ॥ १६३ ॥

पताकारोहणं पश्चात् सुमुहूर्ते सुलग्नके ।
पटे विस्तीर्य गरुडं मन्दिराभिमुखं यथा ॥ १६४ ॥

वेणुदण्डेन संयोज्य छत्रमन्तर्गतं यथा ।
बन्धयेद्रज्जुना सार्धं वेष्टयेद्दर्भमालया ॥ १६५ ॥

तद्रात्रौ तु तदग्रे च भेरीताडनमाचरेत् ।
रात्रौ भेरीं तु सन्ताड्य सर्वदेवप्रियार्थकम् ॥ १६६ ॥

खादिरं पनसं चापि आम्रं बिल्वं तथैव च ।
जातिवृक्षं शिरीषं च स्नवकार्जुनमेव च ॥ १६७ ॥

एवमादींश्च वृक्षांश्च सारान् संहृत्य यत्नतः ।
उत्तमं सप्ततालं स्यात् मध्यमं पञ्चतालकम् ॥ १६८ ॥

अधमं तु त्रितालं स्यात् भेर्यायामं त्रिधा स्मृतम् ।
एवमायामसंयुक्तं द्विमुखं कारयेद्बुधः ॥ १६९ ॥

दशाङ्गुलसमायामा यष्टिः कौमोदकी स्मृता ।
चर्मसूत्रकमात्तेषु दक्षिणे बन्धयेत् क्रमात् ॥ १७० ॥

मण्डपस्य च मध्ये तु आस्तीर्य नववाससा ।
व्रीहिमध्ये विनिक्षिप्य लेखयेत्तु विचक्षणः ॥ १७१ ॥

निक्षिप्य भेरीं तत्रैव घोषयेत् सर्वदेवताः ।
आहूय चार्घ्यगन्धादीनर्चयेत् क्रमयोगतः ॥ १७२ ॥

---

164. c) M. पटमास्तीर्य for पटे विस्तीर्य
169. b) S[1]. मतम् for स्मृतम्

उत्सवं बिम्बमादाय अलङ्कृत्य यथाविधि ।
ग्रामं प्रदक्षिणं नीत्वा यागशालां प्रवेशयेत् ॥ १७२ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां ध्वजारोहणविधिर्नाम
एकविंशोऽध्यायः ॥

## द्वाविंशोऽध्यायः

### [ उत्सवविधानम् ]

* * *

मार्कण्डेयः —

उत्सवं संप्रवक्ष्यामि यथा पूर्वं मया श्रुतम् ।
तत्सर्वं विस्तरेणैव शृणुष्व पृथिवीपते ॥ १ ॥

यागशालां ततः कुर्यादैशान्ये पावके तथा ।
नैर्ऋते वायवे सोमे याम्यायां त्वथवा भवेत ॥ २ ॥

प्रतिष्ठोक्तप्रकारेण कारयेन्मण्डपं नृप ।
द्वारतोरणकुम्भादीन् प्रतिष्ठायामिवाचरेत् ॥ ३ ॥

विसृज्य शिल्पिनं पश्चात् पुण्याहं वाचयेत्ततः ।
वास्तुहोमं प्रकुर्वीत शान्तिहोमं तु कारयेत ॥ ४ ॥

मण्डपं तु त्रिधा कृत्वा मध्यभागे तु वेदिका ।
हस्तमात्रसमुत्सेधा दर्पणोदरसन्निभा ॥ ५ ॥

परितश्चोपवेदिं तु चतुरङ्गुलमेव च ।
कुण्डानि परितश्चैव नव पञ्च च वा पुनः ॥ ६ ॥

पञ्चाग्निश्चोत्सवश्रेष्ठमेकाग्निश्चथवा भवेत् ।
एकाग्निश्चेत् प्रकुर्वीत वेद्यायां चतुरश्रकम् ॥ ७ ॥

कुण्डं तु कारयेत् सम्यक् पूर्वोक्तं तस्य लक्षणम् ।
अङ्कुरानर्पयेद्विद्वान् पूर्वोक्तविधिना ततः ॥ ८ ॥

नवकुम्भान् समादाय त्रिसूत्रेण विचित्रितान् ।
पूरयेद्गन्धतोयेन स्थण्डिलोपरि विन्यसेत् ॥ ९ ॥

वर्धनीमुत्तरे स्थाप्य परितोऽष्टघटानि वै ।
ब्रह्मविष्णुघटान् न्यस्य विधिना कारयेत्ततः ॥ १० ॥

विधानं कूर्चवस्त्राणां सौवर्णप्रतिमादिकान् ।
मूलबेरं समावाह्य महाकुम्भे च पूजयेत् ॥ ११ ॥

सुदर्शनं समावाह्य महाकुम्भे च पूरयेत् ।
सुदर्शनं समावाह्य करके च सुपूजयेत ॥ १२ ॥

परितः कलशानष्टौ आसयेदष्टशक्तिमान् ।
पूजयेत् स्वस्वनाम्ना च उद्धृत्य भगवन्मया ॥ १३ ॥

गेहप्रदक्षिणं कृत्वा यागगेहं प्रवेशयेत ।
पादप्रक्षालनं कृत्वा आचम्य विजितेन्द्रियः ॥ १४ ॥

स्नापयित्वोत्सवं बिम्बं अर्घ्याद्यैरर्चयेत्ततः ।
यागार्थं कङ्कणं बद्ध्वा रक्षामुद्रां प्रदर्शयेत् ॥ १५ ॥

मूलबेरादितीर्थार्थं कौतुकं बन्धयेत् क्रमात् ।
तेन कुर्यात्तु तीर्थार्थमुत्सवं कारयेत्ततः ॥ १६ ॥

बृहत्सामेति मन्त्रेण त्र्यम्बकेनाथवा भवेत् ।
अथवा मूलमन्त्रेण रक्षां कुर्यात्तु सर्वतः ॥ १७ ॥

देवानां दक्षिणे हस्ते शक्तीनां वामके करे ।
आचार्यो ऋत्विजैः सार्धं रक्षाबन्धं तु कारयेत् ॥ १८ ॥

द्वारपूजापुरस्कं तु ऋत्विजो वरयेद्गुरुः ।
आचार्योक्तेन वा कुर्याद्यथा वित्तानुसारतः ॥ १९ ॥

12. ab) MMy. S[1]S[2]. om.

कुम्भमण्डलबिम्बादीन् स्वस्वस्थानेषु विन्यसेत् ।
ऐशान्यां कुम्भं विन्यस्य मण्डलं वह्निगोचरे ॥ २० ॥

दीपकुम्भं तु नैर्ऋत्यां पालिकां वायुगोचरे ।
बिम्बस्थानं च वारुण्यां कुण्डं वेद्युपरि न्यसेत् ॥ २१ ॥

वेदिकायाश्च परितो मङ्गलानि तु विन्यसेत् ।
द्वारपूजापुरस्कं तु अर्चयेत द्वारदेवताः ॥ २२ ॥

कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्पनेत्रः सुमुखः सुप्रतिष्ठितः ॥ २३ ॥

द्वारि द्वारि प्रकर्तव्यौ द्वौ द्वौ देवौ यथाक्रमम् ।
महाकुम्भस्थदेवेशं पूजयेत प्रथमं गुरुः ॥ २४ ॥

मण्डलस्थं च देवेशं पूजयेत्तदनन्तरम् ।
बिम्बस्य तस्य देवेशमर्चयेत्तदनन्तरम् ॥ २५ ॥

अग्निमानीय संप्रोक्ष्य कुण्डमध्ये विनिक्षिपेत् ।
उल्लेखनादिकार्याणि पूर्वोक्तविधिना ततः ॥ २६ ॥

ऐन्द्रादीशानपर्यन्तमष्टौ कुम्भान् विनिक्षिपेत् ।
धान्यराशिषु संस्थाप्य सापिधानं सकूर्चकम् ॥ २७ ॥

इन्द्रादीन् पूजयेत पश्चात् होमकर्म समारभेत् ।
समिधाज्यचरून् हुत्वा प्रत्येकं शतसंख्यया ॥ २८ ॥

अष्टाविंशति वा कुर्यात् मूलमन्त्रेण मन्त्रवित् ।
चरुमष्टाक्षरेणैव जुहुयाद्देशिकोत्तमः ॥ २९ ॥

---

20. c) MMyS[1]. कुम्भ for कुम्भं

चरुणा परिवाराणां स्वमन्त्रेणैव होमयेत् ।
वनस्पतिश्चोदधिश्च पर्वताश्च तथापरे ॥ ३० ॥

सर्वे देवाः समुद्राश्च सप्त चण्डादिदेवताः ।
भूतानि पशवो वृक्षाः तथैवौषधयः स्मृताः ॥ ३१ ॥

एवं प्रतिदिनं कुर्यात् सायं प्रातर्विशेषतः ।
तावत्सन्निहितं राजन् दर्भाः परिधयः स्मृताः ॥ ३२ ॥

औत्सवं बिम्बमादाय देवीभिः सह यत्नतः ।
आरोप्य शिबिके याने भक्तैर्भागवतैस्सह ॥ ३३ ॥

छत्रचामरसंयुक्तमातपत्रैर्मनोहरैः ।
विचित्रैस्तालवृन्तैश्च मायूरव्यजनैस्ततः ॥ ३४ ॥

केतुदण्डैर्विचित्रैश्च दुकूलपटशोभितैः ।
भेरीमृदङ्गपूर्वाणां घोषैरन्यैश्च मङ्गलैः ॥ ३५ ॥

चतुर्वेदमयैर्घोषैः स्तोत्रघोषसमन्वितैः ।
गीतकैर्विविधैर्वाद्यैः शङ्खकाहलनिस्वनैः ॥ ३६ ॥

सुवेषगणिकासंघैस्तथा भक्तजनैस्सह ।
भ्रामयित्वा क्रमेणैव सर्वाण्यावरणानि च ॥ ३७ ॥

एवं प्रतिदिनं कुर्यादहोरात्रं विशेषतः ।
बलिबेरमलङ्कृत्य यथा विभवविस्तरम् ॥ ३८ ॥

प्रासादद्वारमारभ्य बहिर्द्वारावसानकम् ।
ग्रामदिक्ष्वष्टके चैव बलिदानं समाचरेत् ॥ ३९ ॥

32. d) M. दर्भोपरि यथा for दर्भाः परिधयः
38. c) S[1]. °बिम्ब° for °बेर°

बलिं निरवशेषं च बलिपीठे विनिक्षिपेत् ।
प्रथमे बलिरात्रौ तु समाप्तदिवसे नृप ॥ ४० ॥

अहोरात्रौ तु कर्तव्यं बलिं कुर्यात्तु देशिकः ।
मुद्गान्नं पायसं चैव कृसरान्नं तु गौळकम् ॥ ४१ ॥

शुद्धान्नमथवा राजन् दिनं प्रति दिनं प्रति ।
प्रथमेऽहनि संप्राप्ते कूटारोहणदेवराट् ॥ ४२ ॥

तद्रात्रौ शेषपीठं च यथासंस्कारसंयुतम् ।
तृतीये दिवसे भूप गरुडारोहणं प्रति ॥ ४३ ॥

तद्रात्रौ देवदेवेशमारोप्य शिबिकान्वितम् ।
वेदमार्गदिने राजन् प्रातःकाले हरिं यजेत ॥ ४४ ॥

शिबिकादिविशेषेण वाहनानि विशेषतः ।
तद्रात्रौ कूटशालायां देवदेव्यौ विशेषतः ॥ ४५ ॥

आरोप्य बहुभिर्दीपैर्गणिकादेवदासिभिः ।
उत्सवं कारयेत् पश्चात् पञ्चमे गरुडोत्सवम् ॥ ४६ ॥

तद्रात्रौ प्रभया युक्तं उत्सवं कारयेत्ततः ।
पूर्वं च दिवसे प्राप्ते जलक्रीडां च कारयेत ॥ ४७ ॥

अर्चयेत्तु विशेषेण तद्रात्रौ तु गजोत्सवम् ।
रक्षाबन्धं ततः कृत्वा रथस्यारोहणं प्रति ॥ ४८ ॥

41. c) MS[1]. पायसान्नं च for पायसं चैव
43. b) S[1]S[2]. यथालङ्कार° for यथासंस्कार°
47. c) M. वासरे च रतप्रोक्त My. वासरे श्रतपः प्रोक्तं S[2]. वासरे रितपः प्रोक्तः

सप्तमे दिवसे प्राप्ते रथारोहणमाचरेत् ।
रक्षसां विजिगीषार्थं दुर्निमित्त निवारणम् ॥ ४९ ॥

उल्कापातविनाशार्थं भूकम्पस्य निवारणम् ।
उत्पातपरिहारार्थं रथारोहणमाचरेत् ॥ ५० ॥

अलङ्कृत्य रथं सम्यक् नानावस्त्रैश्च भूषयेत् ।
षोडशस्तम्भसंयुक्तं रथमारोपयेत्ततः ॥ ५१ ॥

धामादिग्राममध्यान्तमथवा ग्राममेव वा ।
प्रदक्षिणं यथान्यायमवरोप्याथ यत्नतः ॥ ५२ ॥

गेहं प्रदक्षिणीकृत्य आलयं संप्रवेशयेत् ।
स्नपनं कारयेत् पश्चात कलशैः पञ्चविंशकैः ॥ ५३ ॥

उक्तद्रव्यैर्यथापूर्वैः कारयेद्देशिकोत्तमः ।
डोलामारोपयेत् पश्चात् देवीभिः सह यत्नतः ॥ ५४ ॥

नृत्तगीतादिसकलं मण्टपं तु विशेषतः ।
महाहविर्निवेद्याथ ताम्बूलं च प्रदापयेत् ॥ ५५ ॥

ग्रामं प्रदक्षिणं कृत्वा भक्तैर्भागवतैस्सह ।
आलयं संप्रविश्याथ पुनः स्नपनमाचरेत् ॥ ५६ ॥

रक्षाबन्धं ततः कृत्वा मृगयात्रार्थमेव च ।
अष्टमे दिवसे प्राप्ते मृगयात्रां च कारयेत् ॥ ५७ ॥

MS[1]S[2]. add the following after 51 cd :—

पट्टिका च रथः प्रोक्तः षट्चक्रैश्च समन्वितः ।
चतुश्चक्रैश्च वा कुर्याद्यथा विभवविस्तरम् ॥
नानालङ्कारसंयुक्तं शिल्पशास्त्रविधानतः ।
एवं लक्षणसंयुक्तं रथमारोपयेत्ततः ॥

अपूर्वोद्यानयानादि गत्वा भक्तजनैस्सह ।
आलयं संप्रविश्याथ पुनः स्नपनमाचरेत् ॥ ५८ ॥

रक्षाबन्धं ततः कृत्वा ग्रामयात्रार्थमेव च ।
अन्नं चतुर्विधं चैव देवाय च निवेदयेत् ॥ ५९ ॥

अश्वमारोपयेद्देवं गच्छेयुः काननं प्रति ।
रक्षसां मृगवेषाणां हत्वा तु नृपसत्तम ॥ ६० ॥

पुनरागम्य ग्रामादीन् आलयं संप्रवेशयेत् ।
स्नपनं कारयेत् पश्चात् वस्त्राभरणमाल्यकैः ॥ ६१ ॥

विसृज्य कौतुकान् सर्वान् स्नानान्ते देशिकोत्तमः ।
मूलबेरसमीपे तु स्थण्डिलं कारयेत्ततः ॥ ६२ ॥

नवभारप्रमाणेन नववस्त्रेण संयुतम् ।
पूर्णकुम्भं समादाय भूषयेद्वस्त्रसूत्रकैः ॥ ६३ ॥

सौवर्णप्रतिमां कुर्यात् कुम्भमध्ये विनिक्षिपेत ।
स्थण्डिलोपरि विन्यस्य पूजयेत् पुरुषोत्तमम् ॥ ६४ ॥

अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत् ।
प्रभाते विमले शुद्धे कृतकृत्यः स पूजकः ॥ ६५ ॥

नित्यपूजां समाप्याथ तीर्थकर्माणि कारयेत् ।
नित्ये नैमित्तिके काम्ये तीर्थे सामान्यमुच्यते ॥ ६६ ॥

प्राङ्मुखोदङ्मुखो वाथ आसनं परिकल्प्य च ।
पुण्याहं वाचयेत्तस्मिन् पञ्चगव्यं च योजयेत् ॥ ६७ ॥

---

63. b) M. वेष्टि° for संयु°
65. a) MMy. अनिर्वाणैः for अनिर्वाण

प्रोक्षयेत्तज्जलेनैव मूलमन्त्रेण पूर्वतः ।
अर्घ्यादिदीपपर्यन्तमर्चयेत् सर्वदेवताः ॥ ६८ ॥

पूर्णकुम्भं समादायोलूखले च विनिक्षिपेत् ।
ऋग्यजुस्सामाथर्वं च अर्चयेद्भूमिदेवताम् ॥ ६९ ॥

कुट्टनं कारयेत् पश्चात् गणिकादेवभृत्यकैः ।
होमं तु कारयेत् पूर्वमाज्येन शतमेव च ॥ ७० ॥

अष्टाविंशति वा कुर्यान्मूलमन्त्रेण देशिकः ।
बेरादिमुसलान्तं तु घृतारोपणमाचरेत् ॥ ७१ ॥

तच्चूर्णं तु समादाय देवमूर्ध्नि विनिक्षिपेत् ।
स्नापयेन्नवकेनैव पुंसूक्तेन च मन्त्रिणा ॥ ७२ ॥

उत्सवं बिम्बमादाय आरोप्य शिबिकादिषु ।
तीर्थबिम्बं पुरस्कृत्य औत्सवं तदनन्तरम् ॥ ७३ ॥

सर्वैः परिजनैः सार्धं कृत्वा गेहं प्रदक्षिणम् ।
पूर्वे वा चोत्तरे वाथ सरित्तीरं समाश्रयेत् ॥ ७४ ॥

प्राङ्मुखोदङ्मुखो वाथ आसनं परिकल्प्य च ।
देवस्य चाग्रतः स्थाप्य कलशं पञ्चविंशतिः ॥ ७५ ॥

द्रव्याणि निक्षिपेत् पूर्वं छादयेन्नववस्त्रतः ।
पुण्याहं वाचयेत् पूर्वं अर्चयेद्द्रव्यदेवताः ॥ ७६ ॥

स्नापयेत् कलशेनैव तीर्थबिम्बं तु देशिकः ।
आदाय भगवद्भक्तैः सरित्तीरं समाश्रयेत् ॥ ७७ ॥

नदीश्चाष्ट समावाह्य पूजयेत् स्वस्वविद्यया ।
पाणिना बिम्बमादाय सज्जयेज्जलमध्यके ॥ ७८ ॥

नित्यतीर्थे नृपश्रेष्ठ केवलं तीर्थकौतुकम् ।
नैमित्तिके वा नित्ये वा प्रतिष्ठा प्रोक्षणादिके ॥ ७९ ॥

यात्रादितीर्थबिम्बान्तं जलमध्ये निमज्जयेत् ।
सह देवेन तत्काले स्नानं कुर्वन्ति ये नराः ॥ ८० ॥

महापातकनिर्मुक्ता यान्ति ब्रह्म सनातनम् ।
पूर्वस्थाने निवेश्याथ पूजयेत् पुरुषोत्तमम् ॥ ८१ ॥

देवज्ञान् संप्रसाद्याथ ताम्बूलैर्मुखवासकैः ।
दापयेत्तत् प्रसादंस्तु अनुज्ञां याचयेत्ततः ॥ ८२ ॥

आशिषं वाचयेत्तस्मिन् तच्छक्तिं च जपेत्ततः ।
करकास्त्र पुरस्कृत्य तत्पश्चात्तीर्थबेरकम् ॥ ८३ ॥

उत्सवं तदनु ज्ञेयं पश्चाद्वेवविदां वर ।
अच्छिन्नधारया युक्तं मुष्टिदीपसहस्रकैः ॥ ८४ ॥

शङ्खादिमङ्गलरवैः छत्रचामरकेतुभिः ।
गीतकैर्नृत्तकैः सार्धं वन्दिमङ्गलपाठकैः ॥ ८५ ॥

वीणावेणुरवैश्चैव शङ्खकाहलघोषकैः ।
सर्वैः परिजनैः सार्धं तदाचार्यपुरस्कृतैः ॥ ८६ ॥

लम्बदीपसमायुक्तं योषिद्भिः पुरवासिभिः ।
ग्रामं प्रदक्षिणं कृत्वा गेहद्वारं समाविशेत् ॥ ८७ ॥

सेवाजनान् समाश्वास्य तत्र कर्म समारभेत् ।
क्षालयेत् पाणिपादौ च पयसा शुद्धवारिणा ॥ ८८ ॥

88. b) M. °चरेत् for °रभेत्

विमृशेदंशुकेनैव गन्धकल्केन लेपयेत् ।
मालानिवेदनं पश्चात् ताम्बूलमुखवासकम् ॥ ८९ ॥

अन्नपिण्डं समादाय भ्रामयेद्देवमूर्धनि ।
मूलमन्त्रेण मतिमान् दशदिक्षु विनिक्षिपेत ॥ ९० ॥

शुद्धतोयं तथैवोक्तं महादीपं तथैव च ।
आशिषं वाचयेत्तस्मिन् राजराष्ट्रसमृद्धिदम् ॥ ९१ ॥

त्रिः प्रदक्षिणमावर्त्य योषितः क्रमयोगतः ।
आश्रितानां जनानां च दापयेदिष्टसिद्धिदम् ॥ ९२ ॥

उत्सवार्थं गतानां तु सर्वदेशनिवासिनाम् ।
आयुर्दीर्घमथारोग्यमैश्वर्यं च निरङ्कुशम् ॥ ९३ ॥

पुत्रवृद्धिश्च सौभाग्यं; दापयेत सर्वमेव तु ।
सर्वं तत्र पुरस्कृत्य कृत्वा गेहप्रदक्षिणम् ॥ ९४ ॥

गर्भगेहं प्रविश्याथ स्थापयेद्देवसन्निधौ ।
अर्घ्यादिहविरन्तं तु पूजयेत् कमलेश्वरम् ॥ ९५ ॥

होमं तु विधिवत् कृत्वा पूर्णाहुतिमथाचरेत् ।
शालायां स्थापितान् कुम्भान् उद्धृत्य भगवन्मया ॥ ९६ ॥

धाम प्रदक्षिणं कृत्वा गर्भगेहं प्रवेशयेत् ।
उत्सवं बिम्बमादाय देव्यौ बिम्बादिकान् क्रमात् ॥ ९७ ॥

मूलबेरसमीपे तु देवस्याभिमुखं यथा ।
तद्बिम्बबेरयोर्मध्ये कुम्भस्थानं विधीयते ॥ ९८ ॥

---

90. b) M. मूर्ध्नि च for मूर्धनि
93. a) S[1]. उत्सवार्थ° for उत्सवार्थं

कुम्भोदरगतान् देवान् मूलबेरे नियोजयेत् ।
स्वहृत्पद्मगतान् देवान् पादपद्मे नियोजयेत् ॥ ९९ ॥

महता विभवेनैव पूजयेत् सुमनोहरम् ।
समिधाज्यचरूंश्चैव जुहुयान्नित्यपावकैः ॥ १०० ॥

ब्राह्मणान् भोजयेत् पश्चाद्यथा वित्तानुसारतः ।
बलिं च सर्वतो दद्यादुक्तद्रव्येण देशिकः ॥ १०१ ॥

दशमेऽहनि संप्राप्ते पुष्पयागं समाचरेत् ।
देवस्य चाग्रतः कुर्यात् पुष्पमण्डलमारभेत् ॥ १०२ ॥

चतुस्तम्भस्य मध्ये तु मण्डलं च समालिखेत् ।
भद्रकं स्वस्तिकं वाथ चक्राब्जमितरं तु वा ॥ १०३ ॥

पञ्चवर्णेन पुष्पेण कारयेन्मण्डलं ततः ।
पद्मस्य परितः कुर्यादष्टायुधमिति स्मृतम् ॥ १०४ ॥

मण्डलस्य च दिग्देशे स्थापयेत् कुम्भवर्धनीम् ।
द्वारयागपुरस्कं तु अर्चयेत् सर्वदेवताः ॥ १०५ ॥

उत्सवं बिम्बमादाय सर्वैः परिजनैस्सह ।
गेहप्रदक्षिणं कृत्वा मण्डले सन्निवेश्य च ॥ १०६ ॥

एकत्रिपञ्चहस्तं वा पूजनं च समाचरेत् ।
होमं तु पूर्ववत् कुर्यात् संपाताज्येन देशिकः ॥ १०७ ॥

बिम्बपार्श्वे समासाद्य मृत्नारोपणमाचरेत् ।
प्रोक्षयेत् कुम्भतोयेन मूलमन्त्रेण मन्त्रवित् ॥ १०८ ॥

---

99. b & c) S[1]. om.

107. c) S[1]. कृत्वा for कुर्यात्

रक्षां कुर्यात्तु यत्नेन धूपपात्रस्य वह्निना ।
नीराजनं ततः कुर्यादन्नपिण्डं च भ्रामयेत् ॥ १०९ ॥

महादीपं प्रदर्श्याथ मङ्गलानि च दर्शयेत् ।
गीतं नृत्तं च वाद्यं च पञ्चशब्दसमन्वितम् ॥ ११० ॥

वेदादीन् घोषयेत्तत्र वन्दिमङ्गलपाठकैः ।
महता विभवेनैव पूजनं च समाचरेत् ॥ १११ ॥

तद्बिम्बं तु समादाय यानमारोप्य यत्नतः ।
सर्वैः परिजनैः सार्धं गेहं कृत्वा प्रदक्षिणम् ॥ ११२ ॥

स्तम्भस्य च पुरोभागे स्थापयेद्बिम्बमेव च ।
तयोर्मध्ये न्यसेत् कुम्भं कूर्चपल्लवशोभितम् ॥ ११३ ॥

गरुडं पूजयेत् पूर्वमाह्वयेत् कुम्भमध्यके ।
तत्पटं च समादाय विन्यसेच्छिष्यमूर्धनि ॥ ११४ ॥

तत्कुम्भं तु समुद्धृत्य सदेवं च तथैव च ।
पूर्णकुम्भं पुरस्कृत्य तत्पश्चात् पटमेव च ॥ ११५ ॥

ततश्चोत्सवबिम्बं तु गच्छेयुः क्रमयोगतः ।
सर्वमङ्गलघोषैश्च कृत्वा गेहप्रदक्षिणम् ॥ ११६ ॥

गर्भगेहं प्रविश्याथ सर्वैः परिजनैस्सह ।
आरोप्य बहुभिर्दीपैः स्रग्दामैश्च तथैव च ॥ ११७ ॥

सुधाचूर्णैरलङ्कृत्य क्षालयेद्गन्धतोयकैः ।
बिम्बं समर्पयेन्मूलबेरे चैव तु पूर्ववत् ॥ ११८ ॥

तयोर्मध्ये न्यसेत् कुम्भमर्चयेद्गरुडं तथा ।
कुम्भोदरस्थं विहगं पीठबेरे नियोजयेत् ॥ ११९ ॥

प्रोक्षयेत् कुम्भतोयेन अर्चयेद्विभवेन च ।
उत्सवं बिम्बमादाय पूर्वस्थाने तु योजयेत् ॥ १२० ॥

उद्वासनबलिं कुर्यात गेहादिग्राममध्यतः ।
मौनं कृत्वा यथान्यायं तटाकादि प्रवेशयेत ॥ १२१ ॥

बलिं निरवशेषं च जलमध्ये विनिक्षिपेत् ।
आचार्यं स्नापयेत् पूर्वं कौतुकं विसृजेततः ॥ १२२ ॥

तथैव ऋत्विजः सर्वान् स्नापयेत सुसमाहितः ।
भक्तैर्भागवतैस्साधं देवगेहं प्रवेशयेत् ॥ १२३ ॥

नित्यपूजां समाप्याथ होमादिबलिदानकम् ।
स्तोत्रैरनेकैर्विविधैर्मूलमन्त्रैः पृथक पृथक् ॥ १२४ ॥

आचार्यं पूजयेत् पश्चादुक्तद्रव्यं च दापयेत ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां उत्सवविधानं नाम
द्वाविंशोऽध्यायः ॥

# त्रयोविंशोऽध्यायः

## [ पवित्रारोपणम् ]

* * *

शृणुष्व परमं गुह्यं पवित्रारोपणं परम् ।
संवत्सरं नरो भक्त्या समभ्यर्च्य जनार्दनम् ॥ १ ॥

यत्फलं समवाप्नोति पवित्रारोपणेन तत् ।
तस्माद्भक्तिसमायुक्तैः नरैर्विष्णुपरायणैः ॥ २ ॥

वर्षे वर्षे तु कर्तव्यं पवित्रारोपणं परम् ।
श्रावणस्य सिते पक्षे अथवा कृष्णपक्षके ॥ ३ ॥

मासि भाद्रपदे चैव अधि चाश्वयुजेऽपि वा ।
कार्तिक्यां शुक्लपक्षे तु कर्कटस्थे दिवाकरे ॥ ४ ॥

द्वादश्यां वासुदेवस्य पवित्रारोपणं स्मृतम् ।
सिंहस्थे तु रवौ कार्यं कन्यायां तु रवौ स्थिते ॥ ५ ॥

तस्यामेव तिथौ सौम्ये तुलायां तु कथञ्चन ।
द्वादश्यां शुक्लपक्षे तु पञ्चम्यामथवापि वा ॥ ६ ॥

सप्तम्यां वा नवम्यां वा प्रागेव स्याच्छुभेऽहनि ।
मङ्गलाङ्कुरपूर्वं तु कुर्यात्तत्रैव चाहनि ॥ ७ ॥

पात्रं तु त्रिविधं प्रोक्तं मङ्गलाङ्कुररोपणम् ।
पालिका घटिका चैव शरावश्चेति भेदतः ॥ ८ ॥

प्रत्येकं द्वादश ग्राह्या मङ्गलाङ्कुरकर्मणि ।
त्रिपङ्क्तीकृत्य तान् सर्वान् स्थापयित्वा प्रयत्नतः ॥ ९ ॥

1. b) S[1]. शुभम् for परम्

रङ्गमण्टपमध्ये तु बीजारोपणमारभेत ।
आग्नेयादीशपर्यन्तं सुगुप्ते स्थाप्य चोत्तरे ॥ १० ॥

दूर्वाशिरीषमाल्यैस्तु भूषयेदुत्तरोत्तरम् ।
कृत्वा पुण्याहघोषं च ब्राह्मणैः स्वस्ति वाच्य च ॥ ११ ॥

वैष्णवैः कारयित्वा तु बीजारोपणमाचरेत ।
कुलुत्थनिम्बनिष्पावशालिमाषप्रियङ्गुकान ॥ १२ ॥

मुद्गसर्षपबीजानि क्षालयेच्छुद्धवारिणा ।
बीजानि निर्वपेत्तेषु संपूज्य विधिवत्ततः ॥ १३ ॥

'यां जाना' इति मन्त्रेण तेषु बीजानि विन्यसेत ।
गन्धपुष्पादिदीपं च पयोभिः क्षालयेद्गुरुः ॥ १४ ॥

'जितन्त' इति मन्त्रेण सिञ्चेद्धारिद्रवारिणा ।
सह शङ्खनिनादैश्च मर्द्दलैः सह मङ्गलैः ॥ १५ ॥

निस्साणध्वनिभिः सार्धं नानावाद्यरवैस्तथा ।
वापयेद्देशिकेन्द्रश्च ब्राह्मणैर्वेदपारगैः ॥ १६ ॥

ततो गन्धविमिश्रेण बन्धं च विकिरेत्ततः ।
नवाहं सप्तरात्रं वा पञ्चरात्रमथापि वा ॥ १७ ॥

स्थापयित्वा सुगुप्ते तु पश्चात कर्म समाचरेत ।
मण्डपं कारयेत् पूर्वं प्रासादस्याग्रतः शुभम् ॥ १८ ॥

त्रयोदशकरं सम्यक् नवहस्ता तु वेदिका ।
एकहस्तोच्छ्रयं मध्ये कृत्वालङ्कारभूषितम् ॥ १९ ॥

चतुस्तोरणसंयुक्तं ध्वजाद्यैरुपशोभितम् ।
वितानेन च सञ्छन्नं दर्पणैश्च विभूषितम् ॥ २० ॥

वस्त्रसंवेष्टितैः स्तम्भैः युतं घण्टादिभूषितम् ।
सुपक्वफलयुक्ताभिः आर्द्रशाखाभिरास्थितम् ॥ २१ ॥

क्रमुकादिफलैश्चैव नालिकेरफलैस्सह ।
नारङ्गलिकुचैर्दर्भमालाभिश्च समन्वितम् ॥ २२ ॥

लम्बयेत्तु विशेषेण सोपानस्यान्तरे शुभे ।
तन्मध्ये न च कर्तव्यं देशिकैर्मन्त्रवित्तमैः ॥ २३ ॥

दशम्यामुपसंगृह्य यागद्रव्याणि यानि च ।
प्रथमं दर्भसूत्रं तु पट्टसूत्रमतः परम् ॥ २४ ॥

तृतीयं क्षौमसूत्रं तु पद्मसूत्रमतः परम् ।
कार्पाससूत्रमथवा वेत्रसूत्रमथापि वा ॥ २५ ॥

कन्यया कृतसूत्रं तु नारी या तु पतिव्रता ।
विधवा साधुशीला वा न दुश्शीला कदाचन ॥ २६ ॥

उपयुक्तं क्रियायुक्तमन्यं रक्तादिदूषितम् ।
मलिनं नीलसूत्रं च प्रयत्नेन विवर्जयेत् ॥ २७ ॥

ब्राह्मण्या निर्मितं सूत्रं त्रिगुणं त्रिगुणं बुधः ।
पवित्रं तेन कुर्वीत कनिष्ठोत्तममध्यमम् ॥ २८ ॥

वनमालापवित्रं तु पवित्रं चाधिवासनम् ।
परिवारपवित्राणि पवित्रं दीक्षितस्य तु ॥ २९ ॥

शिर आरभ्य नाभ्यन्तं पवित्रं च कनिष्ठिकम् ।
ऊरुमात्रं तथारभ्य पवित्रं मध्यमं स्मृतम् ॥ ३० ॥

29. d) S¹S². च for तु
30. a) AMSv. नासान्तं for नाभ्यन्तं

उत्तमं जानुमात्रं तु पवित्राणां प्रमाणत: ।
वनमालापवित्रं तु प्रतिमाया समीरितम् ॥ ३१ ॥

कनिष्ठिकापवित्रं तु पवित्रमधिवासनम् ।
पवित्रं दीक्षितस्यैव नाभिमात्रं प्रचक्षते ॥ ३२ ॥

उपलिप्ते शुचौ देशे दर्भान् संस्तीर्य भूतले ।
आसने प्राङ्मुखो विद्वान् शिष्यैस्सर्वैस्महात्मवान् ॥ ३३ ॥

गायत्रीं तु जपित्वादौ सूत्रशङ्कून् परीक्षयेत ।
देवानुरूपकं कुर्यात पवित्रं तु प्रमाणत: ॥ ३४ ॥

कनिष्ठं तत्तु विज्ञेयमष्टविंशतितन्तुकम् ।
चतु:पञ्चाशद्विज्ञेयं तन्तूनां मध्यमं परम् ॥ ३५ ॥

उत्तमं चैव तन्तूनां शतमष्टोत्तरं भवेत ।
अष्टोत्तरसहस्रं तु तन्तूनां परिसंख्यया ॥ ३६ ॥

वनमालाख्यया विष्णोर्दत्ता सा मुक्तिदायिनी ।
सप्तविंशतिकं ज्ञेयं तन्तूनामधिवासने ॥ ३७ ॥

वनमालाविशेषेण उत्तमाधममध्यमा ।
तदर्धं सार्धमेवं च तन्तूनां परिसंख्यया ॥ ३८ ॥

तन्तूनां द्वादश ज्ञेयं परिवारपवित्रकम् ।
आचार्यस्य पवित्रे हि तन्तूनां सप्तविंशति: ॥ ३९ ॥

अष्टाविंशतितन्तूनां कुण्डस्य च पवित्रकम् ।
पञ्चविंशतितन्तूनां घण्टायाश्च पवित्रकम् ॥ ४० ॥

चत्वारिंशत्तु तन्तूनां प्रासादस्य पवित्रकम् ।
चत्वारिंशत्तु तन्तूनां धूपदण्डपवित्रकम् ॥ ४१ ॥

पञ्चविंशतितन्तूनां .... पवित्रकम् ।
अष्टाविंशतितन्तूनामालयस्य पवित्रकम् ॥ ४२ ॥

एकोनत्रिंशतन्तूनां गोपुरस्य पवित्रकम् ।
पञ्चविंशतितन्तूनां प्रासादस्य पवित्रकम् ॥ ४३ ॥

नवत्रिंशत्तु तन्तूनां बलिपीठपवित्रकम् ।
उपपीठपवित्रं तु पञ्चविंशतितन्तवः ॥ ४४ ॥

सूत्रं तु त्रिगुणं कृत्वा प्राकारस्य पवित्रकम् ।
एवं कृत्वा पवित्राणि पुनर्ग्रन्थिं तु बन्धयेत् ॥ ४५ ॥

अङ्गुष्ठमात्रमानं तु ग्रथितानां विधानतः ।
कनिष्ठा द्वादश प्रोक्ता मध्यमा द्विगुणाः स्मृताः ॥ ४६ ॥

त्रिगुणाश्चोत्तमा प्रोक्ता ग्रन्थयस्तु पवित्रके ।
वनमालापवित्रे तु शतमष्टोत्तरं शुभम् ॥ ४७ ॥

अधिवासेन सूत्रे तु ग्रन्थयो द्वादश स्मृताः ।
ग्रन्थयश्चाष्ट विज्ञेयाः परिवारपवित्रके ॥ ४८ ॥

ग्रन्थयो द्वादशप्रोक्ता अष्टमात्रं च दीक्षितः ।
पवित्रीकृत्य ग्रन्थ्या तु यथाविधि विचित्रयेत ॥ ४९ ॥

कुङ्कुमोशीरकर्पूरचन्दनादि विलेपयेत् ।
पीतं पवित्रं संलिख्य ततोऽन्यांश्चैव योजयेत् ॥ ५० ॥

तावदावर्तयेद्ग्रन्थौ यावतो ग्रन्थयः स्मृताः ।
एवं पवित्रनिर्माणं कृत्वा स विलिखेत् पृथक् ॥ ५१ ॥

एकादश्यामुपोष्याथ मण्डलं विलिखेच्छुभम् ।
पूर्वोक्तमण्डपे मध्ये चक्राब्जं भद्रकं तु वा ॥ ५२ ॥

---

50. d) MMy, S¹T. न्यासं च for न्यांश्चैव

शुद्धभूतलमध्ये तु मण्डलं संप्रकल्पयेत् ।
चत्वारिंशवत् सूत्राणि पट्ट च तिर्यक् च स्थापयेत् ॥ ५३ ॥

एकोनपञ्चाशत्पदं पद्मक्षेत्रं तु कल्पयेत् ।
तद्बाह्ये तु द्विपङ्क्त्या च अत ऊर्ध्वं तु शोधयेत् ॥ ५४ ॥

आद्यपङ्क्तौ तु ऊकारं द्विपदं द्वितृतीयके ।
कोणं तु शोधयेत् पश्चात् षडंशेनैव देशिकः ॥ ५५ ॥

अधः पङ्क्तौ तु पञ्चाशदेकांशं चाद्यपङ्क्तिके ।
तत्तद्बाह्यगपङ्क्तौ तु वीथीमेकेन शोधयेत् ॥ ५६ ॥

तद्बाह्ये पञ्चपङ्क्त्या तु शोधयेत् क्रमयोगतः ।
अत ऊर्ध्वं तु ऊकारं त्रिपदं त्रिपदं भवेत् ॥ ५७ ॥

पञ्चाशन्मध्यपङ्क्त्या तु एकीकृत्य तु यत्नतः ।
तत्पार्श्वे सप्तदशांशे गात्रकर्म जयेत्ततः ॥ ५८ ॥

पूर्ववत् कल्पयेत्तस्मिन् तत्पार्श्वे शोधयेत्ततः ।
चतुर्दिक्षु स्वस्तिकं च त्रिगुणं त्रिगुणं भवेत् ॥ ५९ ॥

कोणं तु शोधयेत् पश्चात् सप्तदशपदेन च ।
आद्यपङ्क्तौ तु एकांशं द्वितीये च तथैव च ॥ ६० ॥

तृतीयैकांशकं चैव पञ्चांशस्तु चतुर्थकम् ।
नवांशं मध्यपङ्क्तौ तु एकीकृत्य तु यत्नतः ॥ ६१ ॥

तद्बाह्ये एकपङ्क्त्या तु वीथीनां कल्पयेत्ततः ।
चतुःपञ्च तु तद्बाह्ये शोभार्थं तु विधीयते ॥ ६२ ॥

आद्यपङ्क्त्या तु पञ्चाशत् तदर्थं तु द्वितीयके ।
एवं पङ्क्त्या तु एकांशं शोभानां तु प्रकल्पयेत् ॥ ६३ ॥

मध्ये आवरणं चैव एकांशेन तु लेपयेत् ।
कोणं तु शोधयेत् पश्चात् नवांशेनैव देशिकः ॥ ६४ ॥

द्वितृतीये तृतीये च चतुर्थे च तथैव च ।
त्रिपदं त्रिपदं चैव कोणदेशं तु शोधयेत् ॥ ६५ ॥

एकपङ्क्त्या बहिर्वीथीं तद्बाह्ये विमृजेत्ततः ।
तद्बाह्ये तु चतुःपङ्क्त्या शोभानां शोधयेत्ततः ॥ ६६ ॥

चतुश्चतुष्पथेनैव अन्तःशोभां विशोधयेत् ।
अधः पङ्क्तित्रांशेन द्वितीयैकांशकं भवेत् ॥ ६७ ॥

तदूर्ध्वैकांशकं चैव प्रभाजालं प्रकल्पयेत् ।
ऊर्ध्वध्वजमुखेनैव बहिःशोभां तु शोधयेत् ॥ ६८ ॥

नवांशकोणदेशे तु मार्जयेत्परितः क्रमात् ।
एकांशं मार्जयेद्बाह्ये ऊहापोहविचक्षणः ॥ ६९ ॥

एवं क्रमेण राजेन्द्र प्रादक्षिण्येन मार्जयेत् ।
पद्मानि पञ्चभिर्वर्णैर्वः अन्तरालं तु कृष्णवत् ॥ ७० ॥

शोभां च पूरयेद्रक्तैः प्रतिशोभास्तु पीतवत् ।
श्यामेन पूजयेत्कोणं वीथीनां कालवर्णकम् ॥ ७१ ॥

सितेनापूरयेद्भद्रं गात्रकं श्यामलप्रभम् ।
पार्श्वभद्रं तु रक्तेन कोणं चैव तु कृष्णकम् ॥ ७२ ॥

रक्तवर्णेन वीथीं च यथावर्णेन पूरयेत् ।
सितरक्तेन शोभां तु श्यामेनापूरयेत्ततः ॥ ७३ ॥

64. c b) My. om.
65. My. om.

रक्तपीतेन राजेन्द्र प्रतिशोभां तु पूरयेत् ।
आवरणं कृष्णवर्णेन वीथीं श्यामेन पूरयेत् ॥ ७४ ॥

कोणं तु पूरयेत् पश्चाद्रक्तवर्णेन यत्नतः ।
कृष्णं रक्तं तथा श्यामं पीतं शुभ्रं च पूरयेत् ॥ ७५ ॥

प्रभाणां क्रमयोगेन वर्णानां पूरयेत्ततः ।
सितरक्तं तथा पीतं श्यामं रक्तं तथैव च ॥ ७६ ॥

कृष्णेन पूरयेच्चैव सूक्ष्मशोभां तु कारयेत् ।
कृष्णेन पूरयेत्कोणं वीथीं शुभ्रेण पूरयेत् ॥ ७७ ॥

चतुर्मूर्तिं यजेत्पश्चाद्गरुडादींस्तथैव च ।
अनन्तादि यजेत्पश्चात् यात्रादीन पूजयेत्ततः ॥ ७८ ॥

रत्नादीन् पूजयेत्पश्चादुपेन्द्रादींस्तथैव च ।
इन्द्रादीन् कुमुदादींश्च मत्स्यादीन् संयजेत्ततः ॥ ७९ ॥

केशवादिषु सर्वेषां पूजयेत्क्रमयोगतः ।
एवं मण्डलमालिख्य पश्चात्कर्म समाचरेत् ॥ ८० ॥

रात्रौ प्रतिसरारम्भात् पूर्वेद्युः कारयेत्ततः ।
ऊर्णामयेन सूत्रेण क्षौमसूत्रयुतेन च ॥ ८१ ॥

अङ्गुष्ठानामिकाभ्यां तु सादयित्वा विचक्षणः ।
ततश्चोभयहस्ताभ्यां हस्ताभ्यां दक्षिणे भवेत् ॥ ८२ ॥

'जितन्त' इति मन्त्रेण बध्नीयात् साधकः क्रमात् ।
आचार्यः प्रातरुत्थाय स्नात्वा जप्त्वा यथाविधि ॥ ८३ ॥

देवस्य स्नपनं कृत्वा महाहविर्निवेदयेत् ।
यथावित्तानुसारेण ब्राह्मणांश्चापि भोजयेत् ॥ ८४ ॥

एवमादिक्रमं कृत्वा दशम्यां नृपसत्तम ।
प्रभाते विमले सूर्ये स्नानपूर्वं तु देशिकः ॥ ८५ ॥

एकादश्यामुपोष्याथ रात्रौ पूर्वोक्तमण्डले ।
तन्मध्ये कल्पयेत्पीठं धर्मज्ञानादिभिः क्रमात् ॥ ८६ ॥

पादत्वक्कूर्मभेदेन सूर्यसोमानिलाकृतिम् ।
मण्डलादिक्रमादूर्ध्वे पात्रकेसरकर्णिका ॥ ८७ ॥

व्यापिनीत्यस्य शक्तिस्तु विन्यसेद्विमलादिकान् ।
एवं ध्यात्वा समभ्यर्च्य हरेरासनमुत्तमम् ॥ ८८ ॥

तन्मध्ये पूजयेद्देवं प्रतिमासंस्थितं प्रभुम् ।
सुसूक्ष्मं ज्योतिरमलं मनसा वापि विन्यसेत् ॥ ८९ ॥

विन्यसेत् प्रणवेनाथ न्यासं कृत्वा यथाविधि ।
प्रणवं किञ्चिदुच्चार्य प्रपूज्य स्वागतं पुनः ॥ ९० ॥

सान्निध्यं प्रार्थयित्वा तु परिवारान् ततो यजेत् ।
वासुदेवादिमूर्तीनां श्रियादीनां तथैव च ॥ ९१ ॥

शङ्खादीनां च मुद्राणां लोकेशानां तथैव च ।
द्वारपूर्वे मण्डलस्य वैनतेयं तथापरे ॥ ९२ ॥

स्थाप्य स्वनाम्ना विधिवत् पक्षीशं स्वर्णसन्निभम् ।
हेतिराजं सहस्रारं दक्षिणे द्वारि विन्यसेत् ॥ ९३ ॥

पाञ्चजन्यं महाशङ्खं पश्चिमे द्वारि विन्यसेत् ।
ततो गदोत्तरद्वारि विन्यसेन्महति ध्रुवा ॥ ९४ ॥

शोभोपशोभया विद्वान् त्रिरेखा च गुणत्रयम् ।
गुणत्रयं प्रकृतिकं चतूरेखां तु विन्यसेत् ॥ ९५ ॥

पञ्चरेखा महाभूना क्रमशो विन्यसेद्गुरु: ।
देवस्य परितो न्यस्य क्रमेणैतान् पृथक् पृथक् ॥ ९६ ॥

पाद्यादिमुखवासान्तं पूर्ववत्पूजयेद्धरिम् ।
पुनस्संपूजयेद्गन्धै: परिवारान् पृथक् पृथक् ॥ ९७ ॥

कृत्वा पुण्याहघोषं च ब्राह्मणै: स्वस्ति वाच्य च ।
नृत्तगेयसमायुक्तनैवेद्य शान्तिभि: शुभै: ॥ ९८ ॥

स्तोत्रैर्नानाविधैश्चैव जागरेण नयेन्निशाम् ।
स शिष्यैर्देशिकेन्द्रस्तु स्नात्वा जप्त्वा यथाक्रमम् ॥ ९९ ॥

आचार्यो मूर्तिपै: सार्धं पवित्रं चाधिवासितम् ।
आदाय देवपुरत: स्थित्वा देवस्य मूर्धनि ॥ १०० ॥

'इदं विष्णु'रिति मन्त्रेण न्यसेद्गन्धपवित्रकम् ।
पुन: संप्रार्थ्य देवेशमर्घ्यपाद्यादिभि: क्रमात् ॥ १०१ ॥

भक्ष्यैर्नानाविधैश्चित्रैरपूपैर्घृतपाचितै: ।
फलैस्तु गन्धकर्पूरैर्नैवेद्यं कारयेद्धरिम् ॥ १०२ ॥

एकादश्यां नरो भक्त्या संपूज्य पुरुषोत्तमम् ।
पवित्रारोपणं कुर्याद्देवदेवस्य चक्रिण: ॥ १०३ ॥

पवित्रारोपणं कुर्याद्दीक्षितस्य तथैव च ।
मण्डलस्योत्तरे देशे जुहुयात्तन्तुसंख्यया ॥ १०४ ॥

ग्रन्थीनां संख्यया चैव जुहुयात् प्रणवेन च ।
समिधो हविराज्यं च होमद्रव्याणि देशिक: ॥ १०५ ॥

हुत्वा संपातविधिना पवित्राणि च संस्पृशेत् ।
हुत्वा स्पृष्ट्वा पवित्राणि स देवस्याधिवासयेत् ॥ १०६ ॥

पद्ममध्ये पवित्राणि बाह्ये द्रव्यानि सादयेत् ।
दन्तकाष्ठं तथा पूर्वे पूर्णकुम्भं तु दक्षिणे ॥ १०७ ॥

मृत्तिकां पश्चिमे न्यस्य कोष्ठं सौम्ये तु विन्यसेत् ।
आग्नेय्यां चन्दनं न्यस्य कुशान्नैर्ऋतगोचरे ॥ १०८ ॥

वायव्यां कुङ्कुमं न्यस्य ऐशान्यामब्जके न्यसेत् ।
दूर्वां शलाकां वस्त्रे च न्यसेदाभरणानि च ॥ १०९ ॥

तद्बाह्ये परितो न्यस्य चतुर्दिक्षु यथाक्रमम् ।
गन्धादिभिः समभ्यर्च्य सर्वद्रव्याणि देशिकः ॥ ११० ॥

आचार्यः सह शिष्यैस्तु देवदेवस्य पादयोः ।
गन्धपुष्पैश्च विधिवन्मन्त्रैरभ्यर्चयेत् क्रमात् ॥ १११ ॥

स्त्रीभिः सुस्वरकण्ठाभिः नृत्तगीतैस्तथैव च ।
शङ्खभेरीनिनादैश्च वीणावेणुरवैस्तथा ॥ ११२ ॥

तालैर्मृदङ्गनादैश्च स्तोत्रैश्च स्तुतिभिस्तथा ।
नादं नदृरसंघैश्च स्तुतिभिः स्तुतिवन्दिभिः ॥ ११३ ॥

समीपे ब्रह्मघोषेण तस्य देवस्य तुष्टये ।
एवं कृत्वाऽधिवासं तु रात्रिशेषं समापयेत् ॥ ११४ ॥

सोपध्यातः शुचिस्नानः कृतजप्यो जितेन्द्रियः ।
अहिश्रवणशुक्लायां द्वादश्यामथ दीक्षितः ॥ ११५ ॥

दत्वार्चनं द्विजादिभ्यः पूजयित्वा जनार्दनम् ।

112. c) MMy S¹T. भेर्यादि° for भेरीनि

( ग्रन्थपातः )

.... .... .... .... ....

.... .... .... .... ....

.... .... मालादिकं पुन ॥ ११६ ॥

कनिष्ठान्तं हरेर्मूर्ध्नां पवित्रं नैव कारयेत ।
संवत्सरीकृता पूजा भक्त्या परमया सह ॥ ११७ ॥

पूजापावर्जितद्रव्यैः पवित्रकर्मणि नाचरेत् ।
एवं महार्चनं कृत्वा द्वादश्यामपराह्णके ॥ ११८ ॥

वस्त्राभरणमालाद्यैरलङ्कृत्य विशेषतः ।
श्रीभूमिसहितं देवं यानमारोप्य देशिकः ॥ ११९ ॥

छत्रचामरदीपैश्च नानावाद्यैश्च निस्वनैः ।
ऋग्यजुस्सामपूर्वादीन घोषयेत् चतुर्दिशि ॥ १२० ॥

क्रमात् प्रदक्षिणीकृत्य सर्वेष्वावरणेषु च ।
आलयं पुनरागत्य अर्घ्यपाद्यादि पूजयेत ॥ १२१ ॥

महाहविर्निवेद्याथ उपदंशसमन्वितं ।
अपूपैर्विविधैर्भक्ष्यैर्नैवेद्यं तु जनार्दनम ॥ १२२ ॥

क्रमुकैः श्वेतपर्णैश्च चूर्णमिश्रं समर्पयेत ।
नृत्तगीतैश्च सकलं रात्रिशेषं समापयेत ॥ १२३ ॥

प्रातःकाले तथोत्थाय शुचिस्नातश्च देशिकः ।
आलयं पुनरागत्य नित्यपूजावसानके ॥ १२४ ॥

कुम्भमण्डलबिम्बादीन् तत्तदुक्तं यजेत्क्रमात ।
मूलबेरं यजेत्पश्चात् कुण्डपार्श्वं समाश्रितान् ॥ १२५ ॥

अग्नीन् संपूजयेत्तत्र अग्निकार्योक्तमार्गवत् ।
एवं कृत्वा समभ्यर्च्य एकद्वित्रिदिनं ततः ॥ १२६ ॥

उत्सवं कारयेत्पश्चात् बलिदानपुरस्सरम् ।
अहोरात्रं प्रतिदिनं उत्सवं कारयेत्पृथक् ॥ १२७ ॥

पूर्णाहुतिप्रदानान्ते अवरोप्य पवित्रकान् ।
कुम्भपार्श्वं समासाद्य अर्चनं पूर्ववत्क्रमात् ॥ १२८ ॥

ऋग्यजुस्सामवेदादीन् घोषयेत्तु चतुर्दिशि ।
मण्डपे तु विशेषेण नृत्तगीतं समाचरेत् ॥ १२९ ॥

मण्डलं च तदाभ्यर्च्य अवरोप्य पवित्रकान् ।
कुम्भमण्डलदेवांश्च हृदयेषु विसृज्य च ॥ १३० ॥

आचार्यो मूर्तिपैः सार्धं यजमानः शुभैस्सह ।
वेदपारायणैर्विप्रैः या....यामूलसंपर्के (?) ॥ १३१ ॥

क्रमुकादिफलैश्चैव कदलीफलसंयुतैः ।
अर्घ्यादिसकलान् भोगान् मूलबेरे समर्चयेत् ॥ १३२ ॥

क्रमादारोहयेत्पूर्वं पश्चाच्चैवावरोहयेत् ।
कनिष्ठादिपवित्रं च प्रत्येकं धूपदीपकैः ॥ १३३ ॥

नानाविधफलादीनि निवेद्य च पृथक् पृथक् ।
विसर्जयेत्क्रमात्पूर्वमाचार्यः सुसमाहितः ॥ १३४ ॥

परिवारपवित्राणि जङ्गमादीन् विसृज्य च ।
विसर्जयेत् पवित्राणि विष्वक्सेनाय दापयेत् ॥ १३५ ॥

विष्वक्सेनप्रसादं च आचार्याय निवेदयेत् ।
विसर्जयेद्विधानेन मण्डलस्थमधोक्षजम् ॥ १३६ ॥

कुण्डमध्यगतं देवं स्वस्यात्मनि निवेदयेत् ।
मण्डलस्थं च निर्माल्यं संग्रहेत् परिचारकः ॥ १३७ ॥

विष्वक्सेने विसृज्यैव निर्माल्यं सकलं च तत् ।
परिवारैस्तु कर्तव्यं धारणं श्रद्धयान्वितम् ॥ १३८ ॥

संगृह्य सकलान् भोगान् लोहपात्रेण मूर्धनि ।
तटाकं तु समागत्य अप्सु मध्ये विनिक्षिपेत् ॥ १३९ ॥

सचेलस्नानमाचर्य आगच्छेत्पुनरालयम् ।
कुम्भमध्यगतं देवं तत्तत्स्थाने विसर्जयेत् ॥ १४० ॥

कुम्भे पूर्य जलान् सर्वानभिषिच्य च देशिकः ।
सर्वालङ्कारसंयुक्तं पुष्पमाल्यैरलङ्कृतम् ॥ १४१ ॥

नववस्त्रैरलङ्कृत्य लेपनाभरणानि च ।
नानाविधसुपुष्पाणि चन्दनागरुदीपकैः ॥ १४२ ॥

महाहविर्विधानेन पूजयेत्पुरुषोत्तमम् ।
पानीयाचमनीयं च मुखवासं च दापयेत् ॥ १४३ ॥

देवदेवं नमस्कृत्य क्षम्यतामिति चोच्चरन् ।
मन्त्रोपयोग्यद्रव्याणि आचार्येभ्यः प्रदापयेत् ॥ १४४ ॥

पूर्वोक्तसंख्यया द्रव्यं दद्याद्देशिकसत्तमः ।
कर्तुर्भर्तुश्च राज्ञश्च एकाग्रमनसा प्रियः ॥ १४५ ॥

दत्वा वस्त्रं च निष्कं च आचार्यप्रीतिकारणम् ।
तस्माद्यत्नेन राजेन्द्र दक्षिणां दापयेत्सुधीः ॥ १४६ ॥

दीनानाथान् तथा सर्वान् विप्रांश्चैव तु वैष्णवान् ।
भोजयेदागतानन्यान् भिक्षुकांश्च तथैव च ॥ १४७ ॥

दापयेद्दक्षिणामेभ्यो यथावित्तं नृपोत्तम ।
एवं तु विधिवत्कृत्वा पवित्रारोहणं नृप ॥ १४८ ॥

विष्णुसायुज्यमाप्नोति पुनरावृत्तिवर्जितम् ।
कामी संप्राप्नुयात्कामान् लभन्ते हि तपस्विनः ॥ १४९ ॥

धर्मकामार्थमोक्षं च पुनर्जन्म न विद्यते ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां
पवित्रारोपणविधिर्नाम
त्रयोविंशोऽध्यायः ॥

# अथ चतुर्विंशोऽध्यायः

## [ डोलारोपणम् ]

* * *

अथातः संप्रवक्ष्यामि डोलारोपविधिक्रमम् ।
फल्गुन्यामुत्तराख्यायां कुर्याच्चन्द्रोदये नृप ॥ १ ॥

दृष्टे महोत्सवे वापि प्रदोषे वा विशेषतः ।
चैत्रे तु शुक्लद्वादश्यां डोलारोपणमाचरेत ॥ २ ॥

प्रतिमाकर्मयोग्यार्थं सारवृक्षं तु संग्रहेत ।
आचार्यः शिल्पिना सार्धं दारु संगृह्य बुद्धिमान् ॥ ३ ॥

रथे चारोप्य चानीय मङ्गलैर्वाद्यघोषणैः ।
सन्तक्ष्य तक्षकैर्दारु डोलार्थं संग्रहेत्ततः ॥ ४ ॥

शिलायां वा प्रकुर्वीत तोरणाकारनिर्मितम् ।
वृत्तं वा चतुरश्रं वा पादमेवं प्रशस्यते ॥ ५ ॥

श्रियं चोर्ध्वे पट्टिकायां पार्श्वयोः सितसंयुतम् ।
वक्त्रस्वरमुखं कुर्यात् पार्श्वयोः सिंहयुग्मकम् ॥ ६ ॥

अष्टहस्तोच्छ्रयं वापि द्वादशारत्निमात्रकम् ।
सममर्धं त्रिपादं वा उच्छ्रायं बहुधा भवेत् ॥ ७ ॥

स्वस्तिभागं त्रिभागं वा दीर्घार्धं वास्य विस्तृतिः ।
अधस्तान्मुकुलास्तम्भे पट्टिकाद्वयवेदिकाम् ॥ ८ ॥

पट्टिकामुखतारं तु स्तम्भस्य नव तुल्यकम् ।
ऊर्ध्वपट्टिकायामकपोलावलिदृष्तिम् ॥ ९ ॥

---

9. cd) M. om.

वाक्यच्छन्दसमायुक्तं नाटकैर्विविधान्वितम् ।
अधरायां पट्टिकायां मध्ये हस्तान्तरीकृतम् ॥ १० ॥

बन्धद्वयं विधातव्यं पालिकायुग्मकं दृढम् ।
.... वेदसमायुक्तं वेदं संयोजयेद्दृढम ॥ ११ ॥

लम्बयेद्दृढकीलेन कृत्वा वैक्षेक्षदारुकम् (?) ।
निवेश्याक्षतयो रज्जुं बन्धनं च दृढीकृतम् ॥ १२ ॥

अथवा योगयामं तु पट्टिकायां मनोहरम् ।
वलयद्वितयोपेतं शङ्कयुग्मं तु वै दृढम् ॥ १३ ॥

आरोप्य रज्जुयुगलं चतुर्धांशं व्यवस्थितम् ।
युग्मे तु पट्टिकामेव तस्यामेवं समाचरेत् ॥ १४ ॥

रज्जुद्वयं विधातव्यमायसाच्छन्नवीरवत् ।
नाळिकेरत्वचं रज्जुं वर्णं कार्पासतन्तुना ॥ १५ ॥

कोटिनिर्मग्नके चैव अभियुक्तकरं दृढम् ।
वर्णानि धातुजनितं काष्ठजं वा मनोहरम् ॥ १६ ॥

प्रतिमाद्विगुणायामं विस्तारेण तदर्धकम् ।
परितः प्रसङ्गसंयुक्तां पादगात्रकभूषिताम् ॥ १७ ॥

कोणेषु वलभीयुक्तां कङ्कणैरुपशोभिताम् ।
परिच्छन्नां दुकूलाद्यैर्व्याघ्रचर्मविभूषिताम् ॥ १८ ॥

किङ्किणीजालसंयुक्तां मुक्तादामविभूषिताम् ।
छत्राणां चामरादीनां बद्ध्वा कोणेषु वै दृढम् ॥ १९ ॥

11. c) $S^1S^2$ अन्नवेदं for ... वेद
12. b) M. वैशेष for वैक्षेक्ष°

रज्जुशीर्षचतुष्कं तु पल्केषु निबन्धयेत् ।
प्रागग्रयुगळेनैव प्रोक्तं वलययुग्मकैः ॥ २० ॥

बन्धयेच्छिबिकायां तत् कृत्वा पार्श्वयोरपि ।
संवेष्ट्य रज्जुयुगळं चित्रैः क्षौमादिवस्त्रकैः ॥ २१ ॥

सनाळिरक्तयुक्तैस्तु कुसुमैर्भूषयेच्च तौ ।
स्तम्भादिसर्वमावेष्ट्य अलङ्कुर्यादेवमेव हि ॥ २२ ॥

सुवर्णरजतैः पट्टैः रत्नादीनि प्रलम्बयेत् ।
मुक्तादामप्रलम्बैश्च चामरैः सुसिनादिकैः ॥ २३ ॥

घण्टाभिः क्षुद्रघण्टाभिः पुष्पमाल्यैस्तु दर्पणैः ।
ध्वजैश्च वैजयन्तीभिः विचित्रैस्तार्क्ष्यचिह्नितैः ॥ २४ ॥

प्रडोलतोरणं श्वेतं सुस्थिरं स्थापयेत्ततः ।
उदङ्मुखं प्राङ्मुखं वा मूले वै वेदिका भवेत् ॥ २५ ॥

डोलारोपणविस्तारा हस्तद्वयसमन्विता ।
सुधादिवर्णकैश्चित्रैर्भूषिता भूरलङ्कृता ॥ २६ ॥

विचित्रकुसुमोत्कीर्णा सुगन्धैरधिवासिता ।
लाजप्रकरसंयुक्ता कर्पूरागरुसंयुता ॥ २७ ॥

डोलायां वेदिकायां च अलङ्कृत्य द्विजोत्तमः ।
मानाङ्गुलेन वा सर्वं मात्राङ्गुलवशेन वा ॥ २८ ॥

डोलादिकमयं मानमन्यथास्य द्विषट्करम् ।
प्रपां यावत् प्रकुर्वीत विमानादिविभूषितम् ॥ २९ ॥

सेवितां गन्धसम्मिश्रैर्जलैरगरुधूपिताम् ।
एवं मण्टपसंयुक्तां कृत्वा डोलां प्रसन्नधीः ॥ ३० ॥

मङ्गलाङ्कुरपूर्वं तु कृत्वा शास्त्रविधानतः ।
ततो भागवताचार्यः पूर्वेद्युर्नित्यकर्मकृत् ॥ ३१ ॥

शशाङ्कोदयवेळायां देवदेवं श्रिया युतम् ।
आस्थानमण्टपं नीत्वा चतुर्भिर्मूर्तिपैः सह ॥ ३२ ॥

तोरणैर्दर्भमालाभिरलङ्कृत्य तु मण्टपम् ।
धान्याक्षततिलैः कृत्वा वेदिमीशानगोचरे ॥ ३३ ॥

महाकुम्भं तु संस्थाप्य वस्त्रयुग्मादिभूषितम् ।
करकं वस्त्रसंयुक्तं मूलास्त्रं च यजेत्ततः ॥ ३४ ॥

पुण्याहं वाचयेत्पश्चात् शान्तिहोममतः परम् ।
अच्छिन्नधारापूर्वं तु सर्वकर्म समाप्य च ॥ ३५ ॥

ततो मण्डपमध्ये तु शयनं कल्पयेत्सुधीः ।
ततो देवीयुतं देवमासनाद्यैः समर्चयेत् ॥ ३६ ॥

संस्थाप्य देवदेवेशमधमोत्तममार्गतः ।
हविरन्तं ततोऽभ्यर्च्य एवं विज्ञाप्य देशिकः ॥ ३७ ॥

ओं नमो भगवते तुभ्यं पूर्णषाड्गुण्यविग्रहम् ।
देवदेव जगन्नाथ प्रसन्नो भव मेऽच्युत ॥ ३८ ॥

नैवेद्यान्तं समभ्यर्च्य ततो डोलां प्रसन्नधीः ।
वेदिमध्ये ततः कृत्वा कमलं शालितण्डुलैः ॥ ३९ ॥

तन्मध्ये कमलां विष्णुं वसन्तं चन्द्रमर्चयेत् ।
समस्तैरासनाद्यैस्तु भोगैर्मात्रावसानकैः ॥ ४० ॥

डोलास्तम्भद्वयं चक्रमनन्तं संप्रपूजयेत् ।
पट्टिकायां श्रियं देवीं रज्जुशीर्षचतुष्टये ॥ ४१ ॥

चतुर्वेदमथाभ्यर्च्य गरुडं फलकोपरि ।
अर्घ्यादिपञ्चभागैस्तु दिक्पतीन दशदिक्षु च ॥ ४२ ॥

ततो मण्डलपूर्वे तु कुण्डे होमं समाचरेत ।
समित्सप्तकपूर्वं तु लाजैराज्यैस्तिलैरपि ॥ ४३ ॥

अष्टोत्तरसहस्रं वा शतमष्टोत्तरन्तु वा ।
मूलमन्त्रेण राजेन्द्र ततः पूर्वं समाचरेत ॥ ४४ ॥

डोलायां दक्षिणे वापि कुण्डे वा स्थण्डिलेऽपि वा ।
प्रद्युम्नसंज्ञया होमं तस्मिन् सर्वं समाचरेत ॥ ४५ ॥

संपाताज्येन विधिना परिचागान् स्वनामभिः ।
स्पृष्ट्वा डोलां तदाज्येन देवताभ्यो बलिं ददेत ॥ ४६ ॥

प्रक्षालिताङ्घ्रिराचान्तो मण्डलं सविशेद् गुरुः ।
रक्षां बद्ध्वाथ देवाय देव्योर्वामे तु वन्ययेत ॥ ४७ ॥

शङ्खभेर्यादिनादैश्च नृत्तगीतसमन्वितैः ।
रात्रिशेषं नयेत्पश्चात सर्वमङ्गलसंयुतम् ॥ ४८ ॥

प्रभाते विमले शुद्धे कृतकृत्यस्तु पूजकः ।
नित्यार्चनं हरेः कृत्वा नैमित्तिकमथाचरेत ॥ ४९ ॥

कलशं वर्धनीयुक्तं पाद्याद्यानि समर्चयेत ।
स्नपनं विधिवत्कृत्वा समस्तैर्भोगसंयुतैः ॥ ५० ॥

कलाधिदेवदेवेशं पूजयेद्देशिकोत्तमः ।
शशाङ्कमुदिते कृत्वा प्रत्येकं षोडशाहुतीः ॥ ५१ ॥

पौरुषेण च सूक्तेन हुनेत् पूर्णाहुतिं क्रमात् ।
उत्थाप्य देवदेवेशं मूलमन्त्रेण साधकः ॥ ५२ ॥

अलङ्कृत्य यथान्यायं सर्वैराभरणैर्विभुम् ।
शिबिकायां समारोप्य गेहं कृत्वा प्रदक्षिणम् ॥ ५३ ॥

शङ्खभेर्यादिघोषैस्तु जयशब्दसमन्वितम् ।
पठद्भिः शाकुनं सूक्तं ब्राह्मणैर्वेदपारगैः ॥ ५४ ॥

मुष्टिदीपसहस्रैस्तु गणिकाजनसंयुतम् ।
एवमेभिरलङ्कारैः रत्नीयवनमालिकैः ॥ ५५ ॥

स्तम्भादीनां श्रिया देव्यां समासीनं जगत्पतिम् ।
डोलां प्रदक्षिणं कृत्वा देवीभ्यां सह देवराट् ॥ ५६ ॥

डोलासमीपमासाद्य पुण्याहं तत्र कारयेत् ।
देवदेवं प्रपूज्याथ नमस्कृत्वा तु देशिकः ॥ ५७ ॥

मन्त्रक्रमस्थतोयेन डोलां संप्रोक्ष्य चार्चयेत् ।
जितन्त इति मन्त्रेण पाठयेन्मन्त्रवित्तमः ॥ ५८ ॥

वासुदेवाश्रयां डोलां मूलेनारोप्य पाठयेत् ।
शङ्खभेर्यादिनिर्घोषैः नादयेन्मङ्गळस्वनम् ॥ ५९ ॥

इदं प्राग्वत्तु वाद्याद्यैः दण्डवत् प्रणयेत् क्षितौ ।
चतुर्धा वाष्टधावापि डोलामंत्रस्य योगतः ॥ ६० ॥

वैनतेयस्य मूलेन कराभ्यां मानयेत्ततः ।
आचार्यं पूजयेत् पश्चात् कटकैरङ्गुलीयकैः ॥ ६१ ॥

डोलारोपितदेवेशं पश्यन्ति ब्रह्मवादिनः ।
प्रयान्ति विष्णुसालोक्यं मुक्त्वा मोक्ष इहैव तु ॥ ६२

तदन्ते स्नपनं वक्ष्ये पृथुराजकुलोद्भव ।
अष्टोत्तरं तु कलशैः पञ्चविंशतिरेव वा ॥ ६३ ॥

60. a) A पाद्याद्यैः for वाद्याद्यैः

एकाशीतिप्रकारेण द्वादशैर्नवकैस्तथा ।
शरसंख्यानि कर्तव्यं देवदेवस्य शार्ङ्गिणः ॥ ६४ ॥

स्नापयेद्देवदेवेशं कूर्चपल्लवशोभितम् ।
सुसूत्रान् वस्त्रयुग्मं च शालितण्डुलतिलैः ॥ ६५ ॥

गोमयालेपनं भूमौ सुधाचूर्णैरलङ्कृतम् ।
तन्मध्ये पातयेत्सूत्रं यथाकलशसंख्यया ॥ ६६ ॥

वस्त्रपूतांस्तु कलशान् स्थापयेद्विष्णुमन्त्रतः ।
यथाक्रमेण संस्थाप्य तत्तद्द्रव्याणि निक्षिपेत् ॥ ६७ ॥

पुण्याहं वाचयेत्तत्र ब्राह्मणैस्सह देशिकः ।
मुखशुद्धिः प्रदातव्या ब्राह्मणैर्वेदपारगैः ॥ ६८ ॥

रक्षासूत्रं ततः कुर्यात् स्नपनादौ विशेषतः ।
स्नानोपचारं देवस्य यथाशास्त्रप्रचोदितः ॥ ६९ ॥

हरिद्रादीनि चूर्णानि नालिकेरजलं ततः ।
स्नापयेद्देवदेवेशं श्रीसूक्तैः पुरुषैस्तथा ॥ ७० ॥

यथाक्रमेण कर्तव्यं महाहविर्निवेदनम् ।
देवाग्रे स्थण्डिलं कृत्वा तिलैर्लाजैश्च शालिभिः ॥ ७१ ॥

वैष्णवानलसंयुक्तं गन्धाधानादिकं क्रमात् ।
समिदाज्यचरून् हुत्वा शतमष्टोत्तरं पृथक् ॥ ७२ ॥

मूर्तिमन्त्रेण जुहुयात् तिललाजैश्च शालिभिः ।
मूलमन्त्रद्वयं हुत्वा समिदाज्यचरूंस्तथा ॥ ७३ ॥

अष्टोत्तरशतं हुत्वा तदर्धं वार्धमेव वा ।
षोडशीराहुतीर्हुत्वा अतो न्यूनं न कारयेत् ॥ ७४ ॥

72. b) M. My. गर्भा° for गन्धा

मण्टपे तु बलिं दद्यात् ब्राह्मणांश्चैव भोजयेत् ।
दक्षिणां दापयेत् पश्चात् देशिकप्रियकारणाम् ॥ ७५ ॥

देशान्तरगतान् विप्रान् यथाशक्तिस्तु दक्षिणाः ।
तत्तत्काले तु कर्तव्यमभिषेकार्चनं हरेः ॥ ७६ ॥

महदैश्वर्यमाप्नोति तदन्ते विष्णुना समम् ।
स्वर्गादिभोगफलदं चिरकालं लभेन्नृप ॥ ७७ ॥

स्नपने भोजने दाने होमकर्म समाचरेत् ।
विष्णुप्रीतिकरं सद्यः नात्र कार्या विचारणा ॥ ७८ ॥

तस्मात्सर्वप्रयत्नेन अभिषेकं श्रियःपतेः ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां डोलारोपणविधिर्नाम

चतुर्विंशोऽध्यायः ॥

## पञ्चविंशोऽध्यायः

* * *

अथ वक्ष्यामि ते राजन् दीपारोपविधिं शृणु ।
कार्तिक्यां शुक्लपक्षे तु नक्षत्रे कृष्णवर्त्मन: ॥ १ ॥

क्षालयेद्भवनं सम्यगापोहिष्ठेति मन्त्रत: ।
प्राकारं मण्टपं चैव गोपुरं च महानसम् ॥ २ ॥

कूपमज्जनशालाश्च धनधान्यालयानि च ।
मार्जयित्वा प्रयत्नेन वायुमन्त्रेण देशिक: ॥ ३ ॥

प्रोक्षयित्वाथ बीजेन पञ्चगव्येन साधक: ।
क्षालयेद्बलिपीठं तु विष्णुमन्त्रं समुच्चरन् ॥ ४ ॥

चन्दनागरुकर्पूरैर्धूपं सर्वालयस्य च ।
अक्षतैर्विकिरेत्तेषु वस्त्रैराच्छाद्य सर्वत: ॥ ५ ॥

यावत्प्राकारविस्तारमलङ्कृत्य यथाविधि ।
स्नपनं कारयेत्पश्चात एकाशीतिविधानत: ॥ ६ ॥

अर्चयित्वा तु विधिवत् गन्धपुष्पादिभि: क्रमात ।
सौवर्णं राजतं ताम्रं मृण्मयं वा यथारुचि ॥ ७ ॥

सुषिरं वर्जयेत्कुम्भान् चतुर्विंशाङ्गुलोन्नतान् ।
विस्तृतिर्मध्यतस्तद्वत् त्र्यङ्गुलं गलमेव च ॥ ८ ॥

तत्र मङ्गलतत्कोणं तत्र स्यात् त्र्यङ्गुलोन्नतम् ।
मेखलोपरितो ज्ञेया त्र्यङ्गुलान्नृसत्तम ॥ ९ ॥

यद्वा तदर्धमानं तु सर्वमुच्छ्रायपूर्वकम् ।
यद्वोत्तमोत्तमं ज्ञेयं सर्वमुच्छ्रायपूर्वकम् ॥ १० ॥

यद्वोत्तमोत्तमं ज्ञेयं द्रोणमानोदकं भवेत् ।
तदष्टमांशतो न्यूनात् क्रमात्पृथग्यथाविधि ॥ ११ ॥

अधमाधमकुंभांस्तु प्रथमाने प्रपूरयेत् ।
एवं लक्षणसंयुक्तं कुर्या.... तु सारतः ॥ १२ ॥

सूत्रवस्त्रादि संवेष्ट्य स्थापयेद्देवसन्निधौ ।
धान्यराशिं यथापूर्वं कल्पयेद्देशिकोत्तमः ॥ १३ ॥

उत्तमं कपिलाज्यं तु मध्यमं गोघृतं भवेत् ।
त्याज्यं तु महिषाज्यं तु प्राणिजं वर्जयेन्नृप ॥ १४ ॥

गृहीत्वाऽऽज्यं देशिकोथ कुम्भे कुम्भे तु पूरयेत् ।
कार्पासमूलैः कर्पूरगोघृते मिश्रितैः क्रमात् ॥ १५ ॥

कुम्भे विनिक्षिप्य ततो दीपं प्रज्वालयेत्ततः ।
दीपस्य पद्मनाळं तु कार्पासं वाथ कारयेत् ॥ १६ ॥

दीपस्य पद्मसूत्रं तु दीपानामुत्तमो भवेत् ।
मध्यमं दीपनाळं तु मध्यमाङ्गुळिसम्मितम् ॥ १७ ॥

अधमं दीपनाळं तु कनिष्ठासदृशं भवेत् ।
दीपं प्रज्वालयेद्गेहे सन्निधौ देवपार्श्वयोः ॥ १८ ॥

स्थापयेन्मूलमन्त्रेण पुण्याहं वाचयेत्ततः ।
पुष्पाङ्कुरं समारोप्य शान्तिहोमपुरस्सरम् ॥ १९ ॥

अर्चयेत् स्थापितान् कुम्भान् गन्धपुष्पादिना ततः ।
पञ्चविंशतिकुंभांस्तु विंशत्कुम्भमथापि वा ॥ २० ॥

अथवा दशकुम्भं तु पञ्चकुम्भमथापि वा ।
अलाभे एककुम्भं वा पूजयेद्देशिकोत्तमः ॥ २१ ॥

अन्येषामपि दीपानां तिलतैलमथापि वा ।
देवदेवसमीपे तु त्रिसन्ध्यासु दिने दिने ॥ २२ ॥

देवस्य दर्शनार्थं तु नित्यं दीपं प्रकल्पयेत् ।
दीपाकारं चतुर्दिक्षु नातिप्रज्वाल्य बुद्धिमान् ॥ २३ ॥

तस्मात्सर्वप्रयत्नेन कल्पयेन्मन्त्रदीपकम् ।
पुन्नागैरण्डतैले च ज्योतिष्मनरिरुन्दयोः (?) ॥ २४ ॥

अन्येषामेव सर्वेषां वर्जयित्वा विचक्षणः ।
काष्ठजैः स्थलजैर्देवैः नित्यं नीराजनेऽपि वा ॥ २५ ॥

सन्ध्यादीपे विशेषेण नित्यं प्रज्वालनेऽपि च ।
गर्भागारे तथा द्वारे मण्डपे चाङ्गणेऽपि च ॥ २६ ॥

घृततैलादिदीपैस्तु कर्पूरावर्तिसंयुतैः ।
तत्तद्द्वारेषु सर्वेषु दीपान् प्रज्वालयेन्नृप ॥ २७ ॥

उत्सवं कारयेत्सम्यक् सर्वालङ्कारसंयुतम् ।
रथैश्च विविधैरश्वैरश्वैश्च विविधैर्गजैः ॥ २८ ॥

शिखादीपपताकैश्च अन्यैश्च विविधैश्शुभैः ।
आरूढवैष्णवैः सर्वैः सर्वालङ्कारसंयुतैः ॥ २९ ॥

मालादीपं महादीपं चक्रदीपं तथैव च ।
सेव्यमानो यथान्यायमप्सरोगणसेवितैः ॥ ३० ॥

प्रदीपशतसंयुक्तैः सर्वभूषणसंयुतैः ।
मालादीपं महादीपं चक्रदीपं तथैव च ॥ ३१ ॥

24. d) My S¹. ज्योतिष्मतिरु° S² ज्योतिष्मन्नरिरु° for ज्योतिष्मतरिरु°

कूर्माकारप्रदीपं च मत्स्याकारं तथैव च ।
कूटाकारप्रदीपं च धन्वाकारं तथैव च ॥ ३२ ॥

इत्येते दीपसङ्घं च आचरेदुत्सवं महत् ।
प्राकाराणां तु सर्वेषां मालादीपं प्रशस्यते ॥ ३३ ॥

मण्टपे च महादीपो चक्रदीपं तु गोपुरे ।
कूर्मं महानसे चैव मत्स्यं पुष्पालये तथा ॥ ३४ ॥

कूटाकारं तु कूपे च धनधान्यालये धनुः ।
दीपं मज्जनशालायां दण्डाकारं प्रशस्यते ॥ ३५ ॥

शङ्खाकारं तु शयने मालादीपं प्रशस्यते ।
दीपकूटं तु कोणेषु अष्टपुत्रसमन्वितम् ॥ ३६ ॥

दशतालप्रमाणेन तालाष्टकमथापि वा ।
उत्सेधसमविस्तार चतुरश्रं तु कारयेत् ॥ ३७ ॥

ब्रह्मवृद्धिकरं चाग्रं वृत्तं तद्राजवृद्धिदम् ।
वैश्यानां वृद्धिदं प्रोक्तमष्टाश्रं तु तथैव च ॥ ३८ ॥

गदाशङ्खसमाकारं पद्माकारं तथैव च ।
त्रिकोणज्वलपीठं तु शूद्राणामृद्धिदं स्मृतम् ॥ ३९ ॥

पीठबाह्ये तु पैशाचे कूटदीपं प्रशस्यते ।
पीठस्य द्विगुणोत्सेधो विस्तारं तत्समं भवेत् ॥ ४० ॥

पीठगोपुरयोर्मध्ये विष्णुदीपं प्रकल्पयेत् ।
विष्णुदीपप्रमाणं तु प्रासादस्य समं भवेत् ॥ ४१ ॥

---

33. MMy. add the following before 33 'गदाशङ्खसमाकारं पद्माकारं तथैव च' ॥

39. ab) M. om.

पैत्तलं लोहजं ताम्रमायसं चेति पञ्चधा ।
प्रासादाग्रे ततः कुर्यात् मण्टपस्याग्रतोऽपि वा ॥ ४२ ॥

प्रासादसदृशं श्रेष्ठं तदर्धं मध्यमं भवेत् ।
तस्यार्धमधमं ज्ञेयं दीपदण्डं तु कारयेत् ॥ ४३ ॥

वेणुदण्डो ऋजुः सौम्यः क्रमुको नारिकेरजः ।
चन्दनं बिल्ववृक्षश्च चम्पकं .... जुनं तथा ॥ ४४ ॥

पालाशं देवदारुश्च दीपदण्डाः प्रकीर्तिताः ।
कार्पासजानां वस्त्राणां वर्तिभिश्छादयेत्तथा ॥ ४५ ॥

सौवर्णं राजतं वापि ताम्रं वा मृण्मयं तु वा ।
दीपमालं प्रकुर्वीत द्रोणेन परिपूरितम् ॥ ४६ ॥

तदर्धं मध्यमं प्रोक्तं तदर्धमधमं भवेत् ।
क्षालयेत्पञ्चगव्येन दीपमालं पृथक् पृथक् ॥ ४७ ॥

स्तम्भाग्रे योजयेत्पालं पुण्याहं वाचयेत्ततः ।
सर्पिः कार्पासवर्त्या तु मिश्रितं तु सुयोजयेत् ॥ ४८ ॥

अग्निबीजमनुस्मृत्य दीपं प्रज्वालयेत्ततः ।
दीपमध्ये महाविष्णुं दक्षिणे रुद्रमर्चयेत् ॥ ४९ ॥

वामे चैव विधिं पूज्य तत्तन्मन्त्रेण पूजयेत् ।
देवदेवमलङ्कृत्य वारणस्य च मूर्धनि ॥ ५० ॥

विन्यसेच्छुद्धपाशेन बध्नीयाद्देशिकोत्तमः ।
पूर्वं स्थापितकुम्भानामुद्धृत्य भगवन्मया ॥ ५१ ॥

धाम्नि प्रदक्षिणीकृत्य ग्रामादीनां प्रदक्षिणम् ।
अवरोप्य च देवेशमन्तर्मण्डपमाविशेत् ॥ ५२ ॥

प्रासादमण्डपद्वारे गोपुरे च महानसे ।
तत्कुम्भं तु विनिक्षिप्य नमस्कृत्य तु देशिकः ॥ ५३ ॥

गर्भगेहं समासाद्य मूलबेरं समर्चयेत् ।
पूजयेद्वीरलक्ष्मीं च उत्सवं बेरमाश्रयेत् ॥ ५४ ॥

अर्घ्यादिदीपपर्यन्तं पूजयेद्देशिकोत्तमः ।
विविधानुपहारांश्च प्रदद्यात् भगवत्करे ॥ ५५ ॥

पश्चात्सौगन्धिकोपेतं ताम्बूलं दापयेत्ततः ।
आचामं दापयेत्पश्चात् वायुबीजेन साधकः ॥ ५६ ॥

महाहविस्ततो दद्यान्मातुलुङ्गफलान्वितम् ।
वत्सरे यस्तु राजेन्द्र दीपदानेन यत्फलम् ॥ ५७ ॥

तत्फलं कार्तिके मासि दीपारोपणको नरः ।
एककालं द्विकालं वा त्रिकालं वाथ कार्तिके ॥ ५८ ॥

दीपमारोपयेद्देवं विष्णुसारूप्यतां नयेत् ।
आचार्यं पूजयेत्पश्चात् सुवर्णरजतादिभिः ॥ ५९ ॥

पञ्चरात्रविदो मुख्यो यतीन् संपूजयेत्ततः ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां
दीपारोपणविधानो नाम
पञ्चविंशोऽध्यायः ॥

# अथ षट्त्रिंशोऽध्यायः

## [प्रायश्चित्तविधानम्]

पूजाकाले नृपश्रेष्ठ पूजाहीने तु देवराट् ।
प्रतिष्ठां कारयेत्तस्मिन् विधिवत्पूजयेत्ततः ॥ १ ॥

भेदे च्छेदे च यत्कुर्यात् प्रतिष्ठां कारयेत्ततः ।
आलयं विधिवत्कृत्वा पूजयेच्च दिनं प्रति ॥ २ ॥

सर्वैश्वर्यमवाप्नोति भुज्यते पुत्रपौत्रवान् ।
चिरकालार्चने हीने प्रोक्षणं तु विना भवेत् ॥ ३ ॥

सा पूजा निष्फला याति भस्मान्तुर्तिरिति स्मृतः ।
तस्मात्सर्वप्रयत्नेन प्रोक्षणं तु समाचरेत ॥ ४ ॥

अकृते यदि संमोहात् राष्ट्रनाशो न संशयः ।
तत्स्थाने स्थितदेवेशमन्यस्थाने समाश्रयेत ॥ ५ ॥

सस्यानां नाशयेत्पूर्वं तत्कर्ता च तथैव च ।
तस्मात्सर्वप्रयत्नेन प्रोक्षणं तु समाचरेत् ॥ ६ ॥

नादबिन्दुविभेदं च प्रमादात्पतितो भवेत् ।
स्फोटनं भेदनं चैव संभवेत् बिम्बगात्रके ॥ ७ ॥

तद्बिम्बं विसृजेत्तस्मिन् साधयेदन्यमेव तु ।
पर्वतस्य च शृङ्गे च पार्श्वयोरुभयोरपि ॥ ८ ॥

शृङ्गमूले च कर्तव्यं दृश्यते .... .... ।
.... .... स्तटकादिषु दृश्यते ॥ ९ ॥

स्वयमेव समुत्पन्ने शैलबिम्बे तु देवराट् ।
पार्श्वयोश्च नदीनां च तन्मध्ये दृश्यते यदि ॥ १० ॥

यत्र सदृश्याथ .... आलयं कुरुते ततः ।
तटाकोभयपार्श्वे तु मध्ये वाथ यथारुचि ॥ ११ ॥

तटाकस्य च पूर्वे वा पश्चिमे वा यथारुचि ।
तद्विष्णुं स्थापयेत्तत्र कल्पयेदालयं ततः ॥ १२ ॥

तत्तत्स्थानेषु राजेन्द्र विष्णुगेहं प्रकल्पयेत् ।
एतद्बिम्बे समुत्पन्ने तत्र गेहं तु कारयेत् ॥ १३ ॥

पर्वतस्य च शृङ्गे वा पार्श्वयोरुभयोरपि ।
तत्तत्स्थाने स्थितान् देवान् घातनोत्पातने ततः ॥ १४ ॥

नद्याघाते भवेत्तस्मिन् चोरघाते तथैव च ।
देवैर्वा मानुषैर्वापि प्रमादात् संभवेद्यदि ॥ १५ ॥

तस्मात्सर्वप्रयत्नेन पूर्वस्थाने प्रतिष्ठिते ।
पूर्वस्थाने स्थितान् देवान् .... ॥ १६ ॥

मोहाद्वा यदि वा लोभात् कदनोत्पादने (?) ततः ।
तद्ग्रामं नाशयेत्पूर्वं तत्कर्ता नाशयेद्ध्रुवम् ॥ १७ ॥

तस्मात्सर्वप्रयत्नेन पूर्वस्थानेषु पूजयेत् ।
तद्ग्रामे च समृद्धिः स्याद्राजराष्ट्रसुखावहम् ॥ १८ ॥

ग्रामशून्ये च नष्टे च स्थानशून्ये तथैव च ।
यत्र यत्र समुत्पन्ने तत्र तत्र सुपूजयेत् ॥ १९ ॥

ग्रामशून्ये च बेरे तु अन्यदेशे न कारयेत् ।
कालेन बेरमादाय अन्यदेवस्थितं यदि ॥ २० ॥

तद्ग्रामं नाशयेत्पूर्वं तत्कर्ता नाशयेद्ध्रुवम् ।
तस्मात्सर्वप्रयत्नेन पूर्वस्थाने प्रपूजयेत् ॥ २१ ॥

प्रासादे वा विनष्टे तु भिन्ने भेदेऽष्टबन्धने ।
मण्डपद्वारहीने तु पीठस्य विकले तथा ॥ २२ ॥

गजैर्वा शत्रुभिश्चोरैः सम्भवेत् यदि दैवतात् ।
प्रतिष्ठा पूर्ववत्कार्या इति शास्त्रस्य निश्चयः ॥ २३ ॥

अथवा प्रोक्षणं होमं दिशाहोममतः परम् ।
बालस्थानेषु यद्दोषं तद्वदेव हि कारयेत् ॥ २४ ॥

कारयेज्जलवासं तु विना नयनमोक्षणम् ।
स्थापनं रत्नसंयोगं दिशाहोमं विना ततः ॥ २५ ॥

मन्त्रन्यासं विना चैव शेषं पूर्ववदाचरेत् ।
इदं गुह्यं नृपश्रेष्ठ प्रोक्षणं समुदाहृतम् ॥ २६ ॥

एवं यस्तु विधानेन प्रायश्चित्तं समाचरेत् ।
स याति ब्रह्मसायुज्यं सर्वान् कामानवाप्नुयात् ॥ २७ ॥

दिवा न देवतापूजा रात्रिपूजा कदाचन ।
दैविकं चार्षकं सैद्धं स्वयंव्यक्तं महाल्यम् ॥ २८ ॥

सततं पूजयेद्देवं सदाकालं प्रपूजयेत् ।
तस्करैर्म्लेच्छपाषाणैः कलहादिसमुद्भवे ॥ २९ ॥

स्पृश्यते चाङ्गहीनैं च श्वानपादस्पृशो यदि ।
.... .... .... प्रायश्चित्तं समाचरेत् ॥ ३० ॥

प्रातःकालार्चने लुप्ते द्विगुणं तत्र पूजयेत् ।
सन्ध्यातिक्रमणे चात्र द्विगुणं पूजयेद्ध्रुवः ॥ ३१ ॥

द्विकालार्चनलुप्ते तु दैवे वा मानुषेऽपि वा ।
साङ्गोपाङ्गसमायुक्तं पूजयेत्तु चतुर्गुणम् ॥ ३२ ॥

एकाहमर्चनालुप्ते कलशैः स्नपनं ततः ।
नवकं कारयित्वा तु तत्त्वन्यासं च कारयेत् ॥ ३३ ॥

पूजयित्वा हविर्दद्यात् द्रोणसंख्यासमन्वितम् ।
शर्कराघृतसंयुक्तं गुडखण्डसमन्वितम् ॥ ३४ ॥

कदळीफलसंयुक्तं दापयेद्देशिकोत्तमः ।
समिदाज्यचरूणां तु प्रत्येकं नवसंख्यया ॥ ३५ ॥

अयुतं जुहुयात्पश्चात् मूलमन्त्रैस्त्रिभिस्ततः ।
जलसंप्रोक्षणादर्वाक् पूजालुप्ते .... ॥ ३६ ॥

प्रायश्चित्तमिति प्रोक्तं नित्यं कुण्डेषु योजयेत् ।
वेदसंघोषणादीनि शेषकर्माणि कारयेत् ॥ ३७ ॥

पूर्ववत्कारयित्वा तु गर्भगेहं प्रवेशयेत् ।
गर्भगेहं प्रविश्याथ गन्धपुष्पादिभिः शुभैः ॥ ३८ ॥

पूजयित्वा हविर्दद्यात् भक्त्या साङ्गैर्यथाक्रमम् ।
समिदाज्यैर्हुनेत्पूतैस्ततो द्वादशसंख्यया ॥ ३९ ॥

अन्यच्च देशिकः पश्चात् क्षमस्व इति योजयेत् ।
अहोरात्रद्वये लुप्ते पूजयेद्धरिबेरके ॥ ४० ॥

द्वादशैः कलशैर्बिम्बान् स्नापयेद्देशिकोत्तमः ।
तत्त्वन्यासं ततः कुर्याच्चत्वारिंशत्तु संख्यया ॥ ४१ ॥

जुहुयादाहुतिं पश्चात् मूलमन्त्रैः पृथक् पृथक् ।
महाहविस्ततो दद्यात् उपहाराननेकशः ॥ ४२ ॥

40. b) MS[1] S[8]. वोच्चरेद् for योजयेत

बलिहोमं यथापूर्वं पूजयेद्देशिकोत्तमः ।
गेहं प्रदक्षिणं कृत्वा गर्भगेहं प्रवेशयेत ॥ ४३ ॥

प्रविश्य गर्भगेहं तु पूजयित्वा द्विजोत्तमः ।
क्षमस्व पुण्डरीकाक्ष इत्युक्त्वा तान् विसर्जयेत् ॥ ४४ ॥

अहोरात्रत्रयं वाथ चतुःपञ्चकमेव वा ।
पूजालुप्तेषु बिम्बेषु षोडशैः कलशैस्ततः ॥ ४५ ॥

स्नपनं कारयित्वा तु तत्वन्यासं समाचरेत् ।
अर्चयित्वा हविर्दद्यात् खारिसंख्यासमन्वितम् ॥ ४६ ॥

समिदाज्यचरूणां तु जुहुयात्षोडशाहुतीः ।
हुत्वा गेहं प्रविश्याथ पूजयित्वा क्षमापयेत् ॥ ४७ ॥

ब्राह्मणान् भोजयेत्पश्चात् यथा वित्तानुसारतः ।
दशपञ्चदशाहादौ लुप्ते वा अर्चने ततः ॥ ४८ ॥

कुम्भैः सप्तदशैर्बिम्बं स्नापयेत्तु पृथक् पृथक् ।
तत्वन्यासं ततः कुर्यात् पूजयेद्देशिकोत्तमः ॥ ४९ ॥

महाहविस्ततो दद्यात् सार्धं खारिसमन्वितम् ।
समिदाज्यौदनैः पूतैस्ततः सप्तदशाहुतीः ॥ ५० ॥

जुहुयाद्देशिकः पश्चान्मूलमन्त्रैस्त्रिभिस्ततः ।
वेदसंघोषणादीनि कारयित्वा तु पूर्ववत् ॥ ५१ ॥

ब्राह्मणान् भोजयित्वाथ यथावित्तानुसारतः ।
पूर्वोक्तबलिहोमं तु पूजयेद्देशिकोत्तमः ॥ ५२ ॥

गेहं प्रदक्षिणं कृत्वा गर्भगेहं प्रवेशयेत् ।
गर्भगेहं प्रविश्याथ पूजयित्वाथ देशिकः ॥ ५३ ॥

क्षमस्व पुण्डरीकाक्ष मन्त्रमुक्त्वा विसर्जयेत् ।
एकमासार्चने लुप्ते कलशैर्दश वाष्टकैः ॥ ५४ ॥

स्नापयेद्देशिकः पश्चात् मूलमन्त्रैः पृथक् पृथक् ।
तत्वन्यासं ततः कुर्यात् चत्वारिंशत्तु संख्यया ॥ ५५ ॥

महाहविस्ततो दद्यात् खारिद्वयसमन्वितम् ।
समिदाज्यचरूणां तु प्रत्येकं दश वाष्टकम् ॥ ५६ ॥

आहुतिं जुहुयात् पश्चात् मूलमन्त्रैस्त्रिभिस्ततः ।
पूजयित्वा यथान्यायं गन्धपुष्पादिभिः शुभैः ॥ ५७ ॥

ब्राह्मणान् भोजयेत्तत्र शान्तिहोममतः परम् ।
एकाहमुत्सवं राजन् तद्दोषस्तु न बाधते ॥ ५८ ॥

बलिहोमं यथापूर्वं पूजयेद्देशिकोत्तमः ।
मासत्रयार्चनालुप्ते बिम्बे बेरे तथैव च ॥ ५९ ॥

स्नपनं कारयेत्पश्चात् पञ्चाशैः पञ्चविंशकैः ।
तत्वन्यासं ततः कुर्यात् पूजयित्वाथ देशिकः ॥ ६० ॥

महाहविस्ततो दद्यात् भारसंख्यासमन्वितम् ।
समिदाज्यचरूणां तु पञ्चविंशतिसंख्यया ॥ ६१ ॥

आहुतीर्जुहुयात्पश्चात् मूलमन्त्रैः पृथक् पृथक् ।
ब्राह्मणान् भोजयेत् पश्चात् पूजयित्वाथ देशिकः ॥ ६२ ॥

बलिहोमं प्रकुर्वीत यथापूर्वं प्रकल्पयेत् ।
वासरैकोत्सवं कुर्यात तच्छान्तिं च समाचरेत् ॥ ६३ ॥

पूजालुप्तेषु बिम्बेषु तथा मासचतुष्टये ।
षट्त्रिंशत्कलशैः पश्चात् स्नपनं कारयेद्बुधः ॥ ६४ ॥

---

59. c) MS[1] अर्चने for °र्चना

तत्वन्यासं ततः कुर्यात शान्तिहोममनः परम् ।
पूजयेद्देवदेवेशं पुण्याहोक्तिपुरस्सरम् ॥ ६५ ॥

महाहविस्ततो दद्यात् भारद्वयसमन्वितम् ।
समिदाज्योदनैः पूतैः षट्त्रिंशत्सङ्ख्यान्वितम् ॥ ६६ ॥

आहुतीः जुहुयात्पश्चात् मूलमन्त्रैस्त्रिभिस्ततः ।
पूजयित्वाथ देवेशमर्घ्यपाद्यादिकं ततः ॥ ६७ ॥

ब्राह्मणान् भोजयित्वाथ वसन्तोत्सवमाचरेत ।
एकद्वित्रिदिनं वाथ वसन्तोत्सवमाचरेत् ॥ ६८ ॥

बलिदानं यथापूर्वं पूजयेद्देशिकोत्तमः ।
पूजालुप्तेषु बिम्बेषु तथा वै मासपञ्चके ॥ ६९ ॥

कुम्भैरेकोनपञ्चाशत्स्नपनं कारयेद्बुधः ।
शान्तिहोमं ततः कुर्यात् पुण्याहं तु पुरस्सरम् ॥ ७० ॥

तत्वन्यासं ततः कृत्वा पूजयित्वाथ बुद्धिमान् ।
महाहविस्ततो दद्यात् सार्धभारद्वयं तथा ॥ ७१ ॥

समिदाज्यचरूणां तु प्रत्येकक्रमयोगतः ।
संख्यैरेकोनपञ्चाशदाहुतीर्जुहुयात्पुनः ॥ ७२ ॥

ब्राह्मणान् भोजयेत् पश्चात् वसन्तोत्सवमाचरेत ।
एकद्वित्रिदिनं वाथ उत्सवं च समाचरेत् ॥ ७३ ॥

गर्भगेहं प्रविश्याथ पूजयेद्देशिकोत्तमः ।
बलिहोमं यथापूर्वं कल्पयेद्देशिकोत्तमः ॥ ७४ ॥

क्षमस्व पुण्डरीकाक्षेत्युक्त्वा तं क्षमयेद्बुधः ।
पूजालुप्तेषु बिम्बेषु षण्मासं च तु दैविके ॥ ७५ ॥

कलशैः स्नपनं कुर्यात् चतुःपञ्चाशदुत्तरैः ।
शान्तिहोमं ततः कृत्वा पुण्याहोक्तिपुरस्सरम् ॥ ७६ ॥

तत्वन्यासं ततः कृत्वा पूजां कृत्वा तु पूर्ववत् ।
महाहविस्ततो दद्यात् भारत्रयसमन्वितम् ॥ ७७ ॥

ब्राह्मणान् भोजयेत् पश्चाद्यथा वित्तानुसारतः ।
समिदाज्योदनैः पूतैः चतुःपञ्चाशदाहुतीः ॥ ७८ ॥

हुत्वाथ पूजयित्वा तु उत्सवं च समाचरेत् ।
बलिहोमं यथापूर्वं क्षमस्वेति समापयेत् ॥ ७९ ॥

सप्तमं मासमारभ्य यावदब्दावसानकम् ।
पूजालुप्तेषु बिम्बेषु जलसंप्रोक्षणं स्मृतम् ॥ ८० ॥

ब्राह्मणान् भोजयेत्पश्चात् तदन्ते च महोत्सवः ।
पूर्ववद्बलिहोमं तु पूजयेद्देशिकोत्तमः ॥ ८१ ॥

अब्दादूर्ध्वं नृपश्रेष्ठ प्रतिष्ठां कारयेद्बुधः ।
तदन्ते चोत्सवं कुर्यात् पूजयेद्देशिकोत्तमः ॥ ८२ ॥

जललुप्तेषु बिम्बेषु देशिकस्तन्त्रपारगः ।
जलसंप्रोक्षणाङ्गानि प्रतिष्ठाङ्गानि सर्वशः ॥ ८३ ॥

तानि सर्वाणि राजेन्द्र सर्वं पूर्ववदाचरेत् ।
मूलबिम्बाङ्गबिम्बेषु रामकृष्णादिमूर्तिषु ॥ ८४ ॥

लक्ष्म्यादीनां च बिम्बेषु प्रायश्चित्तमिदं समम् ।
तार्क्ष्यशेषकचक्रादीन् मूर्तीनां तु विशेषतः ॥ ८५ ॥

पूजालुप्तेषु बिम्बेषु प्रायश्चित्तमिहोच्यते ।
दिनमेकाधिकं हीने यावत्त्रिंशद्दिनान्तिमम् ॥ ८६ ॥

पूजालुप्तेषु बिम्बेषु लक्ष्म्यादीनां पृथक् पृथक् ।
द्विगुणादिकपूजां च कुर्यात्त्रिंशद्दिनान्तिकम् ॥ ८७ ॥

आवाहनादिसंयुक्तं स्वस्वनाम्ना च देशिकः ।
एकमादिकमं चैव षष्ठमासावसानकम् ॥ ८८ ॥

पूजालुप्तेषु बिम्बेषु तार्क्ष्यादीनां यथाक्रमम् ।
स्नानं कुर्यात्त्रिकुम्भैस्तु कुम्भैरष्टादशान्तकैः ॥ ८९ ॥

षट्सु मासेषु राजेन्द्र स्वस्वनाम्ना यथाक्रमम ।
पूजयित्वा हविर्दद्यात् प्रत्येकं शिवसंख्यया ॥ ९० ॥

गेहं प्रदक्षिणं कृत्वा स्वेषु स्थानेषु वेशयेत् ।
सप्तमासं समुद्धृत्य यावदब्दावसानकम् ॥ ९१ ॥

पूजालुप्तेषु बिम्बेषु तार्क्ष्यादीनां तथैव च ।
स्नपनं कारयेत्पूर्वं कुम्भैर्विंशतिभिः क्रमात् ॥ ९२ ॥

पञ्चविंशतिकैश्चैव यथासंख्या यथाक्रमम् ।
अर्चयित्वा हविर्दद्यात् प्रत्येकं द्रोणसंख्यया ॥ ९३ ॥

गेहं प्रदक्षिणं कृत्वा स्वेषु स्थानेषु योजयेत् ।
अष्टादूर्ध्वं तथापश्चादर्वाग्द्वादशका समा ॥ ९४ ॥

जलसंप्रोक्षणं कुर्यात् पूजालुप्तेषु देशिकः ।
स्नपनं तत्र कुर्वीत षट्त्रिंशत्कलशैस्ततः ॥ ९५ ॥

पूजालुप्तेषु बिम्बेषु तार्क्ष्यादीनां पृथक् पृथक् ।
स्वस्वनाम्ना च मतिमान् प्रत्येकं चाष्टसंख्यया ॥ ९६ ॥

जलसंप्रोक्षणं कुर्यात् कुशतोयेन देशिकः ।
तत्त्वन्यासं ततः कुर्यात् पूर्ववत्पूजयेत्ततः ॥ ९७ ॥

---

91. c) MS[1]S[2]. समारभ्य 10: समुद्धृत्य

पूजयित्वा हविर्दद्यात् .... भारसमन्वितम् ।
समिदाज्योदनैः पूतैः प्रत्येकं चाष्टविंशतिः ॥ ९८ ॥

जुहुयादाहुतीः पश्चात् देशिकस्य च मन्त्रतः ।
गेहं प्रदक्षिणं कृत्वा स्वस्थाने विनिवेशयेत् ॥ ९९ ॥

अर्चयित्वा तु तार्क्ष्यादीन् क्षमस्वेति समापयेत् ।
अब्दद्वादशकादूर्ध्वं प्रतिष्ठां तत्र कारयेत् ॥ १०० ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां प्रायश्चित्तविधानं
नाम षड्विंशोऽध्यायः ।
समाप्तः ॥

# अथ सप्तत्रिंशोऽध्यायः

## [ मरणादिप्रायश्चित्तम् ]

प्रायश्चित्तं प्रवक्ष्यामि ग्रामेषु नगरेषु च ।
वीथीषु चासु सर्वासु भवने चाङ्गणेऽपि च ॥ १ ॥

आलये वाग्निकोणे च आस्थाने राजमन्दिरे ।
तटाके च महाकूपे पल्वले मन्दिरादिके ॥ २ ॥

नराणां चैव नारीणां विप्रवंशसमुद्भवान् ।
ज्ञानाज्ञानप्रमादाद्वा मरणं संभवेद् यदि ॥ ३ ॥

महद्भिर्विविधार्थैश्च धनेन भुवनेन च ।
मनसा जातमोहेन पापपुण्येन वा नरः ॥ ४ ॥

सभामध्यगतेनैव वाग्दोषेणैव वा नरः ।
महादोषे समुत्पन्ने आत्मभिः पतने यदि ॥ ५ ॥

कर्मणा च मनःपूर्वं महादोषस्तु संभवेत् ।
स गेहं ताडयेत्सद्यः सर्वेस्वाहरणं गुरुः ॥ ६ ॥

ग्रामबाह्ये तु राजेन्द्र विप्रसंघं समाह्वयेत् ।
आर्द्रवस्त्रसमायुक्तं कृत्वा चैव प्रदक्षिणम् ॥ ७ ॥

विज्ञाप्य च तदर्थं तु अनुज्ञां याचयेत्ततः ।
जनादनुज्ञां लब्ध्वा तु दाहयेत प्रेतमेव च ॥ ८ ॥

तद्दोषमुच्चरेत्तेषु भैक्षं तत्र समाचरेत् ।
रज्जुशस्त्रविवादैश्च मरणं तत्र संभवे ॥ ९ ॥

---

4. b) च भुवेन for भुवनेन

शीघ्रं बहिः शवं नीत्वा गोमयेनोपलिप्य च ।
पर्यग्निपञ्चगव्याभ्यां शोधयित्वा तथालयम् ॥ १० ॥

वास्तुहोमं तु हुत्वैवं तृणानि तु व्यपोह्य च ।
हुत्वैकाहं महाशान्तिं प्रोक्षणं च समाचरेत् ॥ ११ ॥

जाताशौचं मृताशौचं पूजाकाले श्रुतं यदि ।
आशौचमाचरेद्विद्वान् पूजान्ते तु विधीयते ॥ १२ ॥

ग्राममध्ये शवो यावत्तिष्ठते यस्य कस्यचित् ।
ग्रामस्य तावदाशौचं निर्गते शुचिरन्यथा ॥ १३ ॥

जातकं चेन्मृताशौचं शूद्रादीनां विशेषतः ।
ग्रामसीमाश्रयं शौचं ग्रामाशौचं विना भवेत् ॥ १४ ॥

अनिमित्तं निमित्तं च आलये मरणं भवेत् ।
तत्स्थाने शान्तिकं कृत्वा देवप्रोक्षणमाचरेत् ॥ १५ ॥

आलये मण्टपे गोष्ठे अनाथप्रेतमाश्रितम् ।
यः पुमान् प्रेतसंस्कारं विष्णुलोकं समाश्रयेत् ॥ १६ ॥

जातकं मरणाशौचं संभवे ग्राममध्यके ।
मरणं भूसुराद्यैश्च ग्रामादीनां तु सम्भवे ॥ १७ ॥

अन्यजातिमृतं शौचं ग्रामशौचं न विद्यते ।
मरणे जनने चैव संभवे वेदपारगैः ॥ १८ ॥

औपासनाग्निहोत्रास्तु जपस्नानार्चनादिकम् ।
यावत्कालाश्रयं प्रेतं तावत्कालं विना भवेत् ॥ १९ ॥

ग्रामे तु नगरे मध्ये ब्रह्मघातं तु सम्भवे ।
तत्रापि सर्वकर्माणि वर्जयेत् ग्राममध्यके ॥ २० ॥

देवतार्चनयात्रादि सर्वकर्म न कारयेत् ।
कारयेद्यदि संमोहात् स्थाननाशो न संशयः ॥ २१ ॥

तस्मात्सर्वप्रयत्नेन प्रोक्षणं च समाचरेत् ।
भूतप्रेतपिशाचैश्च आवृतं भवति ध्रुवम् ॥ २२ ॥

सर्वदोषविनाशार्थं प्रोक्षणं च समाचरेत् ।
ग्रामशान्तिं प्रवक्ष्यामि शृणुष्व सुसमाहितः ॥ २३ ॥

प्रायश्चित्तेषु सर्वेषु प्रतिष्ठादौ विशेषतः ।
वर्षहीने जनक्षोभे राजराष्ट्रे तथैव च ॥ २४ ॥

उत्सवाद्यन्तकालेषु पुण्ययागे तथैव च ।
दुर्निमित्तोदये काले चैत्रे चैव विशेषतः ॥ २५ ॥

काम्यानां सर्वकार्येषु सर्वकर्म समाचरेत् ।
अन्येषामपि कार्येषु शान्तिहोमं तु कारयेत् ॥ २६ ॥

प्रासादे मण्डपे चाग्रे पचनालयमेव च ।
एकहस्तं द्विहस्तं वा कुण्डं कुर्यात्सुलक्षणम् ॥ २७ ॥

पुण्याहं वाचयेत्पश्चात् प्रोक्षयित्वा तु भूस्थलम् ।
देवस्य पुरतः कृत्वा अर्घ्यपाद्यादिकं तथा ॥ २८ ॥

अग्निं संस्कृत्य विधिवद्यथावदग्निमुखान्तिमम् ।
अग्निमध्ये तु मतिमान् योगपीठं प्रकल्पयेत् ॥ २९ ॥

तन्मध्ये चाह्वयेद्देवं मूलमन्त्रेण साधकः ।
न्यासं कुर्याद्यथान्यायं सकलीकृत्य विग्रहम् ॥ ३० ॥

अर्घ्याद्यैरर्चयेत्पश्चाद्धोमकर्म विचक्षणः ।
पालाशं खादिरं चैव बिल्वमौदुम्बरं तथा ॥ ३१ ॥

अश्वत्थप्लक्षन्यग्रोधमपामार्गं तु चाष्टमम् ।
मधुक्षीराज्यसंमिश्रं तेनाभ्युक्तान् समिद्गणान् ॥ ३२ ॥

मूलेनाष्टोत्तरशतं समिधानां पृथक् पृथक् ।
आज्यं चरुं तिलं चैव बीजं चैव यथाक्रमम् ॥ ३३ ॥

आज्य द्विषडक्षरेण चरु पुरुषसूक्ततः ।
तिलं वै विष्णुगायत्र्या बीजमष्टाक्षरेण वा ॥ ३४ ॥

एकमष्टोत्तरशतं जुहुयाच्च पृथक् पृथक् ।
अष्टोत्तरशतं चैव जुहुयाद्देशिकोत्तमः ॥ ३५ ॥

पञ्चोपनिषदैर्मन्त्रैर्विरजैर्द्वादशाक्षरैः ।
खड्गमन्त्रैः स्वबीजेन प्रत्येकं षोडशाहुतीः ॥ ३६ ॥

पूर्णाहुतिं ततो हुत्वा यथोक्तविधिना ततः ।
शान्तिहोममिति ख्यातं सर्वदोषनिकृन्तनम् ॥ ३७ ॥

सम्प्रोक्षणं तु वक्ष्यामि सर्वशास्त्रेषु चोदितम् ।
प्रासादस्याग्रतः कुर्यादधिवासनमण्डपम् ॥ ३८ ॥

प्रथमावरणे वापि द्वितीयावरणेऽपि वा ।
तृतीयावरणे वापि चतुर्थावरणेऽपि वा ॥ ३९ ॥

पञ्चमावरणे वापि देशे योग्यावकाशके ।
षोडशस्तम्भसंयुक्तं स्थाणुरष्टभिरेव वा ॥ ४० ॥

शिलामयैर्दारुमयैः प्रपां कुर्यात् क्रमेण वा ।
वेदद्वारसमायुक्तं चतुस्तोरणभूषितम् ॥ ४१ ॥

---

41. c) S[1]. देव for वेद

तन्मध्ये वेदिकां कुर्यादेकद्वित्रिसुहस्तकम् ।
वेदिकाया मुकाले तु समानि विषमाणि वा ॥ ४२ ॥

एकहस्तप्रमाणेन कुण्डं वा स्थण्डिलं तु वा ।
कारयेत्तु चतुर्दिक्षु चतुरश्रादिकं ततः ॥ ४३ ॥

पूर्वे तुर्यश्रकुण्डं तु दक्षिणे धनुराकृतिः ।
कारयेत्पश्चिमे भागे वृत्तकुण्डं तथैव च ॥ ४४ ॥

कुर्यात्कुण्डं तु राजेन्द्र फुल्लपद्मं तथोत्तरे ।
योनिनाभिसमायुक्तं प्रागुदीरितलक्षणम् ॥ ४५ ॥

शोभयेद्देशिकेनैव कारयेन्मण्डपस्थलम् ।
गोमयेनोपलिप्याथ सुधाचूर्णैरलङ्कृतम् ॥ ४६ ॥

वितानवस्त्रसंछन्नं बहुमालाविडम्बनम् ।
दीपमाला च बहुभिः घण्टामाल्यसमन्वितम् ॥ ४७ ॥

महाघण्टा च परितो दण्डैरम्रैः पदान्वितम् ।
चित्रयेत्तु गरुत्मन्तं चक्रराजहनूमकम् ॥ ४८ ॥

द्वारे द्वारे ध्वजपटं युग्मं युग्मसमन्वितम् ।
पूर्वे श्वेतध्वजं चैव दक्षिणे हरितप्रभम् ॥ ४९ ॥

पश्चिमे मेघवर्णं तु रक्तवर्णं तथोत्तरे ।
शालायां लक्षणं ह्येनदङ्कुरार्पणमारभेत ॥ ५० ॥

तत्कर्मारम्भकाले तु दिवा वा रात्रिरेव वा ।
अङ्कुरान् वापयेत् पश्चात् अधिवासपुरस्सरम् ॥ ५१ ॥

स्नपनं कारयेद्बिम्बं पञ्चगव्येन शोधयेत् ।
दर्भेणाच्छाद्य वेरादीन्नववस्त्रेण वेष्टयेत् ॥ ५२ ॥

42. c) MMy S[1]. स्त्रिकाले for मुकाले

अलद्रोणीं पुरः स्थाप्य पूरयेदम्बुभिः क्रमात् ।
छायाधिवासं संकल्प्य यागशालां प्रवेशयेत् ॥ ५३ ॥

पुण्याहं वाचयेत्पश्चात् प्रोक्षयेत्सर्वदिक्षु च ।
शन्नो देवीति मन्त्रेण पर्यग्निकरणं तथा ॥ ५४ ॥

पूजयेद्द्वारपालांश्च कुमुदादि यथाक्रमम् ।
प्राच्यां च कुम्भौ निक्षिप्य प्रतिमा स्वर्णनिर्मिताम् ॥ ५५ ॥

तद्देवतानुवर्णेन निक्षिपेल्लक्षणान्वितम् ।
सूत्रेण वेष्टयेत्कुम्भान् वस्त्रेणाच्छाद्य देशिकः ॥ ५६ ॥

निक्षिप्य धान्यराशौ तु कूर्चपल्लवसंयुतान् ।
द्वारे द्वारे तु विन्यस्य अर्चयेत् कुमुदादिकाम् ॥ ५७ ॥

निर्दोषकुम्भानादाय सूत्रवस्त्रेण वेष्टयेत् ।
संपूर्णमम्भसा विप्रैः निक्षिपेद्धान्यराशिषु ॥ ५८ ॥

अर्चयेद्गन्धपुष्पेण मूलमन्त्रेण देशिकः ।
दीपादिहविषान्तं तु अर्चयेद्देवमव्ययम् ॥ ५९ ॥

वेदिकोपरि विन्यस्य महाकुम्भादिकान् त्यजेत् ।
प्रतिष्ठोक्तप्रकारेण अर्चयेत् स्वस्वविद्यया ॥ ६० ॥

ततो होमं समारभ्य समिदाज्यौदनैस्ततः ।
प्रत्यक्कुम्भेषु जुहुयात् शतमष्टोत्तरं पृथक् ॥ ६१ ॥

संपाताज्यं गृहीत्वाथ सेचयेत् कुम्भवर्धनीम् ।
अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत् ॥ ६२ ॥

प्रभाते विमले शुद्धे कृतस्नानो कृताह्निकः ।
देवदेवं प्रबोध्याथ स्नपनं तत्र कारयेत् ॥ ६३ ॥

तिन्त्रिणीफलतोयेन बिम्बोद्वर्तनमाचरेत् ।
क्षालयेच्छुद्धतोयेन तुषभस्मेन लेपयेत् ॥ ६४ ॥

उष्णोदकेन संक्षाल्य शुक्लवस्त्रेण घर्षयेत् ।
मुखवासं ततो दद्यात् दापयेत् सुमनःफलैः ॥ ६५ ॥

अर्घ्यं पाद्यं तथाचामं गन्धं पुष्पं च दीपकम् ।
धूपं चैव यथान्यायं पूजयेद्देशिकोत्तमः ॥ ६६ ॥

शेषहोमं प्रकुर्वीत पूर्णाहुतिमथाचरेत् ।
भस्मना तिलकं कृत्वा धारयेद्देशिकस्ततः ॥ ६७ ॥

अर्चयेत्तु यथापूर्वं कुम्भस्थान लोकपालकान् ।
विन्यस्तकुम्भानादाय भक्तभागवतैस्सह ॥ ६८ ॥

आचार्योद्धृत्य करकमच्छिन्नं धारया यथा ।
धाम प्रदक्षिणं कृत्वा देवस्याग्रे विनिक्षिपेत् ॥ ६९ ॥

स्थापयेत्तु यथापूर्वं कूर्चेनादाय देशिकः ।
पुण्याहं वाचयेत्पश्चात् प्रोक्षयेत्सर्वदिक्षु च ॥ ७० ॥

वेदपारायणैः सार्धं प्रोक्षयेद्देवगात्रकम् ।
आदाय दर्भान् वस्त्राणि प्रोक्षयेत्पुरुषसूक्ततः ॥ ७१ ॥

न तिथिर्नच नक्षत्रं कालवेला न विद्यते ।
सद्य एव तु कर्तव्यं प्रोक्षणं सुसमाहितः ॥ ७२ ॥

पूजयेद्बलिदानान्तमिदं प्रोक्षणमीरितम् ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां
मरणादिप्रायश्चित्तविधानं नाम
सप्तविंशोऽध्यायः ॥

67. d) S¹. °कोत्तमः for °कस्ततः

# अथ अष्टाविंशोऽध्यायः

## [स्नपनविधानम्]

नित्ये नैमित्तिके चैव प्रायश्चित्तार्थकारणम् ।
पवित्रारोपणे चैव दमनारोपणेऽपि च ॥ १ ॥

उत्सवस्नपनं कुर्यात्प्रायश्चित्तार्थकारणम् ।
कल्हाराद्युत्सवे चैव प्रायश्चित्तार्थकारणम् ॥ २ ॥

नित्यकर्मणि वैकल्ये पवित्रोत्सवमाचरेत् ।
नैमित्तिकादिवैकल्ये प्रायश्चित्तं विधीयते ॥ ३ ॥

मासपक्षविधिं चैव उत्सवं तु विहीनके ।
तद्दोषपरिहारार्थं महोत्सवमथाचरेत् ॥ ४ ॥

कालपुष्पविहीने च दिनपुष्पविहीनके ।
मासपुष्पविहीने च मन्त्रपुष्पविहीनके ॥ ५ ॥

मुकुले चातिपक्वे च प्रमादात् स्पर्शने यदि ।
स देवः कुप्यते तस्मात् प्रायश्चित्तमथाचरेत् ॥ ६ ॥

तद्दोषपरिहारार्थं कल्हारोत्सवमाचरेत् ।
तुलस्याद्यानि सर्वाणि विशेषान्यादिपत्रके ॥ ७ ॥

पलाशाश्वत्थपत्रे वा दूर्वाङ्कुरविहीनके ।
फलपत्रविहीने वा प्रायश्चित्तमिहोच्यते ॥ ८ ॥

दमनं गन्धपत्रं च दमनोत्सवमाचरेत् ।
स्नानाभिषेकहीने च पुष्पतोयविहीनके ॥ ९ ॥

कलशद्रव्यहीने च सर्वद्रव्यविहीनके ।
सर्वेषां स्नपने हीने वृष्टिहीने भवेत्ततः ॥ १० ॥

क्षामं तु वर्धते चैव मत्स्यादीन्नाशयेत्ततः ।
तस्मात्सर्वप्रयत्नेन प्रायश्चित्तं समाचरेत् ॥ ११ ॥

अष्टोत्तरसहस्रेण स्नपनं कारयेद् बुधः ।
नित्यकाम्येषु सर्वेषु स्नपनं कारयेच्छुभम् ॥ १२ ॥

कारयेत् स्नपनं चान्यत् कथयामि यथाक्रमम् ।
पञ्चभागे कृते क्षेत्रे कलशान् पञ्चविंशतिः ॥ १३ ॥

ब्रह्मस्थानं ततः कृत्वा दैविकं तदनन्तरम् ।
तृतीयं मानुषं भागं प्रागुद्रव्यमहोच्यते(?) ॥ १४ ॥

मूलमन्त्रेण कलशान् ब्रह्मादीन् विन्यसेत् क्रमात् ।
प्रायतः प्राङ्मुखः पूर्वं ब्राह्मे स्नानोदकं न्यसेत् ॥ १५ ॥

ततश्च मानुषे भागे प्राच्यां पाद्यं तु विन्यसेत् ।
याम्ये त्वर्घ्यं तु वारुण्यां न्यसेदाचमनीयकम् ॥ १६ ॥

पञ्चगव्यं तथा सौम्ये घृतमाग्नेयगोचरे ।
नैर्ऋते दधि वै दद्यात् वायव्ये क्षीरमेव च ॥ १७ ॥

ऐशान्ये मधु विन्यस्य कर्तव्यं क्रमयोगतः ।
इन्द्राग्न्योर्मध्यदेशे तु कुर्यादुष्णोदकेन तु ॥ १८ ॥

क्षिपेन्मध्ये यमाग्न्योस्तु काषायमपि साधकः ।
मध्ये यमनिर्ऋत्योः स्थापयेन्मार्जनोदकम् ॥ १९ ॥

वायुराक्षसयोर्मध्ये विन्यसेच्च यवोदकम् ।
वायुवारुणयोर्मध्ये स्थापयेत्तु यवोदकम् ॥ २० ॥

14. d) S[1]. प्रागुदग्निव्यमिहोच्यते

20. bcd) M.

रत्नोदकं ततः स्थाप्य मध्ये वायव्यसोमयोः ।
ईशानसोमयोर्मध्ये लोहतोयं तु विन्यसेत् ॥ २१ ॥

ईशानशक्रयोर्मध्ये स्थापयेत्तु कुशोदकम् ।
तदा च दैविके भागे प्राच्यां गन्धोदकं न्यसेत् ॥ २२ ॥

पुष्पाम्भो दक्षिणस्यां तु पश्चिमे चौपमानिकम् ।
सौम्ये चामलकाम्भस्तु आग्नेये चाक्षतोदकम् ॥ २३ ॥

नैर्ऋते नाळिकेराम्भो वायव्येक्षुरसं ततः ।
ईशानगोचरे भागे स्थापयेत्तण्डुलोदकम् ॥ २४ ॥

मन्त्रेणाष्टाक्षरेणैव द्वादशाक्षर एव वा ।
अथवा विष्णुगायत्र्या मन्त्रत्रयमुदाहृतम् ॥ २५ ॥

पञ्चादितण्डुलानां तु स्नपनं परिकीर्तितम् ।
अन्तरान्तरयोगेन दीपधूपं प्रदर्शयेत् ॥ २६ ॥

नीराजनं ततः कृत्वा तण्डुलं दापयेत्ततः ।
अभिषेकजलं पीत्वा कोटियज्ञफलं भवेत् ॥ २७ ॥

सर्वदोषविनाशार्थं सर्वरोगनिकृन्तनम् ।
आयुः कीर्तिश्रियौ नित्यं भक्त्या परमभावनम् ॥ २८ ॥

स्नापयेत्कलशेनैव तत्तद्द्रव्यानुसारतः ।
पुष्पाञ्जलिं ततः कृत्वा गाथया वक्ष्यमाणया ॥ २९ ॥

भगवन् पुण्डरीकाक्ष लक्ष्मीवल्लभ ते नमः ।
नमः प्रणवरूपाय वेदाहरणकर्मणे ॥ ३० ॥

21. abc) M. om.

नमः सकललोकाय निष्कलाय नमो नमः ।
इत्युक्त्वा देवदेवेशं प्रणम्य च मुहुर्मुहुः ॥ ३१ ॥

पुष्पमादाय हस्ताभ्यां निक्षिपेद्देवपादयोः ।
महाहविर्निवेद्याथ पूजयेद्देशिकोत्तमः ॥ ३२ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां स्नानविधानं नाम
अष्टाविंशोऽध्यायः ॥

# एकोनत्रिंशोऽध्यायः

## [अथ भूकम्पप्रोक्षणविधिः]

अथातः संप्रवक्ष्यामि भूकम्पप्रोक्षणं शृणु ।
देवालये तटाके च ग्राममध्ये तथैव च ॥ १ ॥

षोडशस्तम्भसंयुक्तं द्वात्रिंशत्स्तम्भमेव वा ।
वेदद्वारसमायुक्तं द्वारे द्वारे तु तोरणम् ॥ २ ॥

पूर्वे तु मण्डपं कृत्वा तन्मध्ये वेदिमृत्स्नया ।
एकद्वित्रिचतुर्हस्तैरायतं विस्तृतं समम् ॥ ३ ॥

दर्पणोदरवत्कुर्यात् पूर्वोक्तं लक्षणान्वितम् ।
अष्टमङ्गळपीठादीन् स्रुक्स्रुवं तोरणानि च ॥ ४ ॥

समेन पूजयेत्कर्म आरभेदङ्कुरार्पणम् ।
मृत्सङ्ग्रहं प्रदोषे च रात्रौ बीजानि वापयेत् ॥ ५ ॥

बीजानामधिपः सोमो तस्माद्रात्रौ तु वापयेत् ।
मुद्गसर्षपश्यामाकान् त्रीणि बीजानि वापयेत् ॥ ६ ॥

पालिका घटिका राजन् शरावा त्रिविधा भवेत् ।
पालिकानामभावे तु घटिकाः संप्रकीर्तिताः ॥ ७ ॥

घटिकानामभावे तु पालिका संप्रकीर्तिताः ।
तयोरभावेत्वन्येषां यथा वित्तानुसारतः ॥ ८ ॥

न कर्म फलदं राजन् अङ्कुरारोपणं विना ।
तस्मादारभ्यमाणेषु कर्षणादिषु कर्मसु ॥ ९ ॥

पूर्वोक्तेन विधानेन कारयेदङ्कुरार्पणम् ।
अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत् ॥ १० ॥

प्रभाते विमले शुद्धे कृतस्नानः कृताह्निकः ।
समेनाराधनं विष्णो नैमित्तिकमथोत्सवम् ॥ ११ ॥

नित्यपूजावसाने च मण्डपे देवमाविशेत् ।
एकाशीतिविधानेन स्नपनं कारयेत्ततः ॥ १२ ॥

रक्षाबन्धं ततः कृत्वा आचार्यो देशिकैः सह ।
होमशालां प्रविश्याथ शान्तिहोमं तु कारयेत् ॥ १३ ॥

शान्तिकुम्भं समादाय विन्यसेच्छिष्यमूर्धनि ।
कूर्चेनादाय हस्तेन प्रोक्षयेद्देशिकोत्तमः ॥ १४ ॥

धामादिग्राममध्यान्तं प्रोक्षयेत्कुशवारिणा ।
जितन्त इति मन्त्रेण प्रोक्षयेद्देशिकोत्तमः ॥ १५ ॥

शेषोदकं समादाय बलिपीठेऽभिषेचयेत् ।
प्राणायामं ततः कृत्वा शालायां संप्रवेशयेत् ॥ १६ ॥

पुण्याहं वाचयेत्तत्र अर्चयेद्दिक्षु देवताः ।
द्वारपूजापुरस्कं तु परिवारान् समर्चयेत् ॥ १७ ॥

निर्दोषकलशान् सम्यक् क्षाळयेच्छुद्धवारिणा ।
कल्पयेत् स्नापनार्थे तु धान्यराशौ तु देशिकः ॥ १८ ॥

क्षालयेद्गन्धतोयेन कुम्भानादाय देशिकः ।
सूत्रवस्त्रोदकैः सार्धं धान्यराशौ तु विन्यसेत् ॥ १९ ॥

अधोमुखं न्यसेत्कुम्भान् वस्त्रेणाच्छाद्य बुद्धिमान् ।
घटिकैकार्धमथवा एतत्कुम्भाधिवासनम् ॥ २० ॥

ततोद्धृत्य तु तत्कुम्भान् पूरयेद्गन्धतोयकम् ।
अश्वत्थपत्रकूर्चैश्च निक्षिपेत्लवणान्वितम् ॥ २१ ॥

स्थापयेत्कुम्भकरकान् वेदिमध्ये तु विन्यसेत् ।
तत्तद्देशानुसारेण सौवर्णं प्रतिमादिकम् ॥ २२ ॥

निक्षिपेत्कुम्भमध्ये तु कल्पयेद्देशिकोत्तमः ।
ततो होमं समारभ्य कुण्डे वा स्थण्डिलेऽपि वा ॥ २३ ॥

मूलेनाष्टोत्तरशतं समिदाज्यैर्यजेत पृथक् ।
संपाताज्यं गृहीत्वाथ प्रार्थयेदनलेश्वरम् ॥ २४ ॥

पूजयेत् स्थिरकुम्भानां अर्घ्यपाद्यादिपूर्वकम् ।
दूर्वानादाय हस्ताभ्यां संपाताज्ये निमज्य च ॥ २५ ॥

हस्तव्यत्यासमार्गेण घृतारोपणमाचरेत् ।
सुमङ्गलेति मन्त्रेण कुम्भेषु कलशेषु च ॥ २६ ॥

अर्चयेन्मूलमन्त्रेण गन्धपुष्पादिना ततः ।
हविर्निवेदयेत् पश्चात् द्वारे द्वारे बलिं क्षिपेत् ॥ २७ ॥

मूलबेरं समाराध्य गन्धपुष्पादिनार्चयेत् ।
दीपधूपादिनैवेद्यं दापयेद्देशिकोत्तमः ॥ २८ ॥

बलिबेरं नयेद्यानमारोप्य शिबिकादिकम् ।
नाराचं विन्यसेत् पश्चात् शुद्धपाशेन बन्धयेत् ॥ २९ ॥

देवमुद्धृत्य सहसा भक्तैर्भागवतैस्सह ।
छत्रचामरसंयुक्तं वीणावेणुरवैः सह ॥ ३० ॥

मुष्टिदीपशतेनैव बिभ्राणं देवपालकम् ।
नानालङ्कारसंयुक्तं पूर्वोक्तेन विधानतः ॥ ३१ ॥

कमण्डलुं समादाय पूरयेद्गन्धतोयकैः ।
कुशकूर्चं विनिक्षिप्य मूलमन्त्रेण देशिकः ॥ ३२ ॥

प्रासादद्वारमारभ्य ग्राममध्यान्तमेव हि ।
ध्वजारोहणपूर्वं तु महोत्सवविधानतः ॥ ३३ ॥

तत्प्रकारं तु राजेन्द्र बलिदानं समाचरेत् ।
बलिं निरवशेषेण बलिपीठे विनिक्षिपेत् ॥ ३४ ॥

ततश्च सतनै (?) स्नार्थं प्राणायामत्रयं चरेत् ।
पादप्रक्षाळनं कृत्वा आचम्य विजितेन्द्रियः ॥ ३५ ॥

देवपार्श्वे समासाद्य गृहीत्वा पुष्पमञ्जरीम् ।
अनेकैः स्तोत्रमन्त्रैश्च प्रणम्य च मुहुर्मुहुः ॥ ३६ ॥

महाहविर्निवेद्याथ रात्रिशेषं समापयेत् ।
प्रभाते विमले शुद्धे कृतस्नानः कृताह्निकः ॥ ३७ ॥

स्वात्मानं पूजयेत्पश्चात् देवमण्टपमाविशेत् ।
द्वारपूजापुरस्कं तु परिवारार्चनं ततः ॥ ३८ ॥

अर्चयेद्गन्धपुष्पेण दीपधूपादिना ततः ।
वेदिकायां न्यसेत्कुम्भान् अर्चयेद्देशिकोत्तमः ॥ ३९ ॥

ततो होमं समासाद्य वेदपारायणैः सह ।
मूलेनाष्टोत्तरशतं समिदाज्यैः पृथक् पृथक् ॥ ४० ॥

पूर्णाहुत्यन्तमखिलं जुहुयाद्देशिकोत्तमः ।
पूर्वेषामपि कुम्भानां उद्धृत्य भगवन्मया ॥ ४१ ॥

वेदपारायणैः सार्धं छत्रचामरसंयुतम् ।
द्वारकुम्भान् समादाय प्रोक्षयेद् ग्रामदिक्षु च ॥ ४२ ॥

प्रदक्षिणं क्रमात् कृत्वा आलयं संप्रवेशयेत् ।
देवस्य पुरतः स्थाप्य तत्कुम्भान् धान्यराशिषु ॥ ४३ ॥

पुण्याहं वाचयेत्पश्चात् तत्मङ्कल्पमतः परम् ।
अर्चयेत् पूर्ववत्कुम्भान् ब्राह्मणानामनुज्ञया ॥ ४४ ॥

प्रोक्षयेद्देवदेवेशं ब्राह्मणांश्चैव भोजयेत् ।
भूकम्पप्रोक्षणं प्रोक्तत् दिग्दाहप्रोक्षणं शृणु ॥ ४५ ॥

पर्वतग्रामे नदीतीरे गोष्ठे देवालयेऽपि च ।
मण्डपं कारयेद्द्वारि तोरणादि यथा पुरा ॥ ४६ ॥

पुष्पमाल्यैः परिवृतं घण्टाचामरशोभितम् ।
नानालङ्कारसंयुक्तं मण्डपं कारयेत्ततः ॥ ४७ ॥

तन्मध्ये वेदिकां कुर्यादेकद्वित्रिसुहस्तकम् ।
वेदिकायास्तु तालं तु समानि विषमाणि वा ॥ ४८ ॥

संपाताज्यं गृहीत्वाथ दूर्वानादाय देशिकः ।
आज्ये निमज्ज्य चाग्रेण खण्डितेन कुशेन वा ॥ ४९ ॥

कुम्भे कुम्भे च विन्यस्य घृतारोपणमाचरेत् ।
बलिं द्वारेषु निक्षिप्य प्रार्थयेत्तु हरिं प्रभुम् ॥ ५० ॥

अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत् ।
प्रभाते विमले शुद्धे स्नातो नियतमानसः ॥ ५१ ॥

शुक्लवस्त्रोत्तरीयश्च शुक्लयज्ञोपवीतवान् ।
ऊर्ध्वपुण्ड्रः शिखाबन्धः सर्वाङ्गसुरभीकृतः ॥ ५२ ॥

आचार्यं वरयेत्पश्चात् यजमानो जितेन्द्रियः ।
तत्तत्कर्मानुगुण्येन देयात्तस्य च दक्षिणा ॥ ५३ ॥

पूर्वं स्थापितकुम्भांश्च उद्धृत्य भगवन्मया ।
धामादिग्राममध्यान्तं प्रोक्षयेत्पूर्ववत्ततः ॥ ५४ ॥

देवस्य पुरतः स्थाप्य प्रोक्षयेत्पूर्ववत्ततः ।
महाहविर्निवेद्याथ पूजयेत्पूर्ववत्ततः ॥ ५५ ॥

ध्वजारोहणपूर्वं तु नैमित्तिकमहोत्सवम् ।
कारयेत्तीर्थपर्यन्तमुत्सवं च समाचरेत् ॥ ५६ ॥

तद्दोषं नाशयेत्तस्मिन् नीतिशास्त्रस्य निश्चयः ।
प्रायश्चित्तविधिं वक्ष्ये अशनीपातयेद्यदि ॥ ५७ ॥

प्रासादे गोपुरे चैव बलिपीठे महानसे ।
पुष्पस्थाने जलस्थाने बहिरङ्गणभूमिषु ॥ ५८ ॥

प्राकारे मण्डपे पीठे दीपदण्डे रथेऽपि वा ।
नृपहर्म्ये पुरद्वारे अशनीपातयेद्यदि ॥ ५९ ॥

तत्स्थानं निधनं याति तत्कर्ता नाशयेद्ध्रुवम् ।
तन्मण्डलाधिपो राजा व्याधिभिः परिभूयते ॥ ६० ॥

तस्मात्सर्वप्रयत्नेन सद्यः संप्रोक्षणं चरेत् ।
प्रोक्षणस्य विधिं वक्ष्ये शृणुष्वैकमनाधुना ॥ ६१ ॥

अशनीपातभेदेन पुनः सन्धानमाचरेत् ।
तदग्रे मण्डपं कुर्यात् पूर्वोक्तेन विधानतः ॥ ६२ ॥

द्वारतोरणकुम्भादीन् पूर्वोक्तेन विधानतः ।
अङ्कुरानर्पयेत् पश्चादधिवासपुरस्सरम् ॥ ६३ ॥

कुम्भैः षोडशभिः स्नायात् स्नपनं दर्पणे भवेत् ।
पूर्ववत् प्रक्षणं कृत्वा ब्राह्मणान् भोजयेत्ततः ॥ ६४ ॥

दक्षिणां दापयेत्पश्चात् यथा वित्तानुसारतः ।
भूषयेद्देशिकेन्द्रं तु वस्त्रहेमाङ्गुलीयकैः ॥ ६५ ॥

स्वर्णयज्ञोपवीतं च उष्णीषैरुत्तरीयकैः ।
पूजयेद्देशिकेन्द्रं तु दक्षिणां दापयेत्ततः ॥ ६६ ॥

अशनिप्रोक्षणं ह्येतत् भिन्नप्रोक्षणकं शृणु ।
देवाग्रे मण्डपं कृत्वा पूर्ववत् क्रमयोगतः ॥ ६७ ॥

द्वारतोरणकुम्भादीन् प्रतिष्ठायामिवाचरेत् ।
पूर्वेद्युरङ्कुरारोपं कारयेद्देशिकोत्तमः ॥ ६८ ॥

परेद्युरधिवासं च कुम्भादीनां विशेषतः ।
शान्तिहोमं ततः कृत्वा लक्षहोममतः परम् ॥ ६९ ॥

शान्तिहोमं पुरा कृत्वा ब्राह्मणान् भोजयेत् ततः ।
स्नपनं सहस्रकलशैः देवं समभिषेचयेत् ॥ ७० ॥

ध्वजारोहणपूर्वं तु नैमित्तिकमहोत्सवम् ।
कारयेत्पुष्पयागान्तं कुर्यादव भृतान्तकम् ॥ ७१ ॥

अवारि भोजनं कुर्यात् वेदविद्ब्राह्मणैर्नृप ।
दक्षिणां दापयेत्तस्मै यथा वित्तानुसारतः ॥ ७२ ॥

कूष्माण्डदानं कुर्वन्ति तिलहोमसहस्रकम् ।
भूसूक्तं सर्वदा वी .... शाकुनं प्रति ॥ ७३ ॥

श्रीसूक्तं वारुणं सूक्तं चतुर्वेदसमन्वितम् ।
इतिहासपुराणानि उच्चरेत्तु यथाविधि ॥ ७४ ॥

तद्दोषं नश्यते भूप इति शास्त्रस्य निश्चयः ।
भूभिन्नप्रोक्षणं ह्येतद्दिवा नक्षत्रदर्शने ॥ ७५ ॥

तच्छान्तिं वक्ष्यते भूप शृणुष्वैकमनाधुना ।
मण्डपं देवदेवस्य पुरतः पूर्ववत्तथा ॥ ७६ ॥

द्वारतोरणकुम्भादीन् प्रतिष्ठायामिवाचरेत् ।
अङ्कुरं पूर्ववत्कृत्वा तद्रात्रौ होममाचरेत् ॥ ७७ ॥

प्रपां वा मण्डपे मध्ये होमकुण्डं तु कारयेत् ।
खानयेत्पुरुषार्धं तु विस्तृतं चाष्टहस्तकम् ॥ ७८ ॥

तत्प्राच्यां वेदिं विन्यस्य एकद्वित्रिसुहस्तकम् ।
याम्ये नैर्ऋतमध्ये तु दीपवेदिं प्रकल्पयेत् ॥ ७९ ॥

एकहस्तस्य विस्तारं त्रिमेखलसमन्वितम् ।
तदग्रे मण्डलाकारं अथवा चतुरश्रकम् ॥ ८० ॥

वायव्यसोमयोर्मध्ये पालिकावेदिं कल्पयेत् ।
एकद्वित्रिस्वहस्तेन उच्छ्रायं विस्तृतं समम् ॥ ८१ ॥

सोम ईशानयोर्मध्ये ग्रहपूजनवेदिका ।
कल्पयेदेकहस्तेन उच्छ्रायं विस्तृतं समम् ॥ ८२ ॥

प्रदोषे समनुप्राप्ते यागशालां प्रवेशयेत् ।
पुण्याहं वाचयेत्पश्चात् प्रोक्षयेत् सर्वदिक्षु च ॥ ८३ ॥

ब्राह्मणानामनुज्ञां च लब्ध्वा तत्रैव देशिकः ।
आरभेत्कर्मजालं च ततो देशिकसत्तमः ॥ ८४ ॥

द्रोणपूर्णयेत्कादिशिवयं स्यादि वा भवेत् ।
वृत्तायतं सुवृत्तं वा दाडिमामलकाकृतिम् ॥ ८५ ॥

पक्वबिम्बफलाकारां वर्जयेत्कालमण्डलम् ।
तत्कुम्भान् क्षाळयेद्गन्धतोयेनादाय देशिकः ॥ ८६ ॥

सूत्रवस्त्रेण संवेष्ट्य मूलमन्त्रेण देशिकः ।
पूर्ववेदिकमध्ये तु विन्यसेत्तु यथा पुरा ॥ ८७ ॥

प्रथमं वस्त्रमाच्छाद्य व्रीहौ विन्यस्य बुद्धिमान् ।
भारत्रयं तदर्धं वा तस्यार्धं वाथवा भवेत् ॥ ८८ ॥

तस्योपरि न्यसेद्वस्त्रमाच्छाद्य सुसमाहितः ।
तस्योपरि न्यसेत्पश्चात् व्रीह्यर्धं तण्डुलं क्षिपेत् ॥ ८९ ॥

वस्त्रेणाच्छाद्य तदुपरि तण्डुलार्धं तिलं क्षिपेत् ।
नववस्त्रेण संछाद्य दर्भेणाच्छाद्य बुद्धिमान् ॥ ९० ॥

कुम्भानादाय हस्ताभ्यां गन्धोदेन प्रपूरयेत् ।
पिप्पलच्छदकूर्चेन निक्षिपेल्लवणान्वितम् ॥ ९१ ॥

वेदिमध्ये विनिक्षिप्य महाकुण्डं तु देशिकः ।
तत्पार्श्वे दक्षिणे भागे करकं विन्यसेत्ततः ॥ ९२ ॥

परितो ह्यष्टकुम्भस्य इन्द्रादीशावसानकम् ।
स्थापयेन्मूलमन्त्रेण अर्चयेद्गन्धपुष्पकैः ॥ ९३ ॥

दीपादिहविषान्तं तु पूजयेद्देशिकोत्तमः ।
महाकुम्भे मूलमूर्तिं करके च सुदर्शनम् ॥ ९४ ॥

इन्द्रादीनष्टकुम्भेषु कुमुदादीन्यजेत्ततः ।
तत्तद्देवानुरूपेण सौवर्णप्रतिमादिकम् ॥ ९५ ॥

कुम्भमध्ये विनिक्षिप्य पूजयेद्देशिकोत्तमः ।
दीपकुम्भं समभ्यर्च्य गन्धोदकसुपूजितम् ॥ ९६ ॥

वेदिमध्ये विनिक्षिप्य स्थालिपात्रं तु विन्यसेत् ।
पूजयेद्वासुदेवं तु अर्घ्यादिहविषान्तकम् ॥ ९७ ॥

प्रार्थयेद्गृहदेवांश्च ततो होमं समारभेत् ।
कुण्डस्य पश्चिमे देशे आसने तु समाविशेत् ॥ ९८ ॥

पूर्ववन्न्यासकार्यं तु योजयेद्देशिकोत्तमः ।
पुरस्तात्तन्त्रपूर्वं तु होमकर्म विशेषतः ॥ ९९ ॥

याज्ञियान् वृक्षसंजातान् समिधश्च सहस्रकम् ।
अष्टाविंशतिपूर्वं तु समिधश्च प्रकीर्तिताः ॥ १०० ॥

प्रत्येकं मूलमन्त्रेण समिदादीन् प्रकीर्तितान् ।
पृथक् पृथक् हुनेदाज्यं समिधश्च पृथक् पृथक् ॥ १०१ ॥

आचार्यो ऋत्विजैः सार्धं होमयेत्तु हुताशने ।
संपाताज्यं गृहीत्वाथ कुम्भेषु कलशेषु च ॥ १०२ ॥

सेचयेन्मूलमन्त्रेण पूर्ववद्देशिकोत्तमः ।
बलिदानं ततः कृत्वा इन्द्रादीन लोकपालकान ॥ १०३ ॥

पूजयेत्तु विशेषेण गन्धपुष्पादिना ततः ।
अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत् ॥ १०४ ॥

ब्राह्मे मुहूर्ते चोत्थाय कृतस्नानः कृताह्निकः ।
स्वात्मार्थं पूजयेत्पश्चात् प्रविशेद्देवनालयम् ॥ १०५ ॥

पादप्रक्षाळनं कृत्वा आचम्य विजितेन्द्रियः ।
गेहं प्रदक्षिणं कृत्वा गर्भगेहं प्रवेशयेत् ॥ १०६ ॥

मूलबेरं समभ्यर्च्य गन्धपुष्पादिना ततः ।
श्रियं देवीं समभ्यर्च्य अर्घ्यपुष्पादिना ततः ॥ १०७ ॥

गर्भशालां प्रविश्याथ पूजयेद्देशिकोत्तमः ।
यागोपयुक्तद्रव्याणि आचार्याय प्रदापयेत् ॥ १०८ ॥

अन्यथा चेन्महादोषो तच्छान्तिर्निष्फला भवेत् ।
प्रतिसूर्यं प्रकाशश्चेत प्रेक्षणं कुम्भपूर्वकम् ॥ १०९ ॥

ततो होमं समारभ्य पूर्णाहुत्यवसानकम् ।
प्रार्थयेदनलेशं च दिवा नक्षत्रदर्शनम् ॥ ११० ॥

तद्दोषशान्तये तस्मै नमः प्रणवमूर्तये ।
पूर्वस्थाने कुम्भानादाय उद्धृत्य भगवन्मया ॥ १११ ॥

ग्रामादिग्राममध्यान्तं प्रोक्षयेत्कुम्भपूर्वकम् ।
पूर्ववद्यागसदनं पूर्वे वा दक्षिणेऽपि वा ॥ ११२ ॥

पश्चिमे वा नृपश्रेष्ठ पूर्वोक्तं लक्षणान्वितम् ।
वेदिमध्ये महाकुण्डमेकद्वित्रिसुहस्तकम् ॥ ११३ ॥

योनिनाभिसमायुक्तं लक्षणं पूर्ववद्भवेत् ।
खानयेदेकहस्तं च तन्मध्येऽष्टदलं लिखेत् ॥ ११४ ॥

प्रदोषे समनुप्राप्ते कृत्वा वै चाङ्कुरार्पणम् ।
शान्तिहोमं ततः कृत्वा ग्रामशान्तिमतः परम् ॥ ११५ ॥

पुण्याहं वाचयेत्पूर्वं तत्तत्कर्माणि योजयेत् ।
द्वारतोरणकुम्भादीन् पूर्ववल्लक्षणान्वितम् ॥ ११६ ॥

रक्षाबन्धं ततः कृत्वा स्नपनं तु ततः परम् ।
छायाधिवासं संकल्प्य पूर्वोक्तेन विधानतः ॥ ११७ ॥

ततो होमं समारभ्य मार्जनादीनि पूर्ववत् ।
प्रत्येकमष्टोत्तरशतं जुहुयात्पूर्ववत् पृथक् ॥ ११८ ॥

पालाशाश्वत्थखदिरवैकङ्कतशमीवटम् ।
अपामार्गमर्कदण्डैः पृथगष्टोत्तरं शतम् ॥ ११९ ॥

लाजैश्च तिलमुद्गैश्च यवैश्च श्वेतसर्षपैः ।
आज्यविच्चैर्मूलमन्त्रैर्होमयेद्देशिकोत्तमः ॥ १२० ॥

सम्पाताज्यं गृहीत्वाथ पूजयेत्क्रमयोगतः ।
कुम्भे कुम्भे विनिक्षिप्य शेषं पूर्ववदाचरेत् ॥ १२१ ॥

अनिर्वाणप्रदीपैश्च रात्रिशेषं समापयेत् ।
प्रभाते विमले शुद्धे कृतस्नानो कृताह्निकः ॥ १२२ ॥

पूजयेदात्मदेवं तु यथापूर्वोदिताः क्रियाः ।
प्रार्थयेद्देवदेवेशं प्रविशेदालयं ततः ॥ १२३ ॥

पादप्रक्षाळनं कृत्वा आचम्य विजितेन्द्रियः ।
दीपानारोपयेत्पश्चात् प्रणमेद्दण्डवत् क्षितौ ॥ १२४ ॥

देवस्य दक्षिणे पार्श्वे आसनं तु समाचरेत् ।
पूर्ववन्न्यासकर्माणि कारयेद्देशिकोत्तमः ॥ १२५ ॥

नित्यपूजां प्रकुर्वीत ततो होमं समाचरेत् ।
होमयेत्पूर्ववद्धीमान् समिदाज्यैः पृथक् पृथक् ॥ १२६ ॥

पूर्वोदितेषु द्रव्येषु पूर्णाहुत्यवसानकम् ।
पृथक् संस्थापयेत्कुम्भानुद्धृत्य करकादिकान् ॥ १२७ ॥

धामादिग्राममध्यान्तं प्रोक्षयेन्मूलविद्यया ।
शेषोदकं महापीठे स्नानं कुर्यात्तु देशिकः ॥ १२८ ॥

पूर्ववत् प्रोक्षणं कुर्यात् तद्दोषं तु न बाध्यते ।
यथा वित्तानुसारेण देया चान्यापि दक्षिणा ॥ १२९ ॥

आचार्याय प्रदातव्या इति शास्त्रस्य निश्चयः ।
तत्तत्कर्मानुगुण्येन ऋत्विग्भिः परिचारकैः ॥ १३० ॥

दक्षिणां दापयेत्तस्मै यथा वित्तानुसारतः ।
प्रणम्य शिरसा देवं पुण्डरीकाक्षविद्यया ॥ १३१ ॥

पूजास्वीकरणार्थाय क्षमस्व पुरुषोत्तम ।
इति मन्त्रं जपित्वा तु आशीर्वादमतः परम् ॥ १३२ ॥

कारयेद्देशिकेन्द्रस्तु राष्ट्रशान्तिर्न संशयः ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां
उत्पातशान्तिविधानो नाम
एकोनत्रिंशोऽध्यायः ॥

# त्रिंशोऽध्यायः

## [ अन्तर्यागविधिः ]

अथ वक्ष्यामि राजेन्द्र अन्तर्यागमतः शृणु ।
हृदयाब्जे न्यसेद्देवं प्रणवाद्यगमीश्वरम् ॥ १ ॥

अर्चनेन विधानेन अष्टत्रिंशत्कलैर्युतम् ।
अङ्गुष्ठमात्रमचलं विष्णुं विद्याङ्गसंयुतम् ॥ २ ॥

पञ्चमावरणा यत्र तत्र तेऽप्येकमेव वा ।
नाभौ होमः प्रकर्तव्यः ललाटे सर्वतोमुखम् ॥ ३ ॥

आधाराधेयमित्युक्तं प्राणायामत्रयं क्रमात् ।
तदूर्ध्वं द्वादशान्तं च सोमके जीवनस्त्वकैः ॥ ४ ॥

शोषणैश्च तदूर्ध्वं च दहनैर्मध्यमैस्तथा ।
प्लावनैश्च अधोकृत्वा योगपीठस्याधोमुखम् ॥ ५ ॥

अमृतं चिन्तयेत्तस्मिन् सुषुम्नैर्मन्त्रकैस्तथा ।
आपूर्य च ततो ध्यायेदमृतात्मा तथैव च ॥ ६ ॥

ध्यायेदमृतमात्मानमेतद्विष्णुतनुः स्मृतम् ।
पूरकं कुम्भकं चैव रेचकं पूर्वमभ्यसेत ॥ ७ ॥

औदरं वायुमत्युल्यं नाडिकापीड्य रेचयेत ।
श्रुतीव पूरयेत्सम्यक् जठरे बाह्यवायुना ॥ ८ ॥

अन्तर्बहिःस्थितान् वायून गृह्णाति न मुञ्चति ।
पूर्णकुम्भसमं यस्मात्तस्मात्तत कुम्भमुच्यते ॥ ९ ॥

द्वादशेनैव मन्त्रेण रेचकादींस्तथाभ्यसेत् ।
ब्रह्मा विष्णुश्च रुद्रश्च क्रमेण ह्यधिदेवताः ॥ १० ॥

त्रितलं सिद्धिरित्युक्तं त्रिगुणं सगुणं तथा ।
सात्त्विकं निर्गुणं स्मृत्वा ध्यात्वा सद्भावसम्भवम् ॥ ११ ॥

भवत्वात् भूतशुद्धिश्च आत्मशुद्धिस्तथैव च ।
देहमात्मा न शुद्ध्यन्ते शुद्धदेहमिदं बुधः ॥ १२ ॥

प्रणवत्वात् प्राणशोधः सर्वशुद्धिर्विशेषतः ।
शुद्धदेहमिदं कृत्वा विष्णोर्विष्णु समर्चयेत् ॥ १३ ॥

प्राणायामत्रयं चैव त्वन्तर्यागमिदं क्रमात् ।
अथातः संप्रवक्ष्यामि पञ्चगव्यमिदं शृणु ॥ १४ ॥

तव स्नेहात् प्रवक्ष्यामि साधनं सर्वभूपते ।
उत्तमं द्रोणकं चैव मध्यमं शिवकेन तु ॥ १५ ॥

अधमं च यथाकामं पञ्चगव्यप्रमाणकम् ।
पयसा शत्रुनाशं च दधि पुत्रविवर्धनम् ॥ १६ ॥

घृतेन पूज्यसंयुक्तं मोक्षसाधनमुत्तमम् ।
गोमूत्रं श्रीकरं चैव गोमयं रोगनाशनम् ॥ १७ ॥

पुण्याहं वाचयेत्तत्र मृदा देवान् प्रपूजयेत् ।
प्रागग्रमुदगग्रं च युगसूत्रं तु विन्यसेत् ॥ १८ ॥

मध्यमे विलिखेत्पद्ममष्टपत्रं सकर्णिकम् ।
मध्यमे शिवतत्त्वं तु पूर्वे चाच्युततत्त्वकम् ॥ १९ ॥

दक्षिणे ब्रह्मतत्त्वं तु उत्तरे पुरुषतत्त्वकम् ।
पश्चिमे तु कलातत्त्वं पञ्चकोष्ठं तु विन्यसेत् ॥ २० ॥

मध्ये तु क्षीरकुम्भं तु दधिपूर्वं तु विन्यसेत् ।
दक्षिणे घृतविन्यासो गोमूत्रं चोत्तरे तथा ॥ २१ ॥

गोमयं पश्चिमे चैव आग्नेय्यां शालिपिष्टकम् ।
नैरृत्यां रजनीं चैव वायव्यां नालिकेरकम् ॥ २२ ॥

ऐशे कुशोदकं चैव धर्मादीनां प्रपूजयेत् ।
क्षीरं दामोदरं प्रोक्तं मूर्तीनां क्षीरविन्यसेत् ॥ २३ ॥

दक्षिणे विष्णुमूर्तिं च क्षीरकुम्भं तु विन्यसेत् ।
उत्तरे ब्रह्मदैवत्यं क्षीरकुम्भं च विन्यसेत ॥ २४ ॥

पश्चिमे पादमित्युक्तं पञ्चान्मन्त्रं तु विन्यसेत् ।
साक्षाद्विष्णुरिति स्मृत प्रासादे न तु पूजयेत ॥ २५ ॥

दिग्बन्धं चास्त्रमन्त्रेण कवचेनावकुण्ठयेत ।
निरीक्षणादि पञ्चमुद्रा गन्धकुम्भं तु विन्यसेत ॥ २६ ॥

दीपधूपं हृदा दत्वा महाघण्टां तु नाडयेत् ।
पञ्चमावरणे पूज्या पञ्चगव्यमिति स्मृतम् ॥ २७ ॥

कृष्णाय गोमयं मूत्रं नीलाय कपिलाघृतम ।
सुरभे दधि शुक्लायाः ताम्रायाः क्षीरमाहरेत ॥ २८ ॥

अलाभे सर्ववर्णानां कपिलोक्तं प्रशस्यते ।
गोमूत्रमादिदैवत्यं गोमयं मामदेवता ॥ २९ ॥

पयसश्चाग्निदैवत्यं दध्नः शुक्राधिदेवता ।
घृतस्य देवता विष्णुरित्येते अधिदेवताः ॥ ३० ॥

गोमूत्रमेकपलं स्यात् अङ्गुष्ठाग्रं तु गोमयम् ।
क्षीरं सप्तपलं दद्यात् दधि त्रिपलमुच्यते ॥ ३१ ॥

घृतमेकपलं दद्यात् पलमेकं कुशोदकम् ।
खननं हननं चैव पूरणं भूनिवापनम् ॥ ३२ ॥

विप्रोच्छिष्टं च होमं च पञ्चशुद्धिरिति स्मृता ।
पञ्चगव्यं तथा सौम्ये घृतमाग्नेयगोचरे ॥ ३३ ॥

नैऋत्यां दधि विन्यस्य वायव्यां क्षीरमेव च ।
ऐशान्ये मधु विन्यस्य कर्तव्यं क्रमयोगतः ॥ ३४ ॥

गोमूत्रे शर्करां न्यस्य गोमये शर्करां न्यसेत् ।
आढकं क्षीरसंयुक्तं द्विगुणं दधिमेव च ॥ ३५ ॥

त्रिगुणं मधुसंयुक्तं घृतं तस्य चतुर्गुणम् ।
शर्करा कुडुबं चैव पञ्चामृतमिति स्मृतः ॥ ३६ ॥

सुरेवती च पुष्पाढ्या श्रवणादित्यपैतृका ।
त्वाष्ट्रं चैते प्रशस्यन्ते पञ्चगव्यप्रयोगके ॥ ३७ ॥

द्वादश्यां च नवम्यां च चतुर्थ्यां च ततः परम् ।
पञ्चदश्यां तृतीयायां एकादश्यां शुभं भवेत् ॥ ३८ ॥

शुभानि कारणान्याहुः शुभयोगाः शुभावहाः ।
चन्द्रमाजीवशुक्राणां वारवर्गोदयाः शुभाः ॥ ३९ ॥

मिथुनं च त्रिकोणं च .... .... .... ।
शुभा केन्द्रत्रिकोणस्थाः पापा लाभत्रिषष्ठगाः ॥ ४० ॥

शुभप्रदाः शुभाः सर्वे अशुभा मरणस्थिताः ।
अकारणं सर्वजातानां .... समागमे ॥ ४१ ॥

नागयोगं वदन्त्यन्ये तारा कारणयोः स्थितम् ।
वारयोगं तथा कुर्यात् नित्ययोगे शुभे तथा ॥ ४२ ॥

अमावास्यां परार्थे तु नागयोग इति स्मृतः ।
वारनक्षत्रयोगे वा शुभे बलिनि कारयेत् ॥ ४३ ॥

ग्रीष्मऋक्षगते भानौ मुहूर्तो नागसंज्ञिकः ।

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां अन्तर्यागविधानं नाम त्रिंशोऽध्यायः समाप्तः

---

39. d) S[2]. वावसर्गोदयाः for वारवर्गोदयाः

# एकत्रिंशोऽध्यायः

## [ मुद्राविधानम् ]

अथ मुद्रां प्रवक्ष्यामि पूजाङ्गं शास्त्रचोदितम् ।
प्रीयन्ते मुदया देवास्तेन सन्निहिता नृप ॥ १ ॥

बन्धयेत्तु कनिष्ठौ तु अङ्गुष्ठौ बन्धयेत्ततः ।
पृष्ठे पृष्ठेन संयोज्य तार्क्ष्यमुद्रा प्रशस्यते ॥ २ ॥

कनिष्ठाङ्गुष्ठसंस्पृश्य अन्येषामपि च द्वयोः ।
करयोस्तलयोः स्पृश्य चक्रमुद्रा प्रशस्यते ॥ ३ ॥

बन्धयेद्दक्षिणाङ्गुष्ठादङ्गुलैर्वामके करे ।
विनाङ्गुष्ठेन शेषाभिः बन्धयेत् सुदृढं यथा ॥ ४ ॥

जगती दक्षिणे वाममङ्गुष्ठे तु स्पृशेत्ततः ।
शङ्खमुद्रा इति प्रोक्ता पद्ममुद्राधुनोच्यते ॥ ५ ॥

करयोस्तलयो .... तथाचाग्रे तथैव च ।
पद्ममुद्रा इति प्रोक्ता क्रोडमुद्राधुनोच्यते ॥ ६ ॥

बन्धयेत् द्वौ करौ कृत्वा अनुयाने च तर्जनीम् ।
अनामिकौ बन्धयित्वा मध्यमाङ्गुलिमध्यमे ॥ ७ ॥

ऋजुं चैव न्यसेद्धीमानन्यमन्यस्पृशेत्ततः ।
कनिष्ठाङ्गुलौ च तथा अङ्गुष्ठौ मध्यमाङ्गुलौ ॥ ८ ॥

मध्यमे संस्पृशेत्तौ तु क्रोडमुद्रा प्रशस्यते ।
अङ्गुष्ठतर्जनीभ्यां तु प्रवेश्य हृदये न्यसेत् ॥ ९ ॥

हृदा मुद्रेति विज्ञेया मुद्रा सर्वत्र पूजिता ।
निवर्त्य मुष्टिमाहन्यात् अङ्गुष्ठेन च तर्जनीम् ॥ १० ॥

स्थापयित्वा ललाटान्ते शिरोमुद्रा प्रशस्यते ।
अग्रहस्तं परावृत्य बध्वा नाराचमुष्टिवत् ॥ ११ ॥

विसृष्टातिर्यगायम्य अस्त्रं संपरिकीर्तितम् ।
स्थापयिन्वा भ्रुवोर्मध्ये शिखामुद्रामधोमुखम् ॥ १२ ॥

नेत्रमुद्रा समुद्दिष्टा तर्जनीद्वयसंज्ञिता ।
ऊर्ध्वं कृत्वा तु सुमुखं अङ्गुलीनां च सर्वशः ॥ १३ ॥

विसृष्टकानि सर्वासां सिंहमुद्रा प्रशस्यते ।
अङ्गुष्ठेन कनिष्ठान्तं नामयित्वाङ्गुलत्रयम् ॥ १४ ॥

ऊर्ध्वं तु सुमुखं .... बन्धयेदङ्गुलित्रयम् ।
संवितौ सुमुखौ योजयौ गदामुद्रा प्रशस्यते ॥ १५ ॥

वन्दनं हृदये कुर्यादूर्ध्वं दक्षिणतो न्यसेत् ।
ऊर्ध्वाङ्गुष्ठौ वाममुष्टिं दक्षिणाङ्गुष्ठबन्धनी ॥ १६ ॥

सव्ये सव्ये तु चाङ्गुष्ठे भद्रं भद्र इति स्मृतः ।
व्याकोशकच्यलाकारपद्माकारं तु वा भवेत् ॥ १७ ॥

अङ्गुलश्च वितान्यत्र योजयेत्तु परस्परम् ।
अग्रं चाग्रेण सम्बन्धा मुद्रा प्रावणमीरितम् ॥ १८ ॥

अङ्गुष्ठा च कनिष्ठा च सर्वयोरुभयोरपि ।
सर्वत्र सुकृतान्यत्र उपवीता च मुद्रिका ॥ १९ ॥

तथाङ्गुष्ठकनिष्ठाभ्यां ज्ञेयालङ्कारमुद्रिका ।
अग्रतस्तं पुरावृत्य बद्ध्वा नाराचमुद्रिका ॥ २० ॥

कुर्याद्देवस्य सर्वे च प्राणमुद्रा प्रशस्यते ।
योगं योगं विना वापि करं कृतकरं कृतौ ।

सुकृतं सुकृतं वापि भद्रमित्यभिधीयते ।
तर्जनी तर्जनीयुक्तामेकमेकेन संस्पृशेत ॥ २२ ॥

कनिष्ठमालं चासीनं मुद्रादर्पणमुच्यते ।
कक्षौ कृत्वा च साङ्कथं स्पृशेदङ्गुलिभिस्ततः ॥ २३ ॥

तलपृष्ठं च करयोः विमुखीकृत्य बन्धयेत ।
संस्पृश्य चाङ्गुलीनां तु मुसलीकरणं भवेत् ॥ २४ ॥

अङ्गुष्ठानामिकाभ्यां तु स्पृशेदग्रं समन्ततः ।
घृतमुद्रा इति ख्याता बन्धयेत्सर्वमेव तु ॥ २५ ॥

कनिष्ठाङ्गुलितर्जन्या मध्यमानामिका मृदा ।
श्रीकरं तु समाख्यातं मुष्टिमुद्रा प्रशस्यते ॥ २६ ॥

विन्यस्य मध्यमाङ्गुल्या स्पृशेदग्रं तु विन्यसेत् ।
तर्जन्या विप्रसंवादमुद्राणां नृपसत्तम ॥ २७ ॥

मध्यमानामिकानां तु द्वौ करौ बन्धयेत्समम् ।
गण्डी च करणं ह्येतदङ्गुलीभिः समन्ततः ॥ २८ ॥

अनामिकाभिः शेषाभिरङ्गुलीनां विना भवेत् ।
सर्वं विजयमाप्नोति विघ्नेशस्य तु मुद्रिका ॥ २९ ॥

मनसा च धिया बुद्ध्या अङ्गुलीनां विना भवेत् ।
बन्धयोः करयोः पृष्ठं विमुखं तिर्यगूर्ध्वतः ॥ ३० ॥

पर्यङ्कं विपरीतं च व्यत्यासं हस्तमार्गतः ।
हंसमुद्रा इति प्रोक्ता बन्धयेदङ्गुलीं ततः ॥ ३१ ॥

समाकार्यं ततः कुर्यात् अङ्गुष्ठं विमुखीकृतम् ।
अनामिका कनिष्ठा च बन्धयेत्सर्वसिद्धिदम् ॥ ३२ ॥

मुष्टिमात्रं दृढीकृत्य अङ्गुष्ठं तु विना भवेत् ।
परस्परविरुद्धं हि विमुखीकरणं तथा ॥ ३३ ॥

कनिष्ठां च कनिष्ठं च अङ्गुष्ठं च विवर्जयेत् ।
अनामिका च कुर्वन्ति सेनामुद्रा प्रकीर्तिता ॥ ३४ ॥

करयोस्तलपृष्ठेन विमुखं च मुखं तथा ।
.... .... .... नाकारं ध्वजमुद्रा प्रशस्यते ॥ ३५ ॥

तर्जनीवर्जनीं वामे शेषाणि च विवर्जयेत् ।
संयोज्य पृष्ठं पृष्ठेन सकलीकृत्य यत्नतः ॥ ३६ ॥

सम्बन्धं वर्धयेत्तत्र पटस्य च विमुद्रिका ।
स्पर्शयेत् करतले कुर्यात् बन्धयेदङ्गुलित्रयम् ॥ ३७ ॥

विनाङ्गुष्ठेन शेषाभिः मुष्टिरङ्गुलिभिः स्मृतः ।
एते चाङ्गुलिभिर्म .... नं कुर्यात्पूर्वभागिके ॥ ३८ ॥

पूर्वकं विनियोगेन कनिष्ठाङ्गुलिनामकम् ।
अङ्गुष्ठेन कनिष्ठां च द्वौ करौ विनियोजयेत् ॥ ३९ ॥

कुम्भाकारं यथान्यायं विमुखीकृत्य नामतः ।
तिर्यक् तिर्यक् समाकारं बन्धनीयं प्रयत्नतः ॥ ४० ॥

साङ्करीमुद्रिका प्रोक्ता बन्धबन्धेन योजयेत् ।
अङ्गुष्ठानामिकाभ्यां तु स्वाहामुद्राः प्रकीर्तिताः ॥ ४१ ॥

मध्यमाङ्गुलिरग्रेण कनिष्ठाङ्गुलपर्वणि ।
रेखा च संस्पृशेद्धीमान् मुद्रा सामान्यकीर्तिता ॥ ४२ ॥

---

36. an) Mss.

द्वौ करौ संपुटौ कृत्वा अन्योन्यवशवर्तिनः ।
कनिष्ठिकानामिकयोः मध्यमा तर्जनीयथा ॥ ४३ ॥

हस्तव्यत्यासमार्गेण सुरमुद्रा प्रशस्यते ।
मुद्रया सिद्ध्यति ज्ञानं तथा कर्म प्रशस्यते ॥ ४४ ॥

प्रीयन्ते मुद्रया देवास्तथा सन्निहितो हरिः ।
अङ्गुष्ठानामिकामध्ये स्पृशेदन्योन्ययोगकम् ॥ ४५ ॥

गोकर्णमुद्रिका प्रोक्ता अन्येषामपि मुद्रया ।
अङ्गुष्ठतर्जनीयोगात् ज्ञानमुद्रा प्रकीर्तिता ॥ ४६ ॥

ज्ञानमुद्रार्थमुद्रा च आज्ञामुद्रा त्रिधा मता ।
ज्ञानमुद्रोत्तमं विद्यान्मध्यमा चार्थमुद्रिका ॥ ४७ ॥

आज्ञामुद्राऽधमा कुर्यादिति मुद्राः प्रकीर्तिताः ।
दर्पणं चार्घ्यं छत्रं च कूर्मन्यासं च शुद्धिदम् ॥ ४८ ॥

स्नानीये प्रोक्षणे चैव आज्ञामुद्रा विधीयते ।
पाद्यं लेपनमाज्यं च मुखमार्जनमार्जनम् ॥ ४९ ॥

अच्छिद्रमग्रपाणिं च पाणिमुद्रां प्रदर्शयेत् ।
न्यासान्तं शङ्खमर्घ्यान्तं पूजान्तं प्रोक्षणान्तकम् ॥ ५० ॥

हविरान्तोद्वासकाले षडेते शङ्खमुद्रिका ।
दीपधूपे च घण्टायां चामरं व्यजनादिषु ॥ ५१ ॥

कूर्चे वा मार्जनं पुष्पं मुष्टिमुद्रां प्रदर्शयेत् ।
अञ्जनं तिलकं छत्रं कूर्चन्यासं च शुद्धिदम् ॥ ५२ ॥

स्नानीये प्रोक्षणादीनां ज्ञानमुद्रां प्रदर्शयेत् ।
रजनी चन्दनं चैव कूर्चन्यासं च तर्पणम् ॥ ५३ ॥

मुखप्रक्षाळनं चार्घ्यं पञ्चैते पद्ममुद्रिका ।
न्यासान्तमर्चनान्तं स्यान्नैवेद्ये मण्डलार्चने ॥ ५४ ॥

जयं च शयनान्तं च षडेते चक्रमुद्रिकाः ।
न्यासादीनां निवेद्यादि दीपधूपार्चनादिकम् ॥ ५५ ॥

रजनीतैलशुद्ध्यर्थं पञ्चैते चास्त्रमुद्रिकाः ।
रथे च गरुडादीनां ध्वजछत्रादिवाहनम् ॥ ५६ ॥

पक्षीशस्य प्रतिष्ठान्तं ध्वजारोहावरोहयोः ।
सप्तैते तु क्रियान्ते च तार्क्ष्यमुद्रां प्रदर्शयेत् ॥ ५७ ॥

पात्राणामर्चने काले नैवेद्याद्यर्पणे तथा ।
अनलार्चनकाले तु सौरभीं दर्शयेत्ततः ॥ ५८ ॥

जपध्याने तथा होमे बीजहोमे समित्कुशैः ।
वस्त्रालङ्करणे चैव ज्ञानमुद्रा प्रशस्यते ॥ ५९ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां मुद्राविधानो
नाम एकत्रिंशोऽध्यायः ।

# अथ द्वात्रिंशोऽध्यायः

प्रायश्चित्तं प्रवक्ष्यामि उत्सवादि विशेषतः ।
नित्यनैमित्तिके चैव काम्यानां च विशेषतः ॥ १ ॥

नित्यपूजाविहीने च धूपदीपविहीनके ।
नित्योत्सवविहीने च नित्यस्नपनहीनके ॥ २ ॥

नित्यहोमविहीने च नित्यपुष्पविहीनके ।
मन्त्रपुष्पविहीने च मण्डलार्चनहीनके ॥ ३ ॥

वास्तुपूजाविहीने च द्वारार्चनविहीनके ।
परिवारार्चने हीने हीने सेनाधिपस्य तु ॥ ४ ॥

तार्क्ष्यादिमूर्तिहीने च गरुन्मानविहीनके (?) ।
पट्टपाटल्या हीने जलालयविहीनके ॥ ५ ॥

मण्टपद्वारहीने च गोपुरद्वारहीनके ।
गरुडालयहीने च ध्वजछत्रादिहीनके ॥ ६ ॥

व्यजनादिविहीने च चामरछत्रहीनके ।
तार्क्ष्यवैशेषिकाहीने भक्तानां च विहीनके ॥ ७ ॥

तत्तत्क्रमेण संयोज्य पुनः स्थापनमाचरेत् ।
प्रोक्षणं कारयेद्धीमान् इति शास्त्रस्य निश्चयः ॥ ८ ॥

प्रतिष्ठां पूर्ववत्सर्वं कारयेद्देशिकोत्तमः ।
उत्सवे वर्तमाने च ग्रामे वा पत्तनेऽपि वा ॥ ९ ॥

खेटके खर्वटे वापि उत्पातं संभवेद्यदि ।
तच्छान्तिं कारयेत्पूर्वं पश्चादुत्सवमाचरेत् ॥ १० ॥

ध्वजादितीर्थपर्यन्तमुत्सवं कारयेत्सदा ।
वर्तते च महीपाल तन्त्रे दोषो न विद्यते ॥ ११ ॥

सौवर्णं राजतं ताम्रं कांस्यं वा मृण्मयं तु वा ।
एतैश्च निर्मितं बिम्बं उत्सवादीनि कारयेत् ॥ १२ ॥

उत्सवादिविहीने च स्नाने वोत्सवं क्रमात् ।
स्नानबिम्बविहीने च यागबिम्बोत्सवं कुरु ॥ १३ ॥

यागबिम्बविहीने च बलिबिम्बोत्सवं कुरु ।
बलिबिम्बविहीने च बेरतीर्थोत्सवं भवेत् ॥ १४ ॥

सर्वमूर्त्यन्तराभावे सौवर्णप्रतिमादिकान् ।
कूर्चैर्मूर्त्यन्तराभावे .... .... .... ॥ १५ ॥

सङ्कल्पमूलबेरे च कानने पर्वतेऽपि वा ।
नदीतीरे समुद्रे च भगवद्विग्रहस्थिते ॥ १६ ॥

मार्कण्डेय उवाच :

.... .... .... .... कथं पूजति पूजकः ।
अन्यग्रामे स्थितान् बिम्बानपूजानकमस्थितान् ॥ १७ ॥

तद्बिम्बाद्यं च संयोज्य ध्वजतीर्थोत्सवादिकम् ।
कारयेद्देवदेवस्य उत्सवं तु न दोषभाक् ॥ १८ ॥

पूर्ववैखानसे बिम्बे भगवद्विग्रहस्थिते ।
पश्चात्तु पञ्चरात्रेण कुर्यादाराधनं हरेः (?) ॥ १९ ॥

इति श्रीपाञ्चरात्रे मार्कण्डेयसंहितायां आराधनविधिर्नाम द्वात्रिंशोऽध्यायः ।

मार्कण्डेयसंहिता समाप्ता ॥

56220

18-00

*Published by G. Kumaraswamy Reddy, I.A.S. Executive Officer and Printed at T. T. D. Press, Tirupati—16-8-84*